# संस्कृतव्याकरणम्

## कक्षा ९



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# संस्कृतव्याकरणम्

## कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽग्त्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतव्याकरणविषयकपाठ्यक्रमस्याधारेण नवम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

सर्वप्रथमं प्रा.डा. माधवशरणः उपाध्याय, प्रा. ध्रुवप्रसादः ज्ञवाली, हरिः गौतम- प्रभृतीनां महानुभावानां कार्यदलेन लिखितमिदं पुस्तकं उपप्रा. उपेन्द्रः दाहाल, केशवः भट्टराई, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां

शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः<br>
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**<br>
**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | मङ्गलाचरणम् | १ |
| प्रथमः | अथ संज्ञाप्रकरणम्<br>प्रत्याहारह्रस्वदीर्घप्लुतादिसंज्ञाः | २ |
| द्वितीयः | वर्णोच्चारणस्थानप्रयत्नाः | ९ |
| तृतीयः | सवर्णग्रहणम्, तदपवादश्च | १५ |
| चतुर्थः | पारिभाषिक्यः संज्ञाः | १९ |
| पञ्चमः | अथ परिभाषाप्रकरणम्<br>विविधाः परिभाषाः | २६ |
| षष्ठः | अथाच्सन्धिप्रकरणे<br>यण्सन्धिः | ३२ |
| सप्तमः | अयादिसन्धिः | ४० |
| अष्टमः | गुण-वृद्धिसन्धिः | ४६ |
| नवमः | पररूप-दीर्घसन्धिः | ५४ |
| दशमः | प्रकृतिभावः | ६२ |
| एकादशः | अथ हल्सन्धिप्रकरणे<br>श्चुत्वष्टुत्वसन्धिः | ७३ |
| द्वादशः | परसवर्णपूर्वसवर्णादिसन्धिः | ७७ |
| त्रयोदशः | अनुस्वारपरसवर्णादिसन्धिः | ८१ |
| चतुर्दशः | रुत्वादिविधिः | ८६ |
| पञ्चदशः | अथ विसर्गसन्धिप्रकरणम्<br>विसर्गसन्धिः | ९२ |
| षोडशः | अथ स्वादिसन्धिप्रकरणम्<br>रुत्वोत्वादिसन्धिः | ९८ |
| सप्तदशः | यत्वादिसन्धिः | १०१ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| अष्टादशः | अजन्तपुँल्लिङ्प्रकरणम्<br>प्रातिपदिकसंज्ञा | १०६ |
| एकोनविंशः | अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया- १ | १११ |
| विंशः | अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया- २ | ११६ |
| एकविंशः | सर्वनामशब्दानां रूपसिद्धिप्रक्रिया | १२२ |
| द्वाविंशः | मासनिर्जरविश्वपादिशब्दानां रूपसिद्धिप्रक्रिया | १३३ |
| त्रयोविंशः | इकारान्तशब्दस्य रूपसिद्धिप्रक्रिया | १४४ |
| चतुर्विंशः | सखिशब्दस्य रूपसिद्धिप्रक्रिया | १४९ |
| पञ्चविंशः | पतिद्वित्रिवातप्रम्यादिशब्दानां रूपसिद्धिप्रक्रिया | १५५ |
| षड्विंशः | बहुश्रेयसीकुमार्यादिशब्दानां रूपसिद्धिप्रक्रिया | १६२ |
| सप्तविंशः | उवर्णान्तशब्दस्य रूपसिद्धिप्रक्रिया | १७० |
| अष्टाविंशः | ऋकारान्तादिशब्दानां रूपसिद्धिप्रक्रिया | १७८ |
| एकोनत्रिंशः | अथाजन्तस्त्रीलिङ्गप्रकरणम्<br>आबन्तशब्दस्य रूपसिद्धिप्रक्रिया- १ | १८५ |
| त्रिंशः | आबन्तशब्दस्य रूपसिद्धिप्रक्रिया- २ | १९१ |
| एकत्रिंशः | इकारान्तशब्दस्य रूपसिद्धिप्रक्रिया | १९५ |
| द्वात्रिंशः | ईकारान्तशब्दस्य रूपसिद्धिप्रक्रिया | २०१ |
| त्रयस्त्रिंशः | उवर्णान्तादि-औवर्णान्तशब्दनां रूपसिद्धिप्रक्रिया | २०८ |
| चतुस्त्रिंशः | अथाजन्तनपुंसकलिङ्गप्रकरणम्<br>अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया | २१३ |
| पञ्चत्रिंशः | इवर्णान्तशब्दस्य रूपसिद्धिप्रक्रिया | २२० |
| षट्त्रिंशः | उकारान्तादि-औकारान्तशब्दानां रूपसिद्धिप्रक्रिया | २२७ |

ॐ श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥

# मङ्गलाचरणम्

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**

**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥ १ ॥**

(मया = भट्टोजिदीक्षितेन) मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते ।

मुनित्रयम् = मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः, तेषां = पाणिनिकात्यायनपतञ्जलीनाम्, त्रयम् = मुनित्रयम् । नमस्कृत्य = करशिरःसंयोगरूपं व्यापारं कृत्वा । ननु नमः शब्दयोगे "नमः स्वस्ति-" इत्यादिसूत्रेण चतुर्थी स्यादिति चेत्, "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति परिभाषया 'नमस्करोति देवान्' इतिवद् द्वितीया एव भवतीति बोध्यम् । तदुक्तीः परिभाव्य च = तस्य = मुनित्रयस्य उक्तयः तदुक्तयः ताः तदुक्तीः, सम्यगालोच्य चेत्यर्थः । इयम् = ग्रन्थरूपा वाक्यावलिः (भाविन्या अपि तस्या बुद्ध्या विषयीकरणादियमिति निर्देशो बोध्यः ।) वैयाकरणसिद्धान्तकौमुदी = व्याकरणमधीयते विदन्ति वा वैयाकरणाः, तेषां सिद्धान्ताः 'एते शब्दाः साधवः' इति निश्चितार्थाः, तेषां कौमुदी = चन्द्रिका अत्यन्तसादृश्यात् ताद्रूप्यव्यपदेशः । यथा चन्द्रिका तमो निरस्यति, दिनकरकिरणसम्पर्कजनितं सन्तापमपगमयति, एवमियमपि अज्ञानात्मकं तमो निरस्यति, अतिविस्तृतभाष्यादिमहाग्रन्थपरिशीलनजनितं चित्तसन्तापं शमयतीति चन्द्रिकासादृश्यं बोध्यम् । विरच्यते = क्रियते ।

**भावार्थः**

पाणिनि-कात्यायन-पतञ्जलीन् प्रणम्य प्राचीनानां वैयाकरणानामुक्तीः सम्यगालोच्य वैयाकरणानां निर्णीतार्थानां प्रकाशिका ग्रन्थरूपा वाक्यावलिः (मया भट्टोजिदीक्षितेन) विरच्यते ।

## अथ संज्ञाप्रकरणम्

# प्रत्याहारह्रस्वदीर्घप्लुतादिसंज्ञाः

वैयाकरणसिद्धान्तनिरूपणे व्याकरणशास्त्रस्य मूलभूतानि चतुर्दशसूत्राणि पठति भट्टोजिदीक्षितः-

**अइउण्** । १ । **ऋऌक्** । २ । **एओङ्** । ३ । **ऐऔच्** । ४ । **हयवरट्** । ५ । **लण्** । ६ । **ञमङणनम्** । ७ । **झभञ्** । ८ । **घढधष्** । ९ । **जबगडदश्** । १० । **खफछठथचटतव्** । ११ । **कपय्** । १२ । **शषसर्** । १३ । **हल्** । १४ ।

**इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । लण्सूत्रेऽकारश्च । हकारादिष्वकार उच्चारणार्थः ।**

इमानि सूत्राणि मुनित्रयग्रन्थबहिर्भूतत्वादप्रामाणिकानीति जिज्ञासायामेषां प्रामाणिकत्वं महेश्वरप्रसादलब्धत्वाद् बोध्यमित्याशयेनाह माहेश्वराणीति । एवमपि अनर्थकवर्णराश्यात्मकानामेषां सूत्राणामिह उपदेशप्रयोजनं किमिति प्रश्ने आह- अणादिसंज्ञार्थानीति । अण् आदिर्यासां ता अणादयः अणादयश्च ताः संज्ञाश्च अणादिसंज्ञाः, ता अर्थः प्रयोजनं येषां तानि अणादिसंज्ञार्थानि । एषां चतुर्दशसूत्राणां व्याकरणशास्त्रगतव्यवहारोपयोग्यणादिसंज्ञासु उपयोगान्नानर्थक्यमिति । एषामुदाहृतसूत्राणामन्ते भवा णकारादिवर्णा इत्संज्ञकाः । लण्सूत्रे लकारोत्तरवर्त्यकारोऽपीत्संज्ञकः, अनन्त्यत्वात् पृथगुक्तिः । लण्सूत्रे एव अकारस्येत्संज्ञकत्वे हयवरेत्यादावकारोच्चारणं व्यर्थमिति जिज्ञासायामुच्यते- हकारादीनां सुखोच्चारणार्थं पुनः पुनरकारपाठो बोध्यः । अथवा - 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति भाष्याद् अचं विना हलामुच्चारणाभावात् पुनः पुनरकारोच्चारणं बोध्यम् ।

चतुर्दशसूत्र्यां णकाराद्यन्तवर्णानाम् इत्संज्ञा भवतीत्युक्तम्, तदनुपपन्नम् । यतो हि - तेषां हि हलन्त्यमित्यनेन इत्संज्ञा वक्तव्या तच्च सूत्रं हल्पदार्थज्ञानोत्तरमेव प्रवृत्तिमर्हति 'वाक्यार्थज्ञाने पदार्थज्ञानं कारणम्' इति न्यायात् । हल्संज्ञा च लकारस्येत्संज्ञायाम् 'आदिरन्त्येन सहेता' इति सूत्रेण वाच्या । एवं च हलिति सूत्रे लकारस्येत्संज्ञायां सत्याम् 'आदिरन्त्येन' इति हल्संज्ञासिद्धौ हलन्त्यमिति सूत्रप्रवृत्तिः, हलन्त्यमिति सूत्रेण हल्सूत्रे लकारस्येत्संज्ञायाम् 'आदिरन्त्येन' इति हल्संज्ञासिद्धिरिति 'हलन्त्यम्' 'आदिरन्त्येन' इत्यनयोः परस्परापेक्षत्वेनान्योन्याश्रयाद् बोधो न स्यात् । एवं च हल्संज्ञामनुपजीव्यैव हल्सूत्रे लकारस्य केनचित् सूत्रेण इत्संज्ञामबोधयित्वा हलन्त्यमिति हलामित्संज्ञाबोधनं पाणिनेरयुक्तमित्याशङ्कायां हल्संज्ञामनुपजीव्यैव हल्सूत्रे लकारस्य इत्संज्ञां विधातुं हलन्त्यमिति सूत्रं द्विरावृत्त्य प्रथमसूत्रमुपस्थापयति -

इत्संज्ञाविधायकं सूत्रम्-

**हलन्त्यम्** १ । ३ । ३

**हल् इति सूत्रेऽन्त्यमित्स्यात् ।**

(हलन्त्यम्)

हल् इति चतुर्दशसूत्रस्यान्त्यावयवस्य (ल् इत्यस्य) इत्संज्ञा भवति। तथा चानेन लकारस्येत्संज्ञायां हल् पदार्थज्ञानं नापेक्षितमिति नान्योन्याश्रय इत्याऽऽशयः। लकारस्य इत्संज्ञायां किं जातमिति प्रश्ने आह-

प्रत्याहारसंज्ञाविधायकं सूत्रम्-

**आदिरन्त्येन सहेता १।१।७१**

**अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। इति हल्संज्ञायाम्।**

(अन्त्येन, इता, सह, आदिः)

अन्ते भव अन्त्यः, तेन इता सहोच्चार्यमाण आदि वर्णः अण् अच् हल् अलित्यादिरूपः, आदिवर्णस्य मध्यवर्तिवर्णानाञ्च संज्ञा भवति। यस्मात् पूर्वं नास्ति परमस्ति स आदिः, यस्मात् परं नास्ति पूर्वमस्ति सोऽन्तः इति भाष्यादिगादिप्रत्याहाराः कथं स्युः, इकारादीनामादित्वाभावादिति तु न शङ्क्यम्, अत्र समुदायापेक्षयोराद्यन्तयोर्ग्रहणात्। ततश्च 'अइउण्' इति इकारमारभ्य 'ऋलृक्' इति ककारपर्यन्तं वर्णसमुदायं बुद्ध्या परिकल्प्य तदादित्वम् इकारस्य सम्भावनीयम्। एवमन्यत्रापि बोध्यम् तथा अन्त्यत्वमपि कल्पितसमुदायापेक्षमेव न तु सूत्रापेक्षमिति बोध्यम्। हल्प्रत्याहारज्ञाने जाते द्वितीयं सूत्रमुपस्थापयति-

इत्संज्ञाविधायकं सूत्रम्-

**हलन्त्यम् १।३।३**

**उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्। ततः 'अण्' 'अच्' इत्यादिसंज्ञासिद्धौ।**

(उपदेशे, अन्त्यम्, हल्, इत्)

उपदेशेऽन्त्यम् = धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशागमानामन्त्यमित्संज्ञकं भवति। तत्र उपदेशनमुपदेश इति भावघञन्तस्योपदेशशब्दस्याद्योच्चारणमर्थः। तथा च- हलन्त्यमित्यावृत्त-द्वितीयसूत्रेण चतुर्दशसूत्र्याम् अन्त्यणकारादिवर्णानामित्संज्ञा सिद्ध्यतीति 'आदिरन्त्येने'ति सूत्रेणाणादिसंज्ञासिद्धिरित्याशयः। लण्सूत्रेऽकारस्येत्संज्ञा भवतीत्युक्तं तस्येत्संज्ञकं सूत्रमुच्यते-

इत्संज्ञाविधायकं सूत्रम्-

**उपदेशेऽजनुनासिक इत् १।३।२**

**उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा। प्रत्याहारेष्वितां न ग्रहणम्, 'अनुनासिक' इत्यादिनिर्देशात्। न ह्यत्र ककारे परेऽच्कार्यं दृश्यते। "आदिरन्त्येन" इत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते।**

(उपदेशे, अनुनासिकः, अच्, इत्)

उपदेशेऽनुनासिकस्याच इत्संज्ञा भवति। तत्रानुनासिकत्वं मुखसहितनासिकयोच्चारितत्वम् इति वक्ष्यमाणतया 'लण्' सूत्रादौ अकारस्य तथाविधत्वाभावात् कथमित्संज्ञा स्यादित्याशङ्कायामाह- 'प्रतिज्ञानुनासिक्याः' इति। प्रतिज्ञायते

= अभ्युपगम्यते इति प्रतिज्ञा, अनुनासिकस्य भाव आनुनासिक्यम्, प्रतिज्ञा आनुनासिक्यमेषां ते प्रतिज्ञानुनासिक्याः = पाणिनिशिष्याः । शिष्यपरम्परया शास्त्रकृतां तथाविधमुच्चारणमिदानीन्तनानां सुगममित्यर्थः । ततश्च लण्सूत्रे अकारस्यानुनासिकत्वादित्संज्ञा सिद्धा तेन सह आदिरेफः 'र' इत्येवं रूपो रेफलकारयोः संज्ञा भवतीति फलति । ननु 'र' इति रलयोः संज्ञेति न्यूनं टकारस्यापि मध्यगतत्वादित्याशङ्कायामाह- प्रत्याहारेष्वितां न ग्रहणमिति, कुत इदमायातमिति चेद् 'अनुनासिक' इत्यादिनिर्देशात् । यतोऽनुनासिकशब्दे ककारे परे इकारस्य अच्प्रयुक्तं कार्यं यणादेशो न दृश्यते, अत एतल्लब्धमित्याशयः । प्रत्याह्रियन्ते = संक्षिप्यन्ते वर्णा यत्र इति व्युत्पत्त्या अकारादीनामप्यष्टादशानां बोधकत्वात् प्रत्याहारशब्दव्यवहारापत्तिरित्याशङ्कायाम्- आदिरन्त्येनेत्युक्तम् ।

ह्रस्व-दीर्घ-प्लुतसंज्ञाविधायकं सूत्रम्-

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः** १ । २ । २७

**उश्च ऊश्च ऊ३श्च वः । वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादिभेदेन त्रिधा ।**

(ऊकालः, अच्, ह्रस्व-दीर्घ-प्लुतः)

एकमात्रिकस्याचो ह्रस्वसंज्ञा, द्विमात्रिकस्याचो दीर्घसंज्ञा, त्रिमात्रिकस्याचः प्लुतसज्ञा भवति । स ह्रस्वदीर्घप्लुतश्च अच् प्रत्येकमुदात्तत्वेनानुदात्तत्वेन स्वरितत्वेन च त्रिभिः प्रकारैर्वर्त्तते इत्याशयः ।

उदात्तसंज्ञाविधायकं सूत्रम्-

**उच्चैरुदात्तः** १ । २ । २९

**ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । आ ये ।**

(उच्चैः, उदात्तः)

अचामुदात्तसंज्ञकं सूत्रम् । उदाहरणं यथा- 'आ ये मित्रावरुण' इति मन्त्रभागे आकार एकारश्च उदात्तः ।

अनुदात्तसंज्ञाविधायकं सूत्रम्-

**नीचैरनुदात्तः** १ । २ । ३०

**स्पष्टम् । अर्वाङ् ।**

(नीचैः, अनुदात्तः)

ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञको भवति । यथा - 'अर्वाङ् यज्ञस्संक्राम' इति मन्त्रे आद्यः, अकारोऽनुदात्तः ।

स्वरितसंज्ञाविधायकं सूत्रम्-

**समाहारः स्वरितः** १ । २ । ३१

**उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ।**

उदात्तत्वानुदात्तत्वयोर्धर्मयोर्यस्मिन्नचि मेलनं सोऽच् स्वरितसंज्ञको भवति । उदात्तत्वानुदात्तत्वयोरेकस्मिन्नपि मेलने कस्मिन् भागे उदात्तत्वस्य समावेशः, कस्मिन् भागेऽनुदात्तत्वस्येति जिज्ञासायाम्-

**तस्यादित उदात्तमर्धह्रस्वम् १। २। ३२**

**ह्रस्वग्रहणमतन्त्रम् । स्वरितस्यादावर्धमुदात्तं बोध्यम् । उत्तरार्धं तु परिशेषादनुदात्तम् । तस्य चोदात्तस्वरितपरत्त्वे श्रवणं स्पष्टम् । अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा । 'क्व१ वोऽश्वाः', 'रथानां न येऽराः', 'शतचक्रं योऽ३ ह्यः' इत्यादिष्वनुदात्तः, अग्निमीले इत्यादावुदात्तश्रुतिः । स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ।**

(तस्य, आदितः, अर्धम्, उदात्तम्)

अत्र सूत्रे ह्रस्वग्रहणमविवक्षितमित्यर्थः । दीर्घप्लुतस्वरितयोरप्युत्तरभागस्य वेदे अनुदात्तत्वदर्शनात् । तस्य स्वरितस्य, आदितः = प्रथमतः, अर्धमुदात्तं भवतीति सूत्रार्थः । पूर्वभागस्य उदात्तत्वे सति परः शेष उत्तरभागोऽनुदात्तो भवति । ह्रस्वस्वरितस्योदाहरणम् 'क्व वो श्वाः इति । 'येऽरा' इति दीर्घस्वरितोदाहरणम् । शतचक्रं यो ३ ह्यः । इति प्लुतस्वरितोदाहरणम्, पूर्वोक्तेषूदाहरणेषु अनुदात्तभागः स्पष्टं श्रूयते इत्याशयः । 'अग्निमीले' इत्यादौ ईकारः स्वरितः । तदेवमुदात्तह्रस्वः अनुदात्तह्रस्वः स्वरितह्रस्व इति ह्रस्वस्त्रिविधः । एवं दीर्घोऽपि त्रिविधः प्लुतोऽपि तथैवेति एकैकः अच् नवविध इति स्थितम् । उक्तरीत्या नवविधोऽपि सोऽच् अनुनासिकत्वेन अननुनासिकत्वेन च द्विधा = द्वाभ्यां प्रकाराभ्यां वर्तते इत्यर्थः ।

अनुनासिकसंज्ञाविधायकं सूत्रम्-

**मुखनासिकावचनोऽनुनासिकः १। १। ८**

**मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम् अ-इ-उ-ऋ-एषां वर्णानां प्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात् ।**

(मुखनासिकावचनः, अनुनासिकः)

उच्यतेऽसाविति वचनः । मुखसहिता नासिका मुखनासिका, तया वचनः (उच्चारितो वर्णः) अनुनासिकसंज्ञको भवति ।

# विशेषविवरणम्

१. वर्णसमाम्नायस्थवर्णेश्चतुश्चत्वारिंशत् प्रत्याहारा भवन्ति । यथा - पूर्वेण णकारेण एकः प्रत्याहारः - अण् । ककारेण त्रयः - अक्, इक्, उक् । ङकारेण एकः - एङ् । चकारेण चत्वारः अच्, इच्, एच्, ऐच् । टकारेण एकः - अट् । परेण णकारेण त्रयः - अण्, इण्, यण् । मकारेण चत्वारः अम्, यम्, ञम्, ङम् । ञकारेण एकः - यञ् । षकारेण द्वौ - झष्, भष् । शकारेण षट् - अश्, हश्, वश् झश्, जश्, बश् । वकारेण एकः - छव् । यकारेण पञ्च - यय्, मय्, झय्, खय्, चय् । रेफेण पञ्च - यर्, झर्, खर्, चर्, शर् । लकारेण षट् - अल्, हल्, वल्, रल्, झल्, शल् । अकारेण एको रप्रत्याहार इति वर्णसमाम्नायिकाः प्रत्याहाराः । प्रत्याहारसङ्ग्रहकारिका च-

**एकस्मान् ङञणवटा द्वाभ्यां षः त्रिभ्य एव कणमाः स्युः ।**

**ज्ञेयौ चयौ चतुर्भ्यो र पञ्चभ्यः शलौ षड्भ्यः ॥ इति ॥**

२. अक्षिपक्ष्मप्रक्षेपोपलक्षितः कालो निमेषकालः, स एव एकमात्राकालः, स एव द्विगुणितः सन् द्विमात्राकालः त्रिगुणितः सन् त्रिमात्राकालः, क्रमशः एकमात्रिकं कालभागमाश्रित्य उच्चार्यमाणो वर्णो ह्रस्वः द्विमात्रिकं कालभागमाश्रित्य उच्चार्यमाणो वर्णो दीर्घः, एवं त्रिमात्रिकं कालभागमाश्रित्य उच्चार्यमाणो वर्णः प्लुतो भवति, तथोक्तम् –

**अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते ।**

**स एकमात्रो द्विस्तावान् दीर्घस्त्रिः प्लुत उच्यते ॥**

३. **स्वराणां भेददर्शिका तालिका**

| अक्षराणि | अ इ उ ऋ ऌ | आ ई ऊ ॠ ए ओ ऐ औ | अ३ इ३ उ३ ऋ३ ऌ३ ए३ ओ३ ऐ३ औ३ |
|---|---|---|---|
| भेदाः | ह्रस्वोदात्तानुनासिकः | दीर्घोदात्तानुनासिकः | प्लुतोदात्तानुनासिकः |
| | ह्रस्वोदात्ताननुनासिकः | दीर्घोदात्ताननुनासिकः | प्लुतोदात्ताननुनासिकः |
| | ह्रस्वानुदात्तानुनासिकः | दीर्घानुदात्तानुनासिकः | प्लुतानुदात्तानुनासिकः |
| | ह्रस्वानुदात्ताननुनासिकः | दीर्घानुदात्ताननुनासिकः | प्लुतानुदात्ताननुनासिकः |
| | ह्रस्वस्वरितानुनासिकः | दीर्घस्वरितानुनासिकः | प्लुतस्वरितानुनासिकः |
| | ह्रस्वस्वरिताननुनासिकः | दीर्घस्वरिताननुनासिकः | प्लुतस्वरिताननुनासिकः |

# अभ्यासः

१. **अधो लिखितानां प्रश्नानामुत्तराणि दत्त**

(क) माहेश्वरसूत्राणि कति ? कानि च तानि ?

(ख) माहेश्वरसूत्राणां प्रयोजनं किम् ?

(ग) हयवरेत्यादौ पुनः पुनरकारोच्चारणं किमर्थम् ?

(घ) हलन्त्यमिति सूत्रस्यावृत्तेः प्रयोजनं किम् ?

(ङ) अ इ उ वर्णानां कति भेदाः ? के च ते ?

(च) प्रत्याहारनिर्मितिप्रकारः कः ?

(छ) उपदेशपदार्थः कः ?

२. **अधस्तनानां वाक्यानामाशयः प्रकाश्यताम्**

लण् सूत्रेऽकारश्च । स प्रत्येकमुदात्तादिभेदेन त्रिधा । प्रत्याहारेष्वितां न ग्रहणम् अनुनासिक इत्यादि निर्देशात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

३. **'हलन्त्यम्–आदिरन्त्येन' इत्यनयोः परस्परमन्योन्याश्रयः कथं, कथं च तस्य निराकरणमिति दर्शयत ।**

४. **अधस्तनप्रत्याहारेषु के के वर्णा समायान्तीति दर्शयत**

एच्, ङम्, झय्, हश्, यञ्, झव्, छव्, शल् ।

५. **अधोलिखितानां सूत्राणामर्थं नेपालीभाषायां लिखत**

(क) आदिरन्त्येन सहेता (ख) उपदेशेऽजनुनासिक इत्

(ग) ऊकालोऽज्झ्रस्वदीर्घप्लुतः (घ) तस्यादित उदात्तमर्धह्रस्वम्

६. **समीचीनेषु कथनेषु ✓ इति चिह्नं तथा समीचीनेषु × इति चिह्नं दर्शयत ।**

(क) चतुर्दशसूत्राणि महेश्वरप्रसादात् पाणिनिना लब्धानि ।

(ख) अण्प्रत्याहारः पूर्वणकारेण परणकारेण च ग्राह्यः, इण् तु परणकारेणैव ।

(ग) स्वरवर्णानाम् अच्प्रत्याहारे समावेशो भवति ।

(घ) अल्प्रत्याहारे स्वरवर्णानां व्यञ्जनवर्णानाञ्च समावेशो न भवति ।

(ङ) प्रत्याहारेषु इत्संज्ञकानां वर्णानां ग्रहणं भवति ।

(च) उपदेशेऽनुनासिकस्याच इत्संज्ञा भवति ।

(छ) ऋकारस्य लृकारस्य च अष्टादश भेदा भवन्ति ।

## ७. रिक्तस्थानं पूरयत

(क) ह्रस्वदीर्घप्लुतसंज्ञा ......... भवति । (स्वराणाम्, स्वराणां व्यञ्जनानाञ्च)

(ख) 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण ......... इत्संज्ञा भवति । (उपदेशेऽनुनासिकस्याचः, उपदेशेऽन्त्यस्य हलः)

(ग) लृकारस्य ......... भेदा भवन्ति । (अष्टादश, द्वादश)

(घ) हल्प्रत्याहारे ......... वर्णा समायान्ति । (स्वरवर्णाः, व्यञ्जनवर्णाः)

(ङ) ......... इति सूत्रेण उदात्तसंज्ञा भवति । (उच्चैरुदात्तः, तस्यादित उदात्तमर्धह्रस्वम्)

(च) लण्सूत्रे अकारस्य इत्संज्ञा ......... । (भवति, न भवति)

(छ) हश्प्रत्याहारे ... वर्णानां ग्रहणं भवति । (ह्य्व्र्ल्ञ्म्ङ्ण्न्झ्भ्घ्ढ्ध्ज्ब्ग्ड्द्, ह्य्व्र्ल्)

द्वितीयः पाठः

# वर्णोच्चारणस्थानप्रयत्नाः

सवर्णसंज्ञाविधायकं सूत्रम्-

**तुल्यास्यप्रयत्नं सवर्णम् १।१।९**

**ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।**

(तुल्यास्यप्रयत्नम्, सवर्णम्)

अत्र आस्ये = मुखे भवमास्यमिति व्युत्पत्त्या आस्यशब्दस्य ताल्वादिस्थानमित्यर्थः। प्रकृष्टो यत्नः प्रयत्नः, आस्यञ्च प्रयत्नश्च आस्यप्रयत्नौ तुल्यौ आस्यप्रयत्नौ यस्य वर्णसमुदायस्य तत् तुल्यास्यप्रयत्नम्, तदेव परस्परं सवर्णसंज्ञं स्यादिति सूत्रस्याऽऽशयः। कस्य किं स्थानमिति जिज्ञासायामाह-

**अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इति स्थानानि।**

अ इति पूर्वोक्तानां ह्रस्वदीर्घादीनामष्टादशभेदानां ग्रहणम्, कु इति कवर्गः = क्ख्ग्घ्ङ्रूपः, हः = हकारः, विसर्जनीयः = विसर्गः। तेषामुच्चारणस्थानं कण्ठ इत्यर्थः। इकारस्याष्टादशभेदाः, चु इति चवर्गः, यकारशकारयोश्च उच्चारणस्थानं तालु। एवं क्रमेण सर्वत्रैव बोध्यम्। एदैतोरित्यत्र तपरकरणमसन्देहार्थं न तु तत्कालमात्रग्रहणार्थम्, तेन प्लुतयोरपि ग्रहणं बोध्यम्। वर्णानां स्थानानि निर्दिश्य प्रयत्नं निर्दिशति-

**यत्नो द्विधा – आभ्यन्तरो बाह्यश्च। आद्यश्चतुर्धा – स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणां स्वराणाञ्च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु विवृतमेव। एतच्च सूत्रकारेण ज्ञापितम्, तथा हि –**

संवृताकारविधायकं निधि सूत्रम्-

**अ अ ८।४।६८**

**विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव।**

यत्नानामाभ्यन्तरत्वं बाह्यत्वं च वर्णोत्पत्तेः प्रागूर्ध्वभावित्वमिति पाणिन्यादिशिक्षासु स्पष्टम्। आद्यः = आभ्यन्तरयत्नः, चतुर्धा = चतुर्विधः। स्पृष्टः, ईषत्स्पृष्टः, विवृतः, संवृतश्च। प्रयतनं प्रयत्नः स्पर्शादीनामग्रे व्याख्या भविष्यति। ह्रस्वस्यावर्णस्य प्रयोगे = शास्त्रीयप्रक्रियाभिः परिनिष्ठितानां रामः, कृष्णः,

शिव इत्यादिशब्दानामुच्चारणे संवृतं भवति, ह्रस्वाकारस्य दीर्घाकारस्य च प्रयत्नभेदेन 'दण्ड + आढकम्' इत्यत्र सवर्णदीर्घो न स्यादिति जिज्ञासायामुच्यते- प्रक्रियादशायाम् = शास्त्रीयकार्य प्रवृत्तिवेलायां तु विवृतप्रयत्नमेवेति । अत्र प्रमाणञ्च 'अ अ' इति सूत्रमेव । तथा हि - शिक्षावचनसिद्धः स्वाभाविकः संवृतः अकारश्चतुर्दशसूत्र्यां विवृतत्वेनोपदिष्टस्तस्य अवर्णस्य संवृतः अवर्णो भवतीति सूत्रार्थः । अस्य सूत्रस्य सम्पूर्णामष्टाध्यायीं प्रति असिद्धत्वात् प्रक्रियादशायाम् अकारस्य विवृतत्वमेवेति । अस्यासिद्धत्वबोधकं सूत्रं च -

अधिकारसूत्रम्-

**पूर्वत्रासिद्धम् ८ । २ । १**

**अधिकारोऽयम् । सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् ।**

(पूर्वत्र (कर्तव्ये), असिद्धम्)

पाणिनिप्रणितायामष्टाध्याय्यां अष्टमाध्यायस्य द्वितीयपादस्येदमादिमं सूत्रम् । इतः प्राक्तनं कृत्स्नं सूत्रजालं तदुपरितनं कृत्नसूत्रजालं प्रत्यसिद्धं भवति, त्रिपाद्यामपि पूर्वपूर्वसूत्राणि प्रति परपरसूत्राण्यसिद्धानि भवन्ति । ननु षड्विधेषु सूत्रेषु पूर्वत्रासिद्धमिति किं सूत्रम् ? असिद्धत्वविधायकत्वेनेदं विधिसूत्रमेव कथन्न स्यादिति चेन्न, अस्य स्वतन्त्रविधित्वे सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्येवार्थः स्यात्, त्रिपाद्यामपि पूर्वं प्रतीत्याद्यर्थो न स्यादत आह अधिकारोऽयमिति । अधिक्रियते = आगामिसूत्रसमूहशेषत्वेन पठ्यते इत्यधिकारः तेन त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यर्थः । परं शास्त्रमसिद्धं स्यादिति कथनेन शास्त्रासिद्धत्वपक्ष एव दीक्षितसम्मत इति प्रतीयते ।

**बाह्यप्रयत्नस्त्वेकादशधा- विवारः, संवारः, श्वासो, नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति ।**

**खयां यमाः खय≍क≍पौ विसर्गः शर एव च ।**

**एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥**

**कण्ठमन्ये तु घोषाःस्युः संवृता नादभागिनः ।**

**अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः ॥**

**वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः । पलिक्क्नी, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः । तत्र वर्गाणां प्रथमद्वितीयाः खयः, तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ, विसर्गः, शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च । अन्येषां तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः, अन्ये महाप्राणा इत्यर्थः । बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ताः, तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम् । कादयो मावसानाः स्पर्शाः, यरलवा अन्तःस्थाः, शषसहा ऊष्माणः अचः स्वराः । ≍क≍प इति इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ । अं अः इत्यचः परावनुस्वारविसर्गौ । इति स्थानप्रयत्नविवेकः ।**

कस्य वर्णस्य को बाह्यप्रयत्न इति जिज्ञासायां द्वाभ्यां श्लोकाभ्यां तत्सङ्ग्रहः - खयां यमा इत्यादि । यमः = कचटतपवर्गेषु एकैकस्य वर्गस्य आद्यानां चतुर्णां मध्ये एकैकस्माद् वर्णात् पञ्चमे वर्णे ङञणनमेष्वेकतमे परे मध्ये यः पूर्ववर्णसदृशो भवति सो यम इति प्रातिशाख्ये प्रसिद्धः । तथा च खय् प्रत्याहारस्थवर्णानां यमाः, खय्प्रत्याहारस्थवर्णाः जिह्वामूलीयोपध्मानीयौ, विसर्गः, शर्प्रत्याहारस्थवर्णाश्च, एते श्वासानुप्रदानाः = (श्वासः अनुप्रदानं येषां ते) श्वासाख्यबाह्यप्रयत्नवन्तः, अघोषाख्यबाह्यप्रयत्नवन्तः, विवृण्वते कण्ठम् = विवाराख्यबाह्यप्रयत्नवन्तो भवन्ति । अन्ये तु ये सन्ति तेषां संवारो नादो घोषो बाह्यप्रयत्नः । अयुग्मवर्गगाः = प्रथमतृतीयपञ्चमाः, अयुग्मयमगाः = प्रथमतृतीययमौ, यणः = यरलवाश्च, अल्पप्राणप्रयत्नवन्तः, अन्ये महाप्राण-प्रयत्नवन्तो भवन्तीति भावः ।

यद्यपि सवर्णसंज्ञायां बाह्यप्रयत्नानामुपयोगो न भवति, तथापि "स्थानेऽन्तरतमः" इति वक्ष्यमाणसादृश्यविचारे तेषामुपयोग इति बोध्यम् । पूर्वोक्तस्पर्शादिशब्दानामर्थनिर्वचनम् - कादयो मावसाना इति । क आदिः येषां ते कादयः, मः अवसाने येषां ते मावसानाः । इयमुक्तिर्लोक- प्रसिद्धवर्णमालानुसारिका ज्ञेया । 'क' इत्यारभ्य मपर्यन्ता वर्णाः स्पर्शसंज्ञका इत्यर्थः । यरलवाः अन्तःस्थसंज्ञकाः, शषसहा ऊष्मसंज्ञकाः, अच्प्रत्याहारस्था वर्णाः स्वरसंज्ञकाः सन्ति । '≍क≍प' इति कपाभ्यां प्राक्स्थितावर्धविसर्गसदृशौ स्तः, तयोःककारात्पूर्वं जिह्वामूलीय इति, पकारात् पूर्वमुपध्मानीय इति संज्ञा बोध्या ।

## विशेषविवरणम्

१. "तुल्यास्यप्रयत्नं सवर्णम्" इति सूत्रघटकस्य आस्यशब्दस्य 'आस्ये भवम्' इति व्युत्पत्त्या ताल्वादिस्थानमर्थः । प्रयत्नशब्दस्य च प्रकृष्टो यत्नः प्रयत्नः, आभ्यन्तरप्रयत्न इत्यर्थः । तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् ।

२. "अ अ" इति सूत्रेण विवृतस्य अकारस्य संवृतत्वं विधीयते । इदं सूत्रञ्च अष्टाध्याय्या अन्तिमं सूत्रम्, तथा च- "पूर्वत्रासिद्धम्" इति सूत्रेण सपादसप्ताध्यायीं प्रति त्रिपादीत्वेन, त्रिपाद्यामपि सर्वेषां सूत्राणां पूर्वत्रिपादीत्वेन "अ अ" इत्यस्य च परत्रिपादीत्वेनासिद्धत्वं भवतीति ह्रस्वाकारस्य प्रक्रियादशायां विवृतत्वं बोध्यम् ।

## वर्णानामाभ्यन्तरप्रयत्नबोधिका सारिणी

| स्पृष्टम् | | | | | ईषत्स्पृष्टम् | विवृतम् | संवृतम् |
|---|---|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | य | अ इ उ ऋ ऌ ए ओ ऐ औ | ह्रस्वस्य |
| च | छ | ज | झ | ञ | व | श ष स ह | 'अ'कारस्य |
| ट | ठ | ड | ढ | ण | र | | प्रयोगे |
| त | थ | द | ध | न | ल | | |
| प | फ | ब | भ | म | | | |

## बाह्यप्रयत्नबोधिका सारिणी

| विवारः, श्वासः, अघोषः | संवारः, नादः, घोषः | अल्पप्राणः | महाप्राणः | उदात्तः, अनुदात्तः, स्वरितः |
|---|---|---|---|---|
| क ख श | ग घ ङ य | क ग ङ य | ख घ श | अ ए |
| च छ ष | ज झ ञ व | च ज ञ व | छ झ ष | इ ओ |
| ट ठ स | ड ढ ण र | ट ड ण र | ठ ढ स | उ ऐ |
| त थ | द ध न ल | त द न ल | थ ध ह | ऋ औ |
| प फ | ब भ म | प ब म | फ भ | ऌ |

# अभ्यासः

**१. अधो लिखितानां प्रश्नानामुत्तराणि दत्त**

(क) सवर्णसंज्ञकं सूत्रमुपस्थाप्य तस्यार्थमपि निर्दिशत ।

(ख) "अ अ" इति सूत्रं किं करोति ?

(ग) पूर्वत्रासिद्धमिति सूत्रेण किं बोध्यते ?

(घ) आभ्यन्तरप्रयत्नाः कति ? के च ते ?

(ङ) बाह्यप्रयत्नानां सङ्ख्या कति ? के च ते ?

(च) स्पर्शसंज्ञकेषु के वर्णा आयान्ति ?

**२. अधस्तनवाक्यानामाशयं प्रकाशयत**

(क) उपूपध्मानीयानामोष्ठौ ।

(ख) ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् ।

(ग) वर्गाणां प्रथमतृतीयपञ्चमाः, प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः ।

(घ) यरलवा अन्तःस्थाः ।

**३. ह्रस्वस्य अकारस्य संवृतत्वे दीर्घस्य आकारस्य विवृतत्वे 'दण्ड + आढकम्' इत्यादौ कथं सवर्णदीर्घः ?**

**४. अधस्तनवर्णानामुच्चारणस्थानं निर्दिशत**

ह, इ, ख, ठ, थ, म, व

**५. अधस्तनवर्णानामाभ्यन्तरप्रयत्नं लिखत**

अ, ग, छ, त, ष, व

**६. स्वराणां बाह्यप्रयत्नं निर्दिशत ।**

**७. समीचीनेषु कथनेषु ✓ इति चिह्नं तथाऽसमीचीनेषु कथनेषु ✗ इति चिह्नं दर्शयत**

(क) हकारस्य कण्ठस्थानम् ।

(ख) चवर्गस्य तवर्गस्य च स्थानं तुल्यमेव भवति ।

(ग) अनुस्वारस्य तालुस्थानं भवति ।

(घ) शषसहा ऊष्मसंज्ञकाः ।

(ङ) ह्रस्वस्याकारस्य प्रयोगे संवृतप्रयत्नो भवति ।

## ८. कोष्ठस्थोपयुक्तपदैः रिक्तस्थानं पूरयत

(क) विसर्गस्योच्चारणस्थानम् ... अस्ति । (कण्ठः, मूर्धा)

(ख) 'ए ऐ' इत्यनयोरुच्चारणस्थानम् ... अस्ति । (कण्ठः, कण्ठतालु)

(ग) 'क' इत्यारभ्य मपर्यन्तानां वर्णानां ... -संज्ञा भवति । (स्पर्श, अन्तःस्थ)

(घ) शल्प्रत्याहारस्थवर्णानामाभ्यन्तरप्रयत्नः ... अस्ति । (विवृतः, स्पृष्टः)

(ङ) वर्गाणां द्वितीयचतुर्थवर्णानां ... प्रयत्नः । (महाप्राणः, अल्पप्राणः)

(च) बाह्यप्रयत्नानामुपयोगः ... भवति । (सादृश्यपरीक्षायाम्, सवर्णसंज्ञायाम्)

(छ) वर्णोच्चारणस्थानस्याभ्यन्तरप्रयत्नस्य च तुल्यत्वे सवर्णसंज्ञा ... । (भवति, न भवति)

# सवर्णग्रहणम्, तदपवादश्च

सवर्णसंज्ञाविधायकं वार्त्तिकम्-

**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्** (वा.)

ऋलृवर्णयोः प्रयत्नसाम्येऽपि स्थानभेदात् सवर्णसंज्ञायामप्राप्तायाम् ऋलृवर्णयोः सावर्ण्यार्थमिदं वार्तिकम्। आ च आ च रलौ (ऋशब्दस्य लृशब्दस्य च प्रथमाया एकवचने 'आ' इति रूपम्) रलौ च तौ वर्णौ ऋलृवर्णौ तयोः परस्परं सवर्णसंज्ञा वक्तव्येति वार्तिकार्थः। एवञ्च-अकारहकारयोः, इकारशकारयोः, ऋकारषकारयोः, लृकारसकारयोश्च परस्परं सवर्णसंज्ञायां प्राप्तायां तन्निषेधार्थं सूत्रं पठति।

सवर्णसंज्ञानिषेधकं सूत्रम्-

**नाज्झलौ १।१।१०**

**आकारसहितोऽच् आच् स च हल् चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न। अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात्।**

(न, आज्झलौ सवर्णम्)

आसहितोऽच् आच्, समासे कृते शाकपार्थिवात्वात् सहितपदलोपः। आच्च हल् च आज्झलौ, तौ परस्परं सवर्णौ न भवत इति सूत्रस्याशयः। एवं च- दधि + हरति, दधि + षष्ठम्, दधि + सान्द्रम् इत्यादौ "इको यणचि" इति यणादेशः, दधि + शीतलम् इत्यत्र "अकः सवर्णे दीर्घः" इति दीर्घश्च न भवति। ननु अकारहकारयोः, इकारशकारयोः, ऋकारषकारयोः, लृकारसकारयोश्च सवर्णसंज्ञायां सत्यामपि दधि हरतीत्यादौ अच्परकत्वाभावाद् यणादिकं न प्राप्नोतीत्याशङ्कायामाह- अन्यथा इति। अस्यायम्भावो यत्- "इको यणचि" इत्यादौ अच्पदेन चतुर्दशसूत्रेष्वपठितानां दीर्घाकारादीनामपि ग्रहणं यथा भवति, तथैवात्रापि अकारहकारयोः सवर्णसंज्ञायां ग्रहणकशास्त्रेण = "अणुदित्" सूत्रेण हकारस्यापि अच्त्वेन ग्रहणं स्यात्। तच्च ग्रहणकशास्त्रं किमिति जिज्ञासायामुच्यते-

सवर्णग्राहकं अणुदित्संज्ञाविधायकं सूत्रम्-

**अणुदित्सवर्णस्य चाप्रत्ययः १।१।६९**

**प्रतीयते विधीयत इति प्रत्ययः, अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्।**

**अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम् 'अ' इत्यष्टादशानां संज्ञा तथेकारोकारौ।**

**ऋकारस्त्रिंशतः । एवम् लृकारोऽपि । एचो द्वादशानाम् । एदैतोरोदौतोश्च न मिथः सावर्ण्यम् 'ऐ औच्' इति सूत्रारम्भसामर्थ्यात् । तेनैचश्चतुर्विंशतेः संज्ञा स्युरिति नापादनीयम् ।**

(अप्रत्ययः, अण्, उदित्, च, सवर्णस्य (संज्ञा))

'प्रतीयते' इत्यस्यार्थः 'विधीयते' इति, सूत्रेण यस्य विधानं भवति स 'प्रत्ययः' इत्यभिप्रायः । तथा च- अप्रत्यय इत्यस्य अविधीयमान इत्यर्थः । उत् = ह्रस्वोकारः, स इत् = इत्संज्ञको यस्य स उदित् । तथा च- अविधीयमानोऽण् उदिच्च सवर्णानां बोधको भवतीति सूत्रार्थः ।

अत्र सूत्रे 'अण्' प्रत्याहारः परणकारेण = 'लण्' सूत्रस्थणकारेण गृह्यते, व्याख्यानात् । अन्यत्र तु पूर्वेणैवेति बोध्यम् । तद् एवम् = वक्ष्यमाणप्रकारेण, 'अ' इति अविधीयमानानाम् अष्टादशानाम् = ह्रस्वदीर्घप्लुतादीनां संज्ञा = बोधकं भवति । तथैव इवर्णः, उवर्णश्च । ऋलृवर्णयोः परस्परं सवर्णत्वाद् ऋकारेण स्वकीयाष्टादशभेदानाम्, लृकारस्य द्वादश-भेदानाञ्च ग्रहणात् त्रिंशतो बोधो भवति । लृकारेणापि तथैव । एचां हस्वाभावाद् 'ए ओ ऐ औ' इत्येतेषां प्रत्येकं द्वादश भेदाः । अत्र एकारैकारयोः, ओकारौकारयोश्च स्थानप्रयत्नसाम्यात् सवर्णसंज्ञायां ग्रहणकशास्त्रेण च सावर्ण्यग्रहणाद् एचश्चतुर्विंशतेः संज्ञेति कथं नोक्तमिति तु न शङ्क्यम्, 'ऐ औच्' इति सूत्रारम्भसामर्थ्यात् तयोः परस्परं सावर्ण्यं न भवतीति बोधनात् । यदि च एकारैकारयोः, ओकारौकारयोः परस्परं सावर्ण्यं स्यात्तर्हि एकारेण ऐकारभेदानाम्, ओकारेण औकारभेदानाञ्च अकारादिभिर्दीर्घप्लुतानामिव ग्रहणसम्भवाद् 'ऐ औच्' इति सूत्रं नारम्भणीयं स्यादित्याऽऽशयः ।

**"नाज्झलौ' इति सावर्ण्यनिषेधो यद्यप्याक्षरसमाम्नायिकानामेव, तथापि हकारस्याऽऽकारो न सवर्णः, तत्राकारस्य प्रश्लिष्टत्वात् । तेन 'विश्वपाभिः' इत्यत्र 'हो ढः' इति ढत्वं न भवति । अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेनानुनासिकास्ते द्वयोर्द्वयोः संज्ञाः ।**

यद्यपि 'नाज्झलौ' इति सूत्रेण सवर्णसंज्ञानिषेध आक्षरसमाम्नायिकानाम् = चतुर्दशसूत्रस्थवर्णानामेव, तथापि हकारस्य आकारस्य च मिथः सवर्णसंज्ञा न भवति 'नाज्झलौ' इति सूत्रे आकारस्यापि प्रश्लेषात् । इदमत्र बोध्यम्- "प्रकल्प्यचापवादविषयमुत्सर्गोऽभिनिविशते" इत्युक्तत्वाद् "नाज्झलौ" इति निषेधं परिकल्प्य सवर्णसंज्ञासूत्रं प्रवर्त्तते, नाज्झलाविति प्रवृत्तिदशायाम् "अणुदित्' इति सूत्रार्थबोधासम्भवेन "अणुदित्" इति सूत्रार्थबोधात् प्राक् चतुर्दशसूत्रस्थवर्णानामेव अज्झलपदवाच्यत्वात्, नाज्झलावित्यत्र आकारप्रश्लेषे प्रमाणाभावाच्च आकारहकारयोः सवर्णसंज्ञा प्राप्नोति । उक्तञ्च भाष्ये - "वर्णानामुपदेशस्तावत्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञोत्तरकालः आदिरन्त्येनेति प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसंज्ञा, तदुत्तरकालमणुदित्सूत्रम्, इत्येतेन समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति"। अन्यत्र इति कथनेन "अस्य च्वौ" इत्यादौ सवर्णग्रहणं बोध्यम् । अत्र प्रत्याहारोत्तरकाला सवर्णसंज्ञा इति कथनेन "नाज्झलौ" इति निषेधसहिता सा विवक्षिता केवलायाः सवर्णसंज्ञायाः प्रत्याहारानपेक्षत्वात् । एवञ्च आकारहकारयोः सवर्णसंज्ञायां प्राप्तायामपि तन्न भवति, नाज्झलावित्यत्र आकारस्यापि प्रश्लेषात् । आकारप्रश्लेषे प्रमाणन्तु "कालसमयवेलासु -" इति सूत्रे वेलास्विति लकाराद् आकारनिर्देश एव । अन्यथा ढत्वस्य संयोगान्तलोपस्य वाऽऽपत्तौ तत्राकारो न श्रूयेत । तेन विज्ञायते आकारहकारयोर्मिथः सवर्णसंज्ञा न भवतीति । एवञ्च विश्वपाभिरित्यत्रापि 'हो ढः' इति आकारस्य ढत्वं न भवतीति बोध्यम् । अत्र सूत्रे अण्ग्रहणं किमर्थम् ? हयवरलानां सावर्ण्याभावाद् अज्ग्रहणेनापि निर्वाहः

स्यादिति चेन्मैवम्, अनुनासिकाननुनासिकभेदेन यवला द्विधा भवन्ति, तेन अननुनासिका यवला द्वयोः = अनुनासिकाननुनासिकभेदयोः संज्ञाः = बोधकाः स्युरिति सूत्रे अण्ग्रहणमावश्यकम् ।

## विशेषविवरणम्

१. वार्तिकलक्षणम्- उक्तानुक्तदुरुक्तचिन्तनात्मकं वार्तिकम् ।

उक्तञ्च -

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।**

**तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः ॥ इति ॥**

२. ग्रहणकशास्त्रम्- गृह्णन्ति स्वसवर्णान् अकारादयो वर्णा येन तद् ग्रहणकम्, करणे ल्युट् प्रत्ययः स्वार्थे क प्रत्ययश्च, ग्रहणकञ्च तच्छास्त्रं ग्रहणकशास्त्रम् ।

३. 'अविधीयमानोऽण् सवर्णान् गृह्णाति' इति कथनेन विधीयमानोऽण् सवर्णान् न गृह्णातीति सिद्ध्यति । तेन 'इदम इश्' इति सूत्रेण त्रिमात्रिक ईकारो न भवति । 'उदित्' इत्यत्र अविधीयमान इति न सम्बध्यते, उदित्करणसामर्थ्यात् । तथा च विधीयमानोऽप्युदित् सवर्णान् गृह्णाति, तेन 'कुहोश्चुः' इति कवर्गस्य चवर्गादेशः सिद्ध्यति ।

## अभ्यासः

### १. अधस्तनानां प्रश्नानामुत्तराणि दत्त

(क) "ॠऌवर्णयोर्मिथः" इत्यादिवार्तिकस्य किं प्रयोजनम् ?

(ख) 'दधि + हरति' "दधि + शीतलम्" इत्यादौ यणादिकार्यं कथं वारणीयम् ?

(ग) उदितः के सन्ति, तैः कस्य-कस्य बोधो भवति ?

(घ) एचश्चतुर्विंशतेः संज्ञा इति कथं नोक्तम् ?

(ङ) "विश्वपाभिः" इत्यत्र केन सूत्रेण कस्य ढत्वं प्राप्नोति ?

(च) यवलाः कथं द्विधा भवन्ति ?

(छ) अणुदित्सूत्रस्य कार्यं किम् ?

### २. अधो निर्दिष्टानां वाक्यानामभिप्रायः प्रदर्शनीयः

अत्रैवाण् परेण णकारेण । तदेवम् 'अ' इत्यष्टादशानां संज्ञा ।

एदैतोरोदौतोश्च न मिथः सावर्ण्यम्, 'ऐऔच्' इति सूत्रारम्भसामर्थ्यात् । अनुनासिकाननुनासिकभेदेन यवला द्विधा, तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा ।

३. **"नाज्झलौ" इति सूत्रेण कस्य कस्य सवर्णसंज्ञा निषेधः ?**

४. **"अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रार्थं संस्कृतभाषायां नेपालीभाषायां च लिखत ।**

५. **'विश्वपाभिः' इत्यत्र प्राप्तं ढत्वं वारयत ।**

६. **सम्मतकथनेषु ✓ इति चिह्नमसम्मतकथनेषु च × इति चिह्नं दर्शयत**

(क) "ऋलृवर्णयोः" इत्यादिवार्तिकेन रलयोः सवर्णसंज्ञा भवति ।

(ख) "नाज्झलौ" इति सावर्ण्यनिषेधाभावे 'दधि + हरति' इत्यत्र सवर्णदीर्घः प्राप्तः ।

(ग) ग्रहणकशास्त्रं 'नाज्झलौ' इति सूत्रम् ।

(घ) अणुदित्सूत्रेण ऋकारः त्रिंशद्भेदानां बोधको भवति ।

(ङ) लृकारस्य अष्टादशभेदाः सन्ति ।

(च) एकार-ऐकारयोः ओकार-औकारयोः मिथः सवर्णसंज्ञा भवति ।

(छ) अननुनासिका यवलाः स्वसवर्णान् बोधयन्ति ।

७. **कोष्ठस्थोपयुक्तैः पदैः रिक्तस्थानं पूरयत**

(क) विधीयमानोऽण् स्वसवर्णान् ... । (गृह्णाति, न गृह्णाति)

(ख) अणुदित्सूत्रे अण्प्रत्याहारः ... भवति । (पूर्वणकारेण, परणकारेण)

(ग) अकार-आकारयोः सवर्णसंज्ञा ... । (भवति, न भवति)

(घ) आकार-हकारयोः सवर्णसंज्ञा ... । (भवति, न भवति)

(ङ) एचाम् ... द्वादशभेदा भवन्ति । (दीर्घाभावात्, ह्रस्वाभावात्)

(च) "अणुदित्"सूत्रे अण्ग्रहणम् ... अस्ति । (आवश्यकम्, अनावश्यकम्)

चतुर्थः पाठः

# पारिभाषिक्यः संज्ञाः

तपरसंज्ञाविधायकं सूत्रम्-

**तपरस्तत्कालस्य १।१।७०**

**तः परो यस्मात् स तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात् । तेन 'अत्' 'इत्' इत्यादयः षण्णां षण्णां संज्ञाः । 'ऋत्' इति द्वादशानाम् ।**

(तपरः, अण्, तत्कालस्य सवर्णस्य)

"अणुदित्" इति सूत्रेण 'अत्' 'इत्' 'उत्' इति तपराणामपि स्वसवर्णग्राहकत्वे प्राप्ते सूत्रमिदमारभ्यते- तपरस्तत्कालस्येति । सूत्रस्थतपरशब्द आवर्तते, तत्र प्रथमतपरशब्दे 'तः परो यस्माद्' इति बहुव्रीहिः, द्वितीये 'तात् परः तपरः' इति पञ्चमीतत्पुरुषः, "अणुदित्" सूत्राद् 'अण्' इत्यनुवर्तते । तथा च- 'अत्' 'इत्' 'उत्' इत्याद्यात्मकः तपरत्वेन उच्चार्यमाणः 'अण्' स्वीयोच्चारणकालसदृशकालस्य बोधकः स्यादिति सूत्रार्थः ।

वृद्धिसंज्ञाविधायकं सूत्रम्-

**वृद्धिरादैच् १।१।१**

**आदैच्च वृद्धिसंज्ञः स्यात् ।**

(आत्-ऐच्, वृद्धिः)

आत् च ऐच् च आदैच् समाहारद्वन्द्वः, सूत्रत्वात् कुत्वादिकं न "सूत्राणि छन्दोवद् भवन्ति छन्दसि दृष्टानुविधिः" इति वचनात् । तेन द्विमात्रिकस्याकारस्य ऐकारौकारयोश्च द्विमात्रिकयोरेव वृद्धिसंज्ञा भवति ।

गुणसंज्ञाविधायकं सूत्रम्-

**अदेङ् गुणः १।१।२**

**अदेङ् च गुणसंज्ञः स्यात् ।**

(अत्-एङ्, गुणः)

अच्च एङ् चेति समाहारद्वन्द्वः । तथा च- अकारस्य, एकार-ओकारयोश्च गुणसंज्ञा भवतीति सूत्रार्थः ।

धातुसंज्ञाविधायकं सूत्रम्-

**भूवादयो धातवः १। ३। १**
**क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।**

(भूवादयः, धातवः)

भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी, भूवौ आदी येषां ते भूवादयः। अत्र प्रथम आदिशब्दः प्रभृतिवचनः, द्वितीयः प्रकारवचनः। तथा च- भूप्रभृतयो वा सदृशाश्च ये सन्ति ते धातुसंज्ञका भवन्ति। वा सादृश्यञ्च क्रियावाचकत्वेन रूपेण बोध्यम्।

अधिकारसूत्रम्-

**प्राग्रीश्वरान्निपाताः १। ४। ५६**
**इत्यधिकृत्य।**

(रीश्वरात्, प्राग्, निपाताः)

इदमधिकारसूत्रम्। अत्र रीश्वर-शब्दः "अधिरीश्वरे" इति सूत्रैकदेशस्य अनुकरणम्। अत एव इतः प्रभृति 'अधिरीश्वरे' इति रीश्वरशब्दात् प्राक् निपातपदमनुवर्तते इत्यर्थो बोध्यः।

निपातसंज्ञाविधायकं सूत्रम्-

**चादयोऽसत्त्वे १। ४। ५७**

**अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः।**

(असत्त्वे, चादयः, निपाताः)

च आदिः येषां ते चादयः, सत्त्वशब्देन द्रव्यमुच्यते, न सत्त्वम् असत्त्वम् = अद्रव्यम्, पूर्वसूत्राद् 'निपाताः' इत्यनुवर्तते। एवं च- अद्रव्यवाचकानां चादिगणपठितानां शब्दानां निपातसंज्ञा भवतीति सूत्रार्थः।

निपातसंज्ञाविधायकं सूत्रम्-

**प्रादयः १। ४। ५८**

**अद्रव्यार्थाः प्रादयस्तथा।**

(असत्त्वे, प्रादयः, निपातम्)

अद्रव्यवाचकाः प्रादयो निपातसंज्ञका भवन्ति।

उपसर्गसंज्ञाविधायकं सूत्रम्-

**उपसर्गाः क्रियायोगे १। ४। ५९**
(प्रादयः, क्रियायोगे, उपसर्गाः)

गतिसंज्ञाविधायकं सूत्रम्-

**गतिश्च** १ । ४ । ६०

**प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः ।**

(प्रादयः, क्रियायोगे, गतिः, च)

"उपसर्गाः क्रियायोगे" इत्यत्र "गतिश्च" इत्यत्र च 'प्रादयः' इति 'निपाताः' इति च उभयमनुवर्तते । तेन प्रादयः निपातसंज्ञकाः सन्तः क्रियया अन्वये सति उपसर्गसंज्ञकाः, गतिसंज्ञकाश्च भवन्तीत्यर्थः ।

विभाषासंज्ञाविधायकं सूत्रम्-

**न वेति विभाषा** १ । १ । ४४

**निषेधविकल्पयोर्विभाषासंज्ञा स्यात् ।**

(न, वा, इति, विभाषा)

अन्यत्र विभाषाशब्दः केवलविकल्पे दृष्टः, अत्र शास्त्रे तु निषेधो विकल्पश्चेति द्वयं विभाषाशब्दार्थ इति बोधयितुं सूत्रमिदम् । अत एव- 'न' इति शब्दबोध्यस्य निषेधरूपार्थस्य 'वा' इति शब्दबोध्यस्य विकल्पार्थस्य विभाषासंज्ञा भवति ।

शब्दसंज्ञाविधायकं सूत्रम्-

**स्वं रूपं शब्दस्याशब्दसंज्ञा** १ । १ । ६८

**शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना ।**

(शब्दस्य, स्वम्, रूपम् (संज्ञी), अशब्दसंज्ञा)

व्याकरणशास्त्रे शब्दः अर्थविशिष्टस्य शब्दस्य बोधको भवति अर्थे कार्यस्य बाधात्, "अग्नेर्ढक्" इत्यादिना अग्निशब्दादेव ढक्प्रत्यये 'आग्नेयम्' इत्यादि सिद्ध्यति । शब्दशास्त्रे = व्याकरणशास्त्रे या गुणवृद्ध्यादिसंज्ञा उक्ताः तां विना । तस्मात् - शब्दशास्त्रीयसंज्ञां विहाय सर्वत्र सूत्रेषूच्चारितशब्दरूपस्यैव बोधो भवति न तु पर्यायाणाम्, नैव चार्थे कार्यमित्यादि बोध्यम् ।

विशेषणसंज्ञाविधायकं सूत्रम्-

**येन विधिस्तदन्तस्य** १ । १ । ७२

**विशेषणं तदन्तस्य संज्ञा स्यात्, स्वस्य च रूपस्य ।**

(येन, विधिः, तदन्तस्य)

यत् शब्दस्वरूपमुपादाय यो विधिरारभ्यते, स तस्य तदन्तस्य च भवतीति बोध्यते येन विधिरिति सूत्रेण । "स्वं रूपम्-" इत्यतः स्वमित्यनुवर्त्य षष्ठ्यन्ततया विपरिणामेन स्वस्य च रूपस्येत्यर्थलाभ इति, एवञ्च अभेदेन विशेषणसमर्पकः शब्दः तदन्तस्य स्वस्य च बोधको भवतीति सूत्राशयः ।

**समासप्रत्ययविधौ प्रतिषेधः (वा.)**

समासविधौ प्रत्ययविधौ च तदन्तविधेः प्रतिषेधो वक्तव्यः ।

**उगिद्वर्णग्रहणवर्जम् (वा.)**

उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा "समासप्रत्ययविधौ" इत्युक्तः प्रतिषेधो भवति ।

अवसानसंज्ञाविधायकं सूत्रम्-

**विरामोऽवसानम् १ । ४ । ११०**

**वर्णानामभावोऽवसानसंज्ञः स्यात् ।**

(विरामः, अवसानम्)

अत्र 'विरम्यतेऽस्मिन्' इति विरामः, सामीपिकेऽधिकरणे घञ्प्रत्यय इत्येकः पक्षः । पक्षेऽस्मिन्- यस्मिन्नुच्चारिते सति वर्णान्तराणामुच्चारणाभावः सोऽन्त्यवर्णोऽवसानसंज्ञको भवतीति सूत्रार्थः । विरमणं विरामः = वर्णानामुच्चारणाभावः, भावे घञ् इत्यपरः पक्षः । अत्र पक्षे किञ्चिद् वर्णोच्चारणोत्तरं वर्णान्तराणामुच्चारणाभावोऽवसानमित्यर्थः । तत्र प्रथमपक्षे "खरवसानयोः-" इति अवसाने रेफे स्थानिनि विसर्गः, द्वितीयपक्षे च वर्णाभावस्यापि बुद्धिकृतं परत्वं बोध्यम् ।

संहितासंज्ञाविधायकं सूत्रम्-

**परः सन्निकर्षः संहिता १ । ४ । १०९**

**वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।**

परः = अतिशयितः, सन्निकर्षः = सामीप्यम्, अर्धमात्राधिककालव्यवधानाभावो यत्र तस्य संहितासंज्ञा भवति ।

पदसंज्ञाविधायकं सूत्रम्-

**सुप्तिङन्तं पदम् १ । ४ । १४**

**सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।**

'सुप्' इति "स्वौजसमौड्" इति सूत्रे सु इत्यारभ्य सुपः पकारेण प्रत्याहारः, न तु सप्तमीबहुवचनस्यैवात्र ग्रहणम्, व्याख्यानात् । एवमेव 'तिङ्' इति तिबादिमहिङ्ङान्तानामष्टादशानां संज्ञा । सुप् च तिङ् च सुप्तिङौ, तौ अन्ते यस्य तत् सुप्तिङन्तं शब्दस्वरूपं पदसंज्ञं भवति ।

संयोगसंज्ञाविधायकं सूत्रम्-

**हलोऽनन्तराः संयोगः** १। १। ७

**अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः।**

(अनन्तराः, हलः, संयोगः)

लघ्वर्थमेकाक्षरायां संज्ञायां कर्तव्यायां महासंज्ञाकरणात् संयुज्यन्तेऽस्मिन् वर्णा इत्यर्थेन समुदायस्यैव संयोगसंज्ञा, न तु गुणवृद्धिसंज्ञावत् प्रत्येकमिति बोध्यम्।

लघुसंज्ञाविधायकं सूत्रम्-

**ह्रस्वं लघु** १। ४। १०

**ह्रस्वं लघुसंज्ञकं भवति।**

गुरुसंज्ञाविधायकं सूत्रम्-

**संयोगे गुरु** १। ४। ११

(संयोगे, ह्रस्वम्, गुरु)

संयोगे परे ह्रस्वं गुरुसंज्ञकं भवति।

गुरुसंज्ञाविधायकं सूत्रम्-

**दीर्घं च** १। ४। १२

**दीर्घं च गुरुसंज्ञं स्यात्।**

(दीर्घम्, च, गुरु)

दीर्घवर्णश्च गुरुसंज्ञको भवति।

इति संज्ञाप्रकरणम्।

## विशेषविवरणम्

१. “अणुदित् सवर्णस्य-” इति सूत्रेण अण् सवर्णान् गृह्णातीति स्थिते अत्, इत् उत्, ऋदित्यादौ स्वसवर्णानां दीर्घप्लुतादीनामपि ग्रहणे प्राप्ते “तपरस्तत्कालस्य” इति सूत्रेण तः परो यस्मात् स समकालस्यैव संज्ञा, तात्परश्च यः सोऽपि समकालस्यैव संज्ञेति बोध्यते ।

२. “तपरस्तत्कालस्य” इति सूत्रेण “वृद्धिरादैच्” इत्यनेन द्विमात्रिकस्यैव आकारस्य द्विमात्रिकयोरेव वा ‘ऐ औ’ वर्णयोर्वृद्धिसंज्ञेति बोध्यम् । विभक्तितकारे “तपरस्तत्कालस्य” इति न प्रवर्तते अत एव “आद् गुणः” इत्यादौ नास्य प्रवृत्तिरिति विशेषः ।

३. निरर्थकशब्देषु, पर्यायशब्देषु अर्थे च कार्यं मा भूदिति स्वं रूपं शब्दस्याशब्दसंज्ञेति सूत्रं बोध्यम् ।

४. “सुप्तिङन्तं पदम्” इत्यत्र सुबन्तपदेन सुप् यस्माद् विहितस्तदादेस्तदन्तस्य, तिङ् पदेन तिङ् यस्माद् विहितस्तदादेस्तदन्तस्य च ग्रहणं बोध्यम् ।

## अभ्यासः

### १. अधो लिखितानां प्रश्नानामुत्तराणि देयानि

(क) ‘तपरस्तत्कालस्य’ इति सूत्रं किं करोति ?

(ख) वृद्धिपदेन के वर्णा गृह्यन्ते ?

(ग) गुणसंज्ञा केषां वर्णानां भवति ?

(घ) प्रादयः के ?

(ङ) “न वेति विभाषा” इति सूत्रं किं करोति ?

(च) प्रादीनां कस्यामवस्थायाम् उपसर्गसंज्ञा भवति ?

(छ) अवसानपदस्य कोऽर्थः ?

### २. अधस्तनसूत्राणामर्थं लिखत

(क) तपरस्तत्कालस्य

(ख) स्वं रूपं शब्दस्याशब्दसंज्ञा

(ग) न वेति विभाषा

(घ) येन विधिस्तदन्तस्य ।

### ३. समुचितेषु कथनेषु ✓ इति चिह्नं तथाऽसमुचितेषु ✗ इति चिह्नं योजयत

(क) समासविधौ प्रत्ययविधौ तदन्तविधेः प्रतिषेधो भवति ।

(ख) क्रियावाचिनां भ्वादिगणपठितानां धातुसंज्ञा भवति ।

(ग) वर्णानां सन्निधिः संहिता न भवति ।

(घ) प्रादीनां गतिसंज्ञाऽपि भवति ।

(ङ) अवसाने पदान्तस्य रेफस्य विसर्गो भवति ।

(च) अज्भिरव्यवहिता हलः संयोगसंज्ञा न भवन्ति ।

### ४. रिक्तस्थानं पूरयत

(क) "वृद्धिरादैच्" इति सूत्रेण .......... भवति । (वृद्धिसंज्ञा, वृद्धिः)

(ख) "अदेङ्गुणः" इति सूत्रेण ........ वर्णानां गुणसंज्ञा भवति । (आ ऐ औ, अ ए ओ)

(ग) निपातसंज्ञकं सूत्रं "............" इति । (प्राग्रीश्वरान्निपाताः, चादयोऽसत्त्वे)

(घ) समासप्रत्ययविधौ प्रतिषेध इत्यनेन .............. भवति । (तदन्तविधिः, तदन्तविधिप्रतिषेधः)

(ङ) "संयोगे गुरु" इति सूत्रं ............ । (गुरुसंज्ञकम्, लघुसंज्ञकम्)

### ५. यस्य सूत्रस्य यत् कार्यं यथौचिति परस्परं मेलयत

| | |
|---|---|
| तपरस्तत्कालस्य | लघुसंज्ञकम् |
| विरामोऽवसानम् | वृद्धिसंज्ञकम् |
| परः सन्निकर्षः संहिता | गुणसंज्ञकम् |
| ह्रस्वं लघु | संहितासंज्ञकम् |
| दीर्घं च | अवसानसंज्ञकम् |
| अदेङ्गुणः | समकालसवर्णस्य बोधकम् |
| वृद्धिरादैच् | गुरुसंज्ञकम् |

पञ्चमः पाठः

अथ परिभाषाप्रकरणम्

# विविधाः परिभाषाः

पाठेऽस्मिन् विवेचितानि सर्वाणि सूत्राणि परिभाषासूत्राणि बोध्यानि ।

**इको गुणवृद्धी १।१।३**

**गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।**

गुण इति पदमुच्चार्य यत्र गुणो विधीयते, वृद्धिरिति पदमुच्चार्य यत्र वृद्धिर्विधीयते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते । यथा 'सार्वधातुकार्धधातुकयोः' 'मिदेर्गुणः' इत्यादौ गुणपदमुच्चार्य गुणो विधीयते तत्र 'इकः' इति पदमुपतिष्ठते, एवमेव 'मृजेर्वृद्धिः' इत्यादावपि बोध्यम् । 'गुणपदमुच्चार्य यत्र विधीयते' इत्युक्त्या अनुवादे 'वृद्धिर्यस्याचामादिस्तद्वृद्धमि'त्यादौ 'इकः' इति नोपतिष्ठते । 'त्यदादीनामः' इत्यादावपि गुणपदश्रुत्यभावेन नास्य प्रवृत्तिः । यत्र साक्षात् स्थानी न निर्दिष्टः, तत्रैवेयं परिभाषा प्रवर्तते न तु 'अचो ञ्णिति' 'आद् गुणः' इत्यादाविति ज्ञेयम् ।

**अचश्च १।२।२८**

**ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते तत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।**

अस्योदाहरणम् - "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति । 'दिव उत्' इत्यादौ तु नेदं प्रवर्तते ह्रस्वादिशब्दाश्रयणाभावादिति बोध्यम् ।

**आद्यन्तौ टकितौ १।१।४६**

**टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ।**

आदिश्च अन्तश्च आद्यन्तौ, टश्च कश्च टकौ, टकौ इतौ ययोस्तौ टकितौ । एवञ्च - "यथासङ्ख्य..." सूत्रसाहाय्येन टिद्यस्य विहितस्तस्याद्यावयवः, किद्यस्य विहितस्तस्यान्तावयव इत्यर्थः सम्पन्नः । अस्योदाहरणञ्च- "ङ्णोः कुक् टुक् शरि", "आर्धधातुकस्येड्वलादेः" इत्यादि । "प्रत्ययः", "परश्च" इत्यनेन तु परत्वादिदं बाध्यते, तेन "चरेष्टः", "गापोष्टक्" इत्यादयः प्रत्ययास्तु परा एव भवन्ति ।

**मिदचोऽन्त्यात् परः १।१।४७**

**'अचः' इति षष्ठ्यन्तम् । अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात् ।**

(अचः, अन्त्यात्, परः, मित्)

यस्य समुदायस्य मिद् विहितः, तस्य अचां मध्ये योऽन्त्यस्तस्मात् परः, तस्य समुदायस्य अन्तावयवो भवतीति सूत्रस्याऽऽशयः । मकार इत् यस्य स मित् । 'इकोऽचि विभक्तौ' इत्यादीनि उदाहरणानि ।

**षष्ठी स्थानेयोगा १। १। ४९**

**अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या । स्थानं च प्रसङ्गः ।**

स्थाने = प्रसङ्गे योगो यस्याः सा स्थानेयोगा, निपातनात् सप्तम्या अलुक् । स्थानेन योगो यस्याः सा 'स्थानेयोगा' इति वा विग्रहो बोध्यः अस्मिन्पक्षे निपातनादेत्वम् । अनिर्धारितः सम्बन्धविशेषो यस्याः सा इति विग्रहोऽपि तथा च यत्र अवयवावयविभावादिसम्बन्धविशेषस्य निर्देशो नास्ति तत्र षष्ठी स्थानरूपसम्बन्धार्थिका भवतीति सूत्रार्थः पर्यवस्यति । 'इको यणचि' इत्यादौ षष्ठी स्थानरूपसम्बन्धार्थिकेति बोध्यम् । तथा च अचि परतः 'इकः' स्थाने (प्रसङ्गे) यण् स्यादित्यर्थस्तस्य भवति ।

**स्थानेऽन्तरतमः १। १। ५०**

**प्रसङ्गे सति सदृशतम आदेशः स्यात् ।**

स्थानं प्रसङ्गः, अन्तरशब्दोऽत्र सदृशपर्यायः, अतिशयितोऽन्तरः अन्तरतमः । एकस्य स्थानिन अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः सदृशतमः, स एवादेशो भवतीत्यर्थः । अत्र स्थानशब्देन ताल्वादिस्थानं विवक्षितम् । गुणशब्देन प्रयत्नः । प्रमाणशब्देन एकद्विमात्रादिपरिमाणम् । तत्र स्थानतो यथा दध्यत्र, तालुस्थानकस्य इकारस्य तालुस्थानको यकारः । अर्थतो यथा- "तृज्वत्क्रोष्टुः" इति क्रोष्टुशब्दस्य उकारान्तस्य तृजन्त आदेशो भवन् अर्थसाम्यात् क्रोष्टृशब्द एव भवति । गुणतो यथा - 'वाग्घरिः' अत्र हकारः स्थानी घोषनादसंवारमहाप्राणप्रयत्नवान् तस्य गकारसवर्णो भवन् घकार एव भवति । प्रमाणतो यथा- "अदसोऽसेर्दादुदो मः" इति ह्रस्वस्य उकारः, दीर्घस्य ऊकारः । एवमपि चेता स्तोता इत्यादौ इकारस्य उकारस्य गुणो भवन् प्रमाणत आन्तर्यवान् अकारः कुतो न भवतीति जिज्ञासायामाह-

**यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः (परि.)**

यत्र स्थानार्थ-गुण-प्रमाणकृतेष्वान्तर्येषु अनेकविधमान्तर्यं सम्भवति, तत्र स्थानकृतमान्तर्यं बलवद् भवतीति परिभाषार्थः । तथा च इकारस्य स्थानसाम्यादेकार एव गुणो भवति उकारस्य च ओकार इति ।

**तस्मिन्निति निर्दिष्टे पूर्वस्य १। १। ६६**

**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ।**

तस्मिन्निति सप्तम्यन्तानुकरणम् । निर्-शब्दो नैरन्तर्यपरः । दिश्-धातुरुच्चारणार्थः । "इको यणचि" इत्यत्र अचि यण् इत्युक्ते व्यवहितेऽव्यवहिते च सति प्राप्तमव्यवहिते एव, पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते । व्यवधानं च वर्णान्तरकृतमेव निषिध्यते न तु कालकृतम् । "इको यणचि" इत्यादौ कालकृतव्यवधानस्य संहिताधिकारादेव निरासात् ।

**तस्मादित्युत्तरस्य १। १। ६७**

**पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।**

तस्माद् इति पञ्चम्यन्तानुकरणम् । 'निर्दिष्ट' इत्यनुवर्तते, तथा च "द्व्यन्तरुपसर्गेभ्योऽप ईत्" इत्यत्र

अस्योपस्थित्या- द्व्यन्तरादिशब्दे निर्दिष्टेऽव्यवहितोच्चारिते सत्येव ततः परस्यैव ईत्वं भवति इत्यर्थः पर्यवस्यति ।

**अलोऽन्त्यस्य १ । १ । ५२**

**षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात् ।**

स्थाने विधीयमान आदेशः षष्ठीनिर्दिष्टस्य योऽन्त्योऽल् तस्य स्थाने स्यादित्यर्थः । अस्योदाहरणम्- "संयोगान्तस्य लोपः" इति संयोगान्तस्य पदस्य लोपे प्राप्ते अनेन अन्त्यस्यालो लोपो भवतीति बोधिते सति अन्त्यस्यैव भवति न तु सम्पूर्णस्य पदस्येति बोध्यम् ।

**ङिच्च १ । १ । ५३**

**अयमप्यन्त्यस्यैव स्यात् । "सर्वस्य..." इत्यस्यापवादः ।**

ङकार इत् यस्य स ङित् । अलोऽन्त्यस्येत्यनुवर्तते । तथा च ङिदपि अन्त्यस्यैव स्यादित्यर्थः । अवङ्, इयङ्-उवङ्, अनङ् इत्यादय आदेशाः सूत्रस्यास्योदाहरणानि । "अलोऽन्त्यस्य" इत्यनेनैवान्त्यादेशे सिद्धे किमर्थमिदमिति जिज्ञासायामाह "सर्वस्य" इत्यस्यापवाद इति । अनेकाल् शित् सर्वस्येति वक्ष्यमाणस्य सर्वादेशस्यायं विधिरपवादः ।

**आदेः परस्य १ । १ । ५४**

**परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । 'अलोऽन्त्यस्य' इत्यस्यापवादः ।**

"उदः स्थास्तम्भोः पूर्वस्य" इत्यादौ "तस्मादित्युत्तरस्य" इति सूत्रेण परस्य नियमितं कार्यं यत्, तत् तस्यादेरेव भवति, न तु "अलोऽन्त्यस्य" इति अन्त्यस्येति बोध्यम् । अत एवोक्तम्- "अलोऽन्त्यस्य" इत्यस्यापवाद इति ।

**अनेकाल्शित् सर्वस्य १ । १ । ५५**

**स्पष्टम् । "अलोऽन्त्य" सूत्रापवादः । "अष्टाभ्य औश्" इत्यादौ "आदेः परस्य" इत्येतदपि परत्वादनेन बाध्यते ।**

न एकः अनेकः, अनेकोऽल् यस्य स अनेकाल्, शकार इत् यस्य स शित्, अनेकाल् च शिच्चेति समाहारद्वन्द्वः । अनेकालादेशः शिदादेशश्च सम्पूर्णस्य स्थानिनः स्थाने भवतीत्यर्थः । यथा- "अस्तेर्भूः" इत्यनेन अस्-धातोः स्थाने 'भू' इत्यादेशस्य अनेकाल्त्वात् सर्वादेशः । एवमेव "इदम इश्" इत्यनेन इदमः स्थाने इशादेशस्य शित्वात् सर्वादेशः । अष्टन्शब्दाज्जसि "अष्टन आ विभक्तौ" इत्यात्वे "अष्टा अस्" इति स्थिते "अष्टाभ्य औश्" इति कृताकाराद् अष्टन परयोर्जस्शसोर्विधीयमान औशादेशः अलोऽन्त्यस्येति सूत्रं बाधित्वा 'आदेः परस्य' इत्यादेरकारस्य प्राप्तः, अनेकाल्त्वाच्च सर्वादेशः प्राप्तः, तत्र कतरच्छास्त्रं बाध्यमिति जिज्ञासायामाह "अष्टाभ्य औश्" इत्यादौ "आदेः परस्य" इत्येतदपि परत्वादनेन बाध्यते' इति ।

**स्वरितेनाधिकारः १ । ३ । ११**

**स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् ।**

स्वरितेन = स्वरविशेषेण, अधिकारः = उत्तरत्रानुवृत्तिरूपव्यापारः प्रत्येतव्यः । यत् पदं शास्त्रकृता स्वरिताख्यस्वरविशेषविशिष्टमुच्चारितं तदुत्तरसूत्रेष्वनुवर्तनीयमित्यर्थः ।

### परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः (परि.)

परादीनां मध्ये पूर्वपूर्वापेक्षया उत्तरमुत्तरं शास्त्रं बलवत्तरमित्यर्थः । परापेक्षया नित्यान्तरङ्गापवादाः नित्यापेक्षयापि

अन्तरङ्गापवादौ, अन्तरङ्गापेक्षयापि अपवादा:, इत्येवं क्रमेण पूर्वापेक्षया उत्तरोत्तरबलवत्त्वमित्याशय: । परं विप्रतिषेधसूत्राद् बलवत् । परान्नित्यं यथा 'तुदति' अत्र "तुदादिभ्य: श:" इति शप्रत्ययं बाधित्वा परत्वाल्लघूपधगुणे प्राप्ते शप्रत्ययस्य कृताकृतप्रसङ्गित्वेन नित्यत्वाद् गुणं बाधित्वा प्रथमं प्रवृत्तिर्भवति । परादन्तरङ्गं यथा- "उभये देवमनुष्या:" अत्र प्रथमचरमेति परमपि विकल्पं बाधित्वा "सर्वादीनि सर्वनामानि" इति नित्यैव सर्वनामसंज्ञा भवति, तस्या विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वात् । अल्पापेक्षमन्तरङ्गमिति अन्तरङ्गत्वलक्षणम् । अन्तरङ्गशास्त्रस्य बलवत्त्वे बीजं तु ।

### असिद्धं बहिरङ्गमन्तरङ्गे (परि.)

अन्तरङ्गे शास्त्रे कर्तव्ये बहिरङ्गशास्त्रमविद्यमानं प्रत्येतव्यम् इत्यर्थ: ।

### अकृतव्यूहा: पाणिनीया: (परि.)

निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थ: ।

न कृतोऽकृत:, अकृतो व्यूह: = प्रकृतिप्रत्ययविवेचनं यैस्ते अकृतव्यूहा: = पाणिनिशिष्या: । अथवा- ऊह्यते तर्क्यते इत्यूह: कार्यम्, विशिष्टो य ऊहो व्यूहो विनाशोन्मुखनिमित्तकं कार्यम्, अकृतो व्यूहो यैस्ते अकृतव्यूहा इत्यक्षरार्थेन निमित्तं विनाशोन्मुखं दृष्ट्वेत्यर्थ: ।

इति परिभाषाप्रकरणम् ।

## विशेषविवरणम्

१. संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् । इत्यभियुक्तोक्तेषु षड्विधसूत्रेषु परिभाषासूत्राणामुपस्थापनमस्त्यस्मिन् प्रकरणे । परिभाषासूत्राणि च विधिसूत्राणां वाक्यार्थसम्पादने सहयोगाय पाणिनिना निर्मितानि । तथा च परिभाषासूत्राणामुदाहरणानि विधिसूत्राणीति बोध्यम् ।

२. "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति सूत्रेण उपश्लेषसम्बन्धार्थिका सप्तमी यत्र तत्र अव्यवहितांशस्य पूर्वांशस्य षष्ठ्यंशस्य चोपस्थितिर्भवति । यथा- "इको यणचि" इत्यत्र 'अचि' इत्यत्रांशत्रयस्योपस्थित्या 'अजव्यवहितपूर्वस्य' इत्यर्थ: पर्यवस्यति ।

३. यत्र वर्णरूपस्य स्थानिनो निर्देशो नास्ति तत्रैव परिभाषासूत्राणामुपस्थितिर्भवति स्थानिनिर्धारणाय ।

# अभ्यासः

## १. अधोऽङ्कितानां प्रश्नानामुत्तराणि दत्त

(क) 'इको गुणवृद्धी' इति सूत्रेण कुत्र किम् उपतिष्ठते ?

(ख) ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते तत्र किम् उपतिष्ठते ?

(ग) "मिदचोऽन्त्यात् परः" इति सूत्रं किं करोति ?

(घ) "षष्ठी स्थानेयोगा" इत्यनेन कुत्र 'स्थाने' इत्यस्योपस्थितिः ?

(ङ) सादृश्यं कतिविधमिति निर्दिशत ।

(च) ङिदादेशः कस्य स्थाने भवति ?

(छ) "अनेकाल्शित् सर्वस्य" इति सूत्रेण कस्य कस्य बाधो भवति ?

## २. अधस्तनसूत्राणामर्थं निर्दिशत

(क) आद्यन्तौ टकितौ   (ख) तस्मिन्निति निर्दिष्टे पूर्वस्य

(ग) तस्मादित्युत्तरस्य   (घ) षष्ठी स्थानेयोगा

(ङ) मिदचोऽन्त्यात् परः ।

## ३. अधोऽङ्कितानां सूत्राणामुदाहरणानि लिखत

(क) इको गुणवृद्धी   (ख) अचश्च   (ग) ङिच्च

(घ) अलोऽन्त्यस्य   (ङ) स्थानेऽन्तरतमः

## ४. अधस्तनपरिभाषाणामाशयं प्रकाशयत

(क) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।

(ख) परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।

(ग) असिद्धं बहिरङ्गमन्तरङ्गे ।

## ५. रिक्तस्थानं पूरयत

(क) ... इति सूत्रेण 'इकः' इत्युपतिष्ठते । (अचश्च, इको गुणवृद्धी)

(ख) ... सम्पूर्णस्य स्थानिनः स्थाने भवति । (ङिदादेशः, शिदादेशः)

(ग) सप्तमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य ... ज्ञेयम् । (परस्य, पूर्वस्य)

(घ) "ङिच्च" इति सूत्रेण ... इति बाध्यते । (अनेकाल्शित् सर्वस्य, आदेः परस्य)

(ङ) अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गम् ... भवति । (सिद्धम्, असिद्धम्)

(च) 'आद् गुणः' इत्यत्र 'इको गुणवृद्धी' इति सूत्रेण 'इकः' इति षष्ठ्यन्तं पदम् ... ।
(उपतिष्ठते, नोपतिष्ठते)

## ६. समुचितेषु कथनेषु ✓ इति चिह्नं तथाऽसमुचितकथनेषु ✗ इति चिह्नं दर्शयत

(क) टिदाद्यवयवो भवति किच्च अन्तावयवः ।

(ख) ङिदादेशः सर्वस्य स्थाने भवति ।

(ग) मिदागमोऽन्त्यादचः परो भवति ।

(घ) अनिर्धारितसम्बन्धविशेषा षष्ठी यत्र तत्र "षष्ठी स्थानेयोगा" इत्यनेन 'स्थाने' इत्यस्योपस्थितिर्भवति ।

(ङ) पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य स्थाने भवति ।

(च) "अनेकाल्शित् सर्वस्य" इति "आदेः परस्य" इत्यस्यापवादकम् ।

## षष्ठः पाठः

# अथाच्सन्धिप्रकरणे

# यण्सन्धिः

यणादेशविधायकं विधिसूत्रम्-

**इको यणचि ६ । १ । ७७**

**इकः स्थाने यण् स्यादचि संहितायां विषये । "सुधी + उपास्यः" इति स्थिते, स्थानत आन्तर्यादीकारस्य यकारः । सुध्य् + उपास्यः इति जाते ।**

अत्र सूत्रे 'इकः' इति षष्ठ्यन्तं पदम्, अतः "षष्ठी स्थाने -" इति परिभाषासूत्रेण 'स्थाने' इत्यस्य सम्बन्धः । स्थानम् = प्रसङ्गः । वर्णानां वर्णान्तराधिकरणत्वासम्भवाद् अचीत्यत्र सति सप्तमी । अत्र अचीति सम्तमीनिर्देशेन "तस्मिन्निति-" परिभाषासूत्रोपस्थितौ "संहितायाम्" इत्यधिकारसूत्रोपस्थितौ च 'वर्णान्तराव्यवहितोच्चारितेऽचि परे सति पूर्वस्य इकः स्थाने यण् स्यात् संहितायां विषये' इति सूत्रार्थः । अस्योदाहरणप्रदर्शनाय उच्यते- 'ध्यै' चिन्तायाम् इति धातोः "ध्यायतेः सम्प्रसारणञ्च" इति क्विपि यकारस्य सम्प्रसारणे इकारे, पूर्वरूपे च कृते "हलश्च" इति दीर्घे धीशब्दः सिद्धः । ततः सुष्ठु ध्यायन्तीति, सु = शोभना धीः येषामिति वा सुधियः, तैरुपास्य इत्यर्थे समासे कृते 'सुधी + उपास्यः' इति स्थिते ईकारस्य स्थाने यण्प्रत्याहारस्थत्वात् सर्वेषु 'य्, व्, र्, ल्' इत्येतेषु प्राप्तेषु तालुस्थानकृतसाम्यात् "स्थानेऽन्तरतमः" इति यकार एव भवति, भिन्नस्थानकत्वाद् वरलाः न भवन्ति, ततः 'सुध् य् + उपास्यः' इत्यवस्थायाम्-

द्वित्वविधायकं विधिसूत्रम्-

**अनचि च ८ । ४ । ४७**

**अचः परस्य यरो द्वे वा स्तो न त्वचि । इति धकारस्य द्वित्वम् ।**

अत्र "यरोऽनुनासिके -" इत्यतः 'यरः' इति 'वा' इति चानुवर्तेते, "अचो रहाभ्याम् द्वे" इत्यतः 'अचः' इति 'द्वे' इति च । 'अनचि' इति सप्तम्यन्तपदस्य 'न अच् अनच्, तस्मिन् अनचि' इति पर्युदासे अज्भिन्ने हलि इत्यर्थः स्यात्, अतः प्रतिषेधपरवाक्यान्तरमाश्रित्य 'अचि द्वित्वं न' इत्यर्थः । तस्माद् अचः परस्य यरो वा द्वित्वं भवति, अचि परे तु न भवतीति सूत्रार्थः । तेन 'सुध् य्' इत्यत्र धकारस्य अनेन सूत्रेण द्वित्वं भवति । ननु 'सुध् य्' इत्यत्र ईकारस्थानिकस्य यकारस्य स्थानिवद्भावेन अच्त्वात् कथं धकारस्य द्वित्वमिति शङ्कामुपस्थाप्य स्थानिवद्भावसूत्रमाह-

स्थानिवद्भावविधायकमतिदेशसूत्रम्-

**स्थानिवदादेशोऽनल्विधौ १ । १ । ५६**

**आदेशः स्थानिवत्स्यात्, न तु स्थान्यलाश्रयविधौ । अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य "अनचि" इति द्वित्वनिषेधो न शङ्क्यः, 'अनल्विधौ' इति तन्निषेधात् ।**

यद्यपि 'गुरुवद् गुरुपुत्रे वर्तितव्यम्' इति 'कुशाभावे शरैः परिस्तरणम्' इति लौकिकवैदिकेषु कार्येषु स्थानिधर्मस्तत्स्थानापन्नेषु सिद्धः तथापि व्याकरणशास्त्रे "स्वं रूपं शब्दस्ये"ति पाणिनिवचनात् स्थानिधर्मा आदेशेषु न प्राप्नुयुः, तत्प्राप्त्यर्थमिदं सूत्रमारब्धम् । यस्य स्थाने यद् अन्यद् विधीयते तत् स्थानी, येन विधीयमानेन वर्तमानं निवर्तते स विधीयमान आदेशः । स्थानिना तुल्यः स्थानिवत् "तेन तुल्यम् -" इति वतिप्रत्ययः । 'अल्' इति वर्णपर्यायः, विधीयते इति विधिः = कार्यम् । अलाश्रयो विधिः अल्विधिः, न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ । तेन आदेशः स्थानिना तुल्यः = स्थानिधर्मको भवति, अलाश्रयभिन्ने कार्ये कर्तव्ये इत्यर्थः । तथा च अलाश्रयकार्ये कर्तव्ये स्थानिवद्भावो न भवतीति सिद्धम् । तस्माद् अनेन सूत्रेण इह = 'सुध्य्' इत्यत्र यकारस्य स्थानिवद्भावेन अच्कार्यकरणं युक्तम् इति मत्वा (अच् इति मत्वा कार्यकरणं युक्तमिति) "अनचि" इति = अचि परे द्वित्वं न इति निषेधवाक्येन धकारस्य द्वित्वनिषेधो न शङ्कनीयः "अनल्विधौ" इत्यंशेन तन्निषेधात् । तथा हि यकारादेशस्थानिभूतोऽल् ईकारः, तद्गतमच्त्वं यकारे आश्रित्य प्रवर्तमानस्य धकारद्वित्वनिषेधरूपकार्यस्य अलाश्रयत्वादिति भावः । अनेन सूत्रेणात्र स्थानिवद्भावाभावे द्वितीयं स्थानिवद्भावविधायकमतिदेशसूत्रमाह-

स्थानिवद्भावविधायकमतिदेशसूत्रम्-

**अचः परस्मिन्पूर्वविधौ १ । १ । ५७**

**अल्विध्यर्थमिदम् । परनिमित्तोऽजादेशः स्थानिवत्स्यात्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये । इति यणः स्थानिवद्भावे प्राप्ते ।**

इदं सूत्रम् अलाश्रयविधावपि स्थानिवद्भावार्थम् । पूर्वसूत्रादत्र 'स्थानिवदादेशः' इत्यनुवर्तते, 'अचः' इत्यस्य 'आदेशः' इत्यनेन सम्बन्धः । विधीयते इति विधिः = कार्यम्, पूर्वस्य विधिः पूर्वविधिः । यद्यपि पूर्वत्वं सावधिकम् । स्थानी, आदेशः, परनिमित्तञ्चेति त्रयमत्र सन्निहितम्, तथापि स्थान्यपेक्षयैवात्र पूर्वत्वं विवक्षितम्, स्थानिन आदेशेनापहारेऽपि भूतपूर्वगत्या तस्मात्पूर्वत्वस्य सम्भवात् । तेन परं निमित्तमाश्रित्य विहितो योऽजादेशः सः स्थानिवद् भवति, स्थानिभूतो योऽच् ततः पूर्वत्वेन दृष्टस्य विधौ = कार्ये कर्तव्ये सतीत्यर्थो निष्पद्यते । अनेन 'सुध्य्' इत्यत्र धकारस्य द्वित्वनिषेधे कर्तव्ये यकारस्य स्थानिवद्भावे प्राप्ते तत्प्रतिषेधार्थं सूत्रमाह-

स्थानिवद्भावनिषेधकं विधिसूत्रम्-

**न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १ । १ । ५८**

**पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् । इति स्थानिवद्भावनिषेधः ।**

अत्र 'स्थानिवदादेशः' इति 'अचः परस्मिन्' इति चानुवर्तेते । तथा च पदान्तश्च, द्विर्वचनञ्च, वरे च, यलोपश्च, स्वरश्च, सवर्णश्च, अनुस्वारश्च, दीर्घश्च, जश्च, चर्च इति द्वन्द्वः, तेषां विधयः, तेषु । कर्मणि षष्ठ्या समासः । ततः पदान्तादिषु विधेयेषु परनिमित्तकोऽजादेशो न स्थानिवदिति सूत्रार्थः । पदस्यान्तः पदान्तः – पदचरमावयवः । 'वरे' इत्यनेन वरे योऽजादेशः स विवक्षितः । अत एव पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये इत्यादि फलितार्थकथनं

संगच्छते । अनेन सूत्रेण 'सुध् य्' इत्यत्र द्वित्वे कर्तव्ये (द्वित्वनिषेधे च कर्तव्ये) स्थानिवद्भावनिषेधाद् "अनचि च" इति धकारस्य द्वित्वे 'सुध् ध् य्' इति स्थिते -

जश्त्वादेशविधायकं विधिसूत्रम्-

**झलां जश् झशि ८ । ४ । ५३**

**स्पष्टम् । इति धकारस्य दकारः ।**

झलां स्थाने जश् स्यात् झशि परे इति सूत्रादेव बोधः, अनुवृत्त्यादेरावश्यकता नास्तीति बोधनाय 'स्पष्टम्' इत्युक्तम् । अनेन स्थानत आन्तर्यात् पूर्वधकारस्य दकारे 'सु द् ध् य्' इति स्थिते संयोगान्तलोपस्य शङ्कामुत्थापयितु माह -

लोपसंज्ञाविधायकं सूत्रम्-

**अदर्शनं लोपः १ । १ । ६०**

**प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ।**

प्रसक्तस्य = विद्यमानस्य अदर्शनम् = अश्रवणं लोपसंज्ञकं भवति ।

लोपादेशविधायकं विधिसूत्रम्-

**संयोगान्तस्य लोपः ८ । २ । २३**

**संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् । इति यलोपे प्राप्ते ।**

संयोगोऽन्तो यस्य तत् संयोगान्तम्, तस्य संयोगान्तस्य । "पदस्य" इत्यस्याधिकारः । "अलोन्त्यस्य", "षष्ठी स्थानेयोगा" इत्यनयोश्च उपस्थितिः । एवञ्च- संयोगान्तं यत्पदं तस्य पदस्य अन्त्यस्यालः (अन्त्यवर्णस्य) स्थाने लोपादेशो भवतीति सूत्रार्थः । अत्र 'अलोऽन्त्यस्य' इति परिभाषया तदन्तस्य इत्यर्थलाभः । अनेन 'सु द् ध् य्' इत्यत्र यकारस्य लोपे प्राप्ते तत्प्रतिषेधार्थं वार्तिकम्-

संयोगान्तयण्लोपनिषेधकं वार्तिकम्-

**'यणः प्रतिषेधो वाच्यः' (वा.)**

यणः संयोगान्तलोपस्य प्रतिषेधो वक्तव्य इति । संयोगान्तस्य पदस्यान्ते स्थितानां यण्प्रत्याहारस्थवर्णानां "संयोगान्तस्य लोपः" इत्यनेन प्राप्तो लोपोऽनेन वार्तिकेन निषिद्ध्यते । इत्थमनेन 'सु द् ध् य्' इत्यत्र यकारस्य लोपनिषेधे तस्य द्वित्वविधिमाह-

द्वित्वविधायकं वार्तिकम्-

**"यणो मयो द्वे वाच्ये"** (वा.५०१८)

**'मय इति पञ्चमी यण इति षष्ठी' इति पक्षे यकारस्यापि द्वित्वम् । तदिह धकारयकारयोर्द्वित्व-विकल्पाच्चत्वारि रूपाणि । एकधमेकयम् । द्विधं द्वियम् । द्विधमेकयम् । एकधं द्वियम् । सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ।**

अत्रापि वाग्रहणमनुवर्त्य 'मय' इति पञ्चम्यन्तं पदम्, 'यण' इति षष्ठ्यन्तमिति पक्षे- मयः परस्य यणो वा द्वित्वमित्यर्थः, तेन यकारस्यापि पाक्षिकं द्वित्वं सिद्धम् । तस्माद् इह = 'सुध् य्' इत्यत्र धकारयकारयोर्द्वित्वविकल्पे सति चत्वारि रूपाणि भवन्तीत्यभिप्रायः ।

सुधी + उपास्यः - सुध् य् उपास्यः (इको यणचि) - सुध् ध् य् + उपास्यः (अनचि च) - सुद् ध् य् + उपास्यः (झलां जश् झशि) - सुद् ध् य् य् + उपास्यः (यणो मयो द्वे वाच्ये) - सुद्ध्य्युपास्यः, यकारस्य द्वित्वाभावे धकारस्य द्वित्वपक्षे- सुद् ध् य् + उपास्यः - सुद्ध्युपास्यः, धकारस्य द्वित्वाभावे यकारस्य द्वित्वपक्षे- सुध् य् य् + उपास्यः - सुध्य्युपास्यः, धकार-यकारयोरुभयोरपि द्वित्वाभावे- सुध् य् + उपास्यः - सुध्युपास्यः इति रूपचतुष्टयं सिद्धम् । एवं 'मद्ध्वरिः' इत्यादावपि यणादिकं बोध्यम् । मधोः = तन्नामकस्य अरिः = शत्रुः । मधु + अरिः - मध् व् अरिः (इको यणचि) - मध् ध् व् + अरिः (अनचि च) - मद् ध् व् + अरिः (झलां जश् झशि) - मद् ध् व् व् + अरिः (यणो मयो द्वे वाच्ये) - मद्ध्व्वरिः, वकारस्य द्वित्वाभावे धकारस्य द्वित्वपक्षे- मद् ध् व् + अरिः - मद्ध्वरिः, धकारस्य द्वित्वाभावे यकारस्य द्वित्वपक्षे- मध् व् व् + अरिः - मध्व्वरिः, धकार-यकारयोरुभयोरपि द्वित्वाभावे- मध् व् + अरिः - मध्वरिः इति चत्वारि रूपाणि सिद्धयन्ति । धातुः = ब्रह्मणः अंशः = भागः = धात्त्रंशः । धातृ + अंशः - धात् र् + अंशः (इको यणचि) - धात् त् र् + अंशः (अनचि च) - धात्त्रंशः, तकारस्य द्वित्वाभावे- धात् र् + अंशः - धात्रंशः । 'लृ' इत्यस्य आकृतिरिव आकृतिर्यस्य- लाकृतिः । लृ + आकृतिः - ल् + आकृतिः (इको यणचि) - लाकृतिः ।

द्वित्वनिषेधकं सूत्रम्-

**नादिन्याक्रोशे पुत्रस्य ८ । ४ । ४८**

**पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे परे आक्रोशे गम्यमाने । पुत्रादिनी त्वमसि पापे । आक्रोशे किम् ? तत्त्वकथने द्विर्वचनं भवत्येव । पुत्त्रादिनी सर्पिणी ।**

"अनचि च" इति प्राप्तस्य द्वित्वस्य प्रतिषेधार्थं सूत्रमिदम् । आक्रोशो निन्दा, अत्र 'द्वे' इति 'यरः' इति चानुवर्त्य 'आदिनीशब्दे परे पुत्रशब्दावयवो यो यर् तकारः, तस्य न द्वित्वम्, आक्रोशे गम्ये = निन्दार्थे अवगते' इत्यर्थः । पुत्रानत्तुं शीलमस्याः = पुत्रादिनी - पुत्रघातिनीत्यर्थः ।

द्वित्वनिषेधकं वार्तिकम्-

**"तत्परे च" (वा.) । पुत्रपुत्रादिनी त्वमसि पापे ।**

स आदिनीशब्दः परो यस्मात् सः तत्परः, तस्मिन् तत्परे । आदिनीशब्दपरके पुत्रशब्दे परे पूर्वपुत्रशब्दावयवस्य यरो न द्वित्वमित्यर्थः । तेन पुत्रस्य पुत्रानत्तीति पुत्रपुत्रादिनीत्यत्र पूर्वपुत्रशब्दावयवस्य तकारस्य द्वित्वं न ।

विभाषया द्वित्वनिषेधकं वार्तिकम्-

**"वा हतजग्धयोः" (वा. ) पुत्त्रहती – पुत्रहती, पुत्त्रजग्धी पुत्रजग्धी ।**

हतशब्दे जग्धशब्दे च परे पुत्रशब्दावयवस्य यरो द्वित्वं वा स्यादित्यर्थः । पुत्रो हतो यया सा 'पुत्त्रहती' इति तकारस्य द्वित्वपक्षे रूपम्, तदभावे 'पुत्रहती' इत्यपि । एवम् पुत्त्रजग्धीत्यत्रापि बोध्यम् ।

विभाषया द्वित्वविधाकं सूत्रम्-

**त्रिप्रभृतिषु शाकटायनस्य ८ । ४ । ५०**

**त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् । इन्न्द्रः – इन्द्रः राष्ट्ट्रम्, राष्ट्रम् ।**

त्रिभ्यः अधिकेषु वर्णेषु संयुक्तेषु सत्सु अचः पराय परः द्वित्वं शाकटायनस्य महे वा भवतीति सूत्रार्थः ।

द्वित्वनिषेधकं सूत्रम्-

**सर्वत्र शाकल्यस्य ८ । ४ । ५१**

**द्वित्वं न । अर्कः । ब्रह्मा ।**

अचः परस्य यरः सर्वत्र द्वित्वं न भवति शाकमयस्य मते इति सूत्रार्थः ।

द्वित्वनिषेधकं सूत्रम्-

**दीर्घादाचार्याणाम् ८ । ४ । ५२**

**द्वित्वं न । दात्रम् । पात्रम् ।**

दीर्घादचः परस्य यरः द्वित्वं न आचायाणां मते इति सूत्रार्थः ।

द्वित्वविधायकं सूत्रम्-

**अचो रहाभ्यां द्वे ८ । ४ । ४६**

**अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः ।**

**हर्य्यनुभवः । न ह्य्यस्ति ।**

अत्र "यरोऽनुनासिके-" इत्यस्माद् 'यरः' इति 'वा' इति चानुवर्तेते, ततः 'पराभ्याम्' 'परस्य' इति पदद्वययोजनयार्थलाभः, अचः पराभ्यामित्यादि । तथा च हरेरनुभव इत्यर्थे, 'हरि + अनुभवः' इति स्थिते इकारस्य यणि यकारे, तस्यानेन सूत्रेण द्वित्वम् । एवं 'नहि + अस्ति' इत्यत्रापि बोध्यम् । अत्रोदाहरणद्वयेऽपि प्रथमयकारस्य लोपविधायकं सूत्रमाह -

यम्लोपविधायकं विधिसूत्रम्-

**हलो यमां यमि लोपः ८ । ४ । ६४**

**हलः परस्य यमो लोपो वा स्याद् यमि । इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यम् । लोपारम्भफलं तु 'आदित्यो देवता अस्येत्यादित्यं हविः' इत्यादौ । 'यमां यमि' इति यथासंख्यविज्ञानान्नेह- माहात्म्यम्, तादात्म्यम् ।**

यमिति प्रत्याहारः, यमामिति बहुवचनं प्रयोगबहुत्वापेक्षम् । ननु 'हर्य्यनुभवः' इत्यादौ लोपपक्षे द्वित्वाभावपक्षे च एकयकारवतो रूपस्य तुल्यत्वात् किमर्थमिदं "हलो यमामि"ति सूत्रमिति चेन्न, आदित्यो देवता अस्येति विग्रहे आदित्यशब्दाद् "दित्यदित्यादित्य-" इति सूत्रेण ण्यप्रत्यये 'आदित्य य' इति जाते "यस्येति च" इति यकारादकारलोपे तकाराद् यकारलोपार्थं तस्यावश्यकत्वात् । 'यमां यमि' इत्यत्र यथासंख्यसूत्रेण 'यकारस्य यकारे परे, मकारस्य मकारे परे लोपः' इति बोधनात् 'माहात्म्यम्' इत्यादौ तकारात्परस्य मकारस्य लोपो न भवतीति भावः ।

## प्रयोगसिद्धिप्रकारः

### सुद्ध्युपास्यः

सु = शोभना धीर्येषामिति सुधियः, सुष्ठु ध्यायन्तीति वा सुधियः, 'सुधीभिरुपास्यः' इति विग्रहे "कर्तृकरणे-" इति समासे "सुपो धातु-" इति सुपो लुकि 'सुधी + उपास्यः' इति स्थिते "परः सन्निकर्षः-" इति संहितासंज्ञायां "संहितायाम्" इत्यधिकृत्य "तस्मिन्निति निर्दिष्टे पूर्वस्य", 'स्थानेऽन्तरतमः" इति सूत्रद्वयसहकृतेन "इको यणचि" इति सूत्रेण ईकारस्य यणादेशे यकारे 'सुध् य् + उपास्यः' इति जाते "अनचि च" इति धकारस्य द्वित्वे 'सुध् ध् य् + उपास्यः' इति जाते "झलां जश् झशि" इति सूत्रेण पूर्वधकारस्य जश्त्वे स्थानत आन्तर्याद् दकारे 'सुद् ध् य् + उपास्यः' इत्यवस्थायां "हलोऽनन्तराः संयोगः" इति 'द् ध् य्' इत्यस्य संयोगसंज्ञायाम् "अलोऽन्त्यस्य" इति सूत्रसहकृतेन "संयोगान्तस्य लोपः" इत्यनेन संयोगान्तस्य यकारस्य लोपे प्राप्ते "यणः प्रतिषेधो वाच्यः" इति वार्तिकेन तन्निषेधे "अज्झीनं परेण संयोज्यम्" इति नियमेन वर्णसम्मेलने 'सुद्ध्युपास्यः' इति रूपम् । धकारस्य द्वित्वाभावपक्षे 'सुध्युपास्यः' इति रूपम् । "यणो मयो द्वे वाच्ये" इत्यत्र 'मय' इति पञ्चमी 'यण' इति षष्ठी इति पक्षे यकारस्यापि द्वित्वे 'सुद्ध्य्युपास्यः' इति द्विधकारं द्वियकारञ्च रूपम्, धकारस्य द्वित्वाभावे यकारस्य द्वित्वपक्षे 'सुध्य्युपास्यः' इति एकधकारं द्वियकारं रूपञ्चेति चत्वारि रूपाणि सिद्ध्यन्ति ।

नन्वत्र 'सुध् य् + उपास्यः' इति स्थिते "स्थानिवदादेशोऽनल्विधौ" इति यकारस्य स्थानिवद्भावेनाच्त्व-माश्रित्य "अनचि च" इति द्वित्वनिषेधः कथं न स्यादिति चेन्न, 'अनल्विधौ' इति अल्विधित्वेन तन्निषेधात् । न चाल्विधौ स्थानिवद्भावविधायकेन "अचः परस्मिन्पूर्वविधौ" इति सूत्रेण स्थानिवद्भावः स्यादिति वाच्यम्, "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" इति सूत्रेण द्विर्वचनविषये तन्निषेधात् ।

# अभ्यासः

## १. अधो लिखितानां प्रश्नानामुत्तराणि दत्त

(क) कस्य स्थाने यण् भवति ?

(ख) यण्विधौ "तस्मिन्निति-" परिभाषासूत्रस्य किं प्रयोजनम् ?

(ग) ईकारस्य स्थाने यणादेशे कर्तव्ये व-र-लाः कथं न भवन्ति ?

(घ) "स्थानिवत्-" "अचः परस्मिन्-" इत्यनयोः कार्ये को भेदः ?

(ङ) "अदर्शनं लोपः" इति सूत्रेण कस्य लोपसंज्ञा ?

(च) "संयोगान्तस्य -" इति सूत्रे कीदृशः संयोगो विवक्षितः ?

(छ) "पुत्रादिनी त्वमसि पापे" इत्यत्र केन सूत्रेण तकारस्य द्वित्वं प्राप्तम् ?

## २. एतेषां वाक्यानां कोऽभिप्रायः ?

(क) स्थानत आन्तर्यादीकारस्य यकारः ।

(ख) अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य 'अनचि च' इति द्वित्वनिषेधो न शङ्क्यः, 'अनल्विधौ' इति तन्निषेधात् ।

(ग) 'मय' इति पञ्चमी 'यण' इति षष्ठी इति पक्षे यकारस्यापि द्वित्वम् ।

(घ) आक्रोशे किम् ? तत्त्वकथने द्विर्वचनं भवत्येव ।

(ङ) लोपारम्भफलं तु 'आदित्यो देवता अस्येत्यादित्यं हविः' इत्यादौ ।

## ३. "स्थानिवदादेशः-" इति सूत्रस्यार्थं लिखत ।

## ४. "अचः परस्मिन्-" इत्यत्र 'पूर्वविधौ' इत्यनेन किं विवक्षितम् ?

## ५. 'मद्ध्वरिः' इति प्रयोगः साधनीयः ।

## ६. युक्तकथनेषु ✓ इति चिह्नं तथाऽनुपयुक्तकथनेषु × इति चिह्नं योजयत

(क) इ-उ-ऋ-लृवर्णानां य्, व्, र्, ल् इति यण्संज्ञका आदेशाः क्रमेण भवन्ति ।

(ख) 'अनचि' इति द्वित्वनिषेधः, 'च' इति द्वित्वविधानं भवति ।

(ग) 'सुध् य्' इत्यत्र "अचः परस्मिन्-" इति स्थानिवद्भावनिषेधः ।

(घ) "वा हतजग्धयोः" इति द्वित्वनिषेधकं वार्तिकम् ।

(ङ) "अचो रहाभ्याम्-" इति रेफस्य द्वित्वं भवति ।

(च) "हलो यमां यमि-" इति यथासंख्यविज्ञानाद् यकारे परे यकारस्यैव लोपः ।

## ७. कोष्ठस्थोपयुक्तैः पदैः रिक्तस्थानं पूरयत

(क) इकः स्थाने ... भवति । (यकारः, वकारः, यण्)

(ख) उकारस्य विधीयमानो यण् ... भवति । (यकारः, वकारः, यण्)

(ग) ... तुल्यः स्थानिवद् भवति । (स्थानिना, आदेशेन, वर्णेन)

(घ) "अनचि च" इति ... द्वित्वम् । (हलः, अचः, यरः)

(ङ) "अचः परस्मिन्-" इति ... स्थानिवद्भावः । (अल्विधौ, अनल्विधौ, यण्विधौ)

(च) "दीर्घादाचार्याणाम्" इति ... द्वित्वनिषेधः । (दीर्घस्य, तकारस्य, यरः)

(छ) "अचो रहाभ्यां द्वे" इति ... वा द्वित्वम् । (यरः, यकारस्य, हकारस्य)

## ८. "न पदान्त-" इत्यादिसूत्रं सम्पूर्णं शुद्धं लिखत ।

# अनुप्रयोगः

## १. अधो लिखितानि वाक्यानि पठत

(क) गुरवोऽ**त्यन्तं** ध्यानेन पाठयन्ति ।

(ख) माधवाय भोजननिर्माणस्य **अस्त्यनुभवः** ।

(ग) गुरुश्छात्रं श्लोकस्य **अन्वयं** बोधयति ।

(घ) मम कृते **मात्रादेशः सर्वोपर्यस्ति ।**

(ङ) भगिनी भ्रातर**मन्वगच्छत् ।**

## २. सन्धिं कुरुत

| | |
|---|---|
| प्रति + एकम् = .................. | पितृ + आ = ........................ |
| इति + अत्र = .................. | गुरु + आज्ञा = ..................... |
| लृ + आदेशः = .................. | इति + उक्त्वा = ................... |

## ३. सन्धिविच्छेदं कुरुत

धात्वादेशः, भात्याकाशे, स्मृत्यादेशः, वध्वलङ्कारः, वस्त्वत्र, अप्येतत्, पित्राज्ञा ।

## ४. यण्सन्धियुक्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।

# अयादिसन्धिः

अयादिसन्धिविधायकं विधिसूत्रम्-

**एचोऽयवायावः ६ । १ । ७८**

**एचः क्रमादय् अव् आय् आव् एते स्युरचि ।**

अत्र-अय् च अव् च आय् च आव् चेति विग्रहः । 'इको यणचि' इति सूत्रादचीत्यनुवर्तते । "यथासंख्यमनुदेशः-" इति परिभाषोपस्थितौ- एचः स्थाने क्रमाद् (एकारस्य अय्, ओकारस्य अव्, ऐकारस्य आय्, औकारस्य आव्) एते आदेशाः सप्तम्यन्ते विशेषणीभूते वर्णग्रहणे स्युरित्यर्थो लभ्यते । एतेष्वादेशेषु यकारवकाररूपयोः हल्वर्णयोः "हलन्त्यम्" इति इत्संज्ञायां लोपशङ्कया सूत्रमाह -

लोपादेशविधायकं विधिसूत्रम्-

**तस्य लोपः १ । ३ । ९**

**तस्येतो लोपः स्यात् । इति यवयोर्लोपो न । उच्चारणसामर्थ्यात् । एवं च इत्संज्ञापीह न भवति । हरये । विष्णवे । नायकः । पावकः ।**

सूत्रमिदमित्संज्ञाप्रकरणेऽस्ति, तेन तच्छब्देन सन्निहितम् इत्संज्ञकं परामृशति । तस्मात् तस्य इतः = इत्संज्ञकवर्णस्य लोपः स्यादित्यर्थः । अनेन सूत्रेण 'अय् आय्' इत्यत्र यकारस्य, 'अव् आव्' इत्यत्र वकारस्य च लोपो न भवति, कथम् ? उच्चारणसामर्थ्यात् । यदि च अनयोः यकारवकारयोर्लोपः स्यात्, तर्हि "एचोऽयवायावः 'इति सूत्रे उच्चारणमेव न स्यात् । लोपाभावे इत्संज्ञायाः किं प्रयोजनम् इति चेत्, फलाभावाद् इत्संज्ञापि न स्यादिति भावः । एवं च-हरे + ए, विष्णो + ए, नै + अकः, पौ + अकः इति स्थितेषु एकारादीनां क्रमाद् अय्, अव्, आय्, आव् एते आदेशा भवन्तीत्याशयः ।

अव्-आव्-आदेशविधायकं विधिसूत्रम्-

**वान्तो यि प्रत्यये ६ । १ । ७९**

**यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः । गोर्विकारो गव्यम् – 'गोपयसोर्यत्' । नावा तार्यम् नाव्यम्- "नौवयोधर्म" इत्यादिना यत् ।**

सूत्रे 'यि' इति सप्तम्यन्तपदस्य यकारादावित्यर्थः । स च "यस्मिन्विधिस्तदादावल्ग्रहणे" इति वार्तिकात् । अत्र वार्तिके 'यस्मिन्' इति सप्तम्यन्तं विवक्षितम् । अलिति वर्णपर्यायः । तेन 'सप्तम्यन्ते विशेषणीभूते वर्णग्रहणे

यो विधिः सः तद्वर्णादौ बोध्य' इति तदर्थः । वकारः अन्ते यस्य वान्तः, पूर्वसूत्रोपात्तः अवादेशः आवादेशश्च विवक्षितः । 'ओदौतोः' इति पूर्वसूत्रार्थाल्लभ्यते, अतो मूलोक्तार्थः संगच्छते ।

'गोर्विकारः' इत्यर्थे "गोपयसोर्यत्" इति गोशब्दाद् विकारार्थे यत्-प्रत्ययेऽनुबन्धलोपे 'गो + य' इति स्थिते अच्परकत्वाभावाद् "एचोऽयवायावः" इत्यस्याप्राप्तौ "वान्तो यि-' इति ओकारस्य अवादेशः । एवं नावा तार्यं जलमित्यर्थे 'नौ' शब्दात् "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमित-सम्मितेषु' इत्यादि सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे 'नौ य' इति स्थिते अनेन आवादेशे- नाव्यम् ।

**"गोर्यूतौ छन्दस्युपसंख्यानम्"** (**वा**.)

छन्दसि = वेदे यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य स्थाने 'अव्' इति वान्तादेशो भवतीति उपसंख्यानम् = अधिकं वक्तव्यमिति वार्तिकार्थः ।

**"अध्वपरिमाणे च"** (**वा**.) **गव्यूतिः । "ऊतियूति-" इत्यादिना यूतिशब्दो निपातितः । 'वान्त-' इत्यत्र वकारात् 'गोर्यूतौ-' इत्यत्र छकाराद्वा पूर्वभागे "लोपो व्योः-" इति लोपेन वकारः प्रश्लिष्यते । तेन श्रूयमाणवकारान्त आदेशः स्यात्, वकारो न लुप्यत इति यावत् ।**

मार्गपरिमाणविशेषे गम्येऽपि यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य 'अव्' इति वान्तादेशः स्यादिति वक्तव्यमित्यर्थः । यद्यपि टीकाकृद्भिर्यावति गोशब्दो यूयते = श्रूयते तावानध्वा गव्यूतिरित्युक्तम्, तथापि क्रोशयुग्मं यावद् गोशब्दाश्रवणात् 'गव्यूतं स्त्री तु गव्यूतिर्गोरूतं गोमतं च तत्' इति वाचस्पतिवचनात्- गावो युवन्ति = स्वेच्छया चरन्त्यो भ्रमन्ति अस्यां सा गव्यूतिः = क्रोशयुगम् इति व्याख्यानस्य संगतिः स्यात् । यूतिशब्दश्च युधातोः क्तिन्प्रत्यये "ऊतियूति-" इत्यादिसूत्रेण दीर्घस्य निपातनं बोध्यम् । 'सिद्धप्रक्रियस्य निर्देशो निपातनम्' इति निपातलक्षणम् ।

ननु 'गव्यम्', 'नाव्यम्' इत्यत्र भत्वेन पदत्वाभावाद् वलोपाप्राप्तावपि 'गव्यूतिः' इत्यत्र गो गवां वा यूतिरिति विग्रहे समासे कृतेऽन्तर्वर्तिनीं विभक्तिमाश्रित्य गो इत्यस्य पदत्वात् तदवयवस्य ओकारस्य विहितः अवादेशः पदान्तः, तदवयवस्य वकारस्य "लोपः शाकल्यस्य" इति लोपः कथं न स्यादिति चेन्न, "वान्तो यि-" इत्यत्र वकारात् "गोर्यूतौ-" इत्यत्र छकारात्पूर्वं वकारस्य प्रश्लिष्टत्वात् । तस्य च वकारस्य "लोपो व्योः-" इति लोपेन "वान्तः-" इत्यत्र "गोर्यूतौ-" इत्यत्र च श्रवणं न भवति । प्रश्लेषस्य किं फलमिति चेत् "वान्तः-" इति "गोर्यूतौ-" इति सूत्रवार्तिकाभ्यां विहितो यो वान्तादेशः स श्रूयमाणवकारवान् यथा स्यात्, वकारस्य लोपो न स्यादिति ।

वान्तादेशनियामकं सूत्रम्-

**धातोस्तन्निमित्तस्यैव ६ । १ । ८०**

**यादौ प्रत्यये परे धातोरेचश्चेद् वान्तादेशस्तर्हि तन्निमित्तस्यैव । लव्यम्, । अवश्यलाव्यम् । 'तन्निमित्तस्यैव' इति किम् ? ओयते, औयत ।**

"वान्तो यि-" इति सूत्रं नियमयति- धातोरिति । अत्र 'एच' इति "वान्तो यि प्रत्यये" इति चानुवर्तते ।

सः = यकारादिप्रत्ययो निमित्तं यस्य स तन्निमित्तः । यकारादिप्रत्यये परे धातोरेचो भवन् वान्तादेशो यकारादिप्रत्ययनिमित्तकस्यैव एचो भवति नान्यस्येति सूत्रार्थः । तथा च- 'लूञ्' छेदने धातोः "अचो यत्" इति यत्प्रत्यये "सार्वधातुकार्ध-" इत्यादिसूत्रेण ऊकारस्य गुणे ओकारे 'लो + य' इति स्थिते ओकारस्य धात्ववयवत्वाद् यादिप्रत्ययनिमित्तकत्वाच्च अनेन सूत्रेण वान्तादेशः । एवम् अवश्यम् इत्यव्ययोपपदात् लूञ्-धातोः "ओरावश्यके" इति ण्यति "अचो ञ्णिति" इति वृद्धौ 'लौ + य' इत्यत्र अनेन वान्तादेशः 'अवश्यम्' इत्यस्य लाव्यशब्देन मयूरव्यंसकादित्वात्समासे "लुम्पेदवश्यमः कृत्ये' इति मकारलोपः ।

अस्य नियमसूत्रस्य किं प्रयोजनमित्याशङ्कायाम्- तदभावे ओयते, औयत इति न स्यात् । तथा हि- आङ्पूर्वकाद् वेञ्धातोः कर्मणि लट्, 'भावकर्मणोः' इति तङ्, यक्, "वचिस्वपि-" इति वकारस्य सम्प्रसारणम् उकारः, पूर्वरूपम् "अकृत्-" इत्युकारस्य दीर्घः, आ + ऊ य त' इत्यत्र "आद् गुणः" इति गुण ओकारः । अत्र ओकारस्य यादिप्रत्ययनिमित्तकत्वाभावाद् वान्तादेशो न, एवम् 'औयत' इत्यत्रापि बोध्यम् । तत्र वेञ्धातोः कर्मणि लङ्, आडागमो वृद्धिश्च, शेषं पूर्ववत् ।

**क्षय्यजय्यौ शक्यार्थे ६ । १ । ८१**

**यान्तादेशनिपातनार्थमिदम् । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । 'शक्यार्थे किम् ? क्षेतुं जेतुं योग्यं क्षेयं पापं, जेयं मनः ।**

शक्यार्थे क्षय्यजय्यशब्दौ वाचकतया वर्तेते इति सूत्रार्थः । अत्र प्रातिस्विकविधिं विना सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशो निपातनमिति । प्रातिस्विकः = विशिष्टः, स्वीयो वा । तेन शक्यार्थके यकारादौ प्रत्यये परे 'क्षि क्षये' 'जि जये' इति धात्वोरेचः 'अय्' इति यान्तादेशः स्यादिति फलितार्थः । क्षय्यमिति - क्षि धातोः "शकि लिङ् च" इत्यत्र चात्कृत्या इत्यर्थलाभाद् "अचो यत्" इति यति, धातोरिकारस्य गुणे 'क्षे य' इत्यत्र अनेन सूत्रेण अयादेशः । एवं जेयमित्यपि । 'क्षेयम्' 'जेयम्' इत्यत्र तु "अर्हे कृत्यतृचश्च" इति विहितस्य यत्प्रत्ययस्य शक्यार्थकत्वाभावाद् यान्तादेशो न ।

**क्रय्यस्तदर्थे ६ । १ । ८२**

**तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् । क्रेयमन्यत्, क्रयणार्हमित्यर्थः ।**

इदमपि यान्तादेशनिपातनार्थम् । यत्प्रत्ययप्रकृतिभूतः क्रीञ्धातुः तस्य योऽर्थः द्रव्यविनिमयरूपः, स प्रकृत्यर्थः तच्छब्देन विवक्षितः । तस्मै इदं तदर्थम् = क्रयार्थं वस्तु । तथा च क्रयार्थे वस्तुनि गम्ये क्रीञ्धातोर्यत्-प्रत्यये ईकारस्य गुणे 'क्रे + य' इत्यत्र अनेन सूत्रेण अयादेशः ।

यवयोर्लोपविधायकं विधिसूत्रम्-

**लोपः शाकल्यस्य ८ । ३ । १९**

**अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे । "पूर्वत्रासिद्धम्" इति लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिः । हर एहि, हरयेहि । विष्ण इह, विष्णविह । श्रिया उद्यतः, श्रियायुद्यतः । गुरा उत्कः, गुरावुत्कः । 'कानि सन्ति' 'कौ स्तः' इत्यत्रास्तेरल्लोपस्य स्थानिवद्भावेन यणावादेशौ प्राप्तौ "न पदान्त-" इति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः ।**

अत्र "भोभगो-" इति सूत्राद् 'अपूर्वस्य' इति 'अशि' इति चानुवर्तेते, "व्योर्लघुप्रयत्न-" इत्यतो 'व्योः' इति च । व्योः = यकारवकारयोः । अवर्णः पूर्वे यस्मात् स अपूर्वः, तस्य अपूर्वस्य वकारस्य यकारस्य चेत्यर्थः । 'पदस्य' इत्यधिकृतम् । ततश्च अवर्णपूर्वो यो वकारो यकारश्च तदन्तपदस्य लोपः स्याद् अशि परे इत्यर्थः । अलोऽन्त्यपरिभाषया पदान्तस्य इत्यर्थो लभ्यते । शाकल्यग्रहणादन्यमते लोपो न भवतीति बोधः, तस्माद् विकल्पार्थः फलितः । एवं च- हरे + एहि, विष्णो + इह, श्रियै + उद्यतः, गुरौ + उत्कः इति स्थितेषु "एचोऽयवायावः" इति अयवायावादेशेषु कृतेषु अनेन यकारवकारयोर्वैकल्पिको लोपः । ततश्च हर + एहि इत्यत्र "ओमाङोश्च" इति पररूपे, विष्ण + इह, श्रिया + उद्यतः, गुरा + उत्कः इत्यादौ "आद् गुणः" इति गुणे प्राप्ते "पूर्वत्रासिद्धम्" इति "लोपः शाकल्यस्य" इत्यस्यासिद्धत्वान्न भवतीति बोध्यम् । तथा च यकारवकारयोर्लोपस्यासिद्धत्वाद् यकारवकारयोर्व्यवधानेन अवर्णाद् अच्परकत्वाभावेन अच्सन्धिर्न भवतीति भावः । यद्यपि 'कानि सन्ति' इत्यत्रास्तेरल्लोपस्य स्थानिवद्भावेन यणादेशः, 'कौ स्तः' इत्यत्र आवादेशश्च प्राप्तः, तथापि "न पदान्त-" इत्यादिसूत्रेण पदान्तविधौ स्थानिवत्वनिषेधान्न भवति । तथा हि वाक्यसंस्कारपक्षे- किम् शब्दाज्जसि नपुंसके 'शि' इत्यादेशे 'किम्' शब्दस्य कादेशे नुमि उपधादीर्घे कानि इति, अदादिगणपठिताद् अस्धातोर्लटि प्रथमपुरुषबहुवचनस्य "झोऽन्तः" इति अन्तादेशे 'अस् अन्ति' इति जाते धातोः अकारस्य "श्नसोरल्लोपः" इति लोपे 'सन्ति' इति, ततः 'कानि + सन्ति' इति स्थिते अल्लोपस्य "अचः परस्मिन्-" इति स्थानिवद्भावेन अच्परकत्वाद् इकारस्य यणादेशः प्राप्तः । एवं किम्-शब्दात् प्रथमाया द्विवचने औविभक्तौ 'कौ' इति, अस्धातोर्लटि प्रथमपुरुषद्विवचने तसि पूर्ववद् अल्लोपेन 'स्तः' इति रूपम् । 'कौ स्तः' इति स्थिते अल्लोपस्य स्थानिवद्भावेन आवादेशः प्राप्तः । स च "न पदान्त-" इत्यादिसूत्रेण पदान्तविधौ स्थानिवद्भावनिषेधान्न भवतीति भावः ।

## प्रयोगसिद्धिप्रकारः

### गव्यम्

'गोर्विकारः' इत्यर्थे गोशब्दात् "गोपयसोर्यत्" इति यत्प्रत्ययेऽनुबन्धलोपे "गो + य' इति स्थिते "यथासंख्यमनुदेशः समानाम्" इति सूत्रसहकृतेन "वान्तो यि प्रत्यये" इति सूत्रेण गोशब्दावयवस्य ओकारस्य अवादेशे 'गव्य' इति जाते तद्धितान्तत्वात्प्रातिपदिकत्वे विभक्तिकार्ये 'गव्यम्' इति सिद्धम् ।

हर एहि/हरयेहि

'हरे + एहि' इति स्थिते "यथासंख्यमनुदेशः समानाम्" इति सूत्रसहकृतेन "एचोऽयवायावः" इत्यनेन 'हरे' इत्यस्य एकारस्य अयादेशे 'हरय् + एहि' इति जाते "लोपः शाकल्यस्य" इति यकारस्य वैकल्पिके लोपे 'हर एहि' इति रूपम् । यकारस्य लोपाभावपक्षे 'हरयेहि' इति रूपद्वयं निष्पन्नम् ।

नन्वत्र यकारलोपपक्षे 'हर + एहि' इति स्थिते "ओमाङोश्च" इति पररूपं कथं न स्यादिति चेन्न, "पूर्वत्रासिद्धम्" इत्यनेन "लोपः शाकल्यस्य" इति लोपविधायकसूत्रस्यासिद्धत्वेन यकारव्यवधानात्पररूपाप्राप्तेः ।

# अभ्यासः

१. **एतेषां प्रश्नानामुत्तराणि दत्त**

(क) अय्, अव्, आय्, आव् एतेषां यकारवकारयोर्लोपः कथं न भवति ?

(ख) 'गव्यूतिः' इत्यत्र केन वलोपः प्राप्तः, कथं च न भवति ?

(ग) 'धातोस्तन्निमित्तस्यैव' इत्यत्र 'तन्निमित्तस्यैव' इति किमर्थम् ?

(घ) "क्षय्यजय्यौ-" इति सूत्रे 'शक्यार्थे' इत्यनुक्तौ को दोषः स्यात् ?

(ङ) 'क्रय्यम्', 'क्रेयम्' इत्यनयोरर्थयोः को भेदः ?

(च) "लोपः शाकल्यस्य" इति कस्य लोपः ?

(छ) 'कानि सन्ति' इत्यत्र यणादेशः कथं प्राप्तः ?

२. **"वान्तो यि प्रत्यये", "धातोस्तन्निमित्तस्यैव" इत्यनयोरर्थयोः को भेदः ?**

३. **आशयं विशदयत**

"वान्तो-" इत्यत्र वकारात् "गोर्यूतौ-" इत्यत्र छकाराद् वा पूर्वभागे "लोपो व्योः-" इति लोपेन वकारः प्रश्लिष्यते । तेन श्रूयमाणवकारान्त आदेशः स्यात्, वकारो न लुप्यत इति यावत् ।

४. **"क्रय्यस्तदर्थे" इति सूत्रस्य नेपालीभाषायामर्थो लेखनीयः ।**

५. **हरये, क्षय्यम्, विष्ण इह, इति प्रयोगाः साधनीयाः ।**

६. **युक्तकथनेषु ✓ इति चिह्नम्, अयुक्तकथनेषु × इति चिह्नं योजयत**

(क) एचः स्थाने अय्, अव्, आय्, आव् एते आदेशाः क्रमेण भवन्ति ।

(ख) वान्तादेशशब्देन अव्, आव् इत्यनयोर्बोधः ।

(ग) 'गव्यूतिः' इत्यत्र "वान्तो यि-" इति सूत्रेण अवादेशः ।

(घ) जेतुं योग्यं जय्यं भवति ।

(ङ) 'हरौ + आश्रितः' इति स्थिते "एचोऽयवायावः" इति आवादेशः ।

(च) "लोपः शाकल्यस्य" इति अन्त्ययोर्यवयोर्लोपो भवति ।

(छ) "पूर्वत्रासिद्धम्" इति यकारवकारयोर्लोपस्यासिद्धिर्भवति ।

## ७. रिक्तस्थानं पूरयत

(क) 'पौ + अकः' इति स्थिते 'एचोऽयवायावः' इति ... आदेशः ।

(ख) 'गो + यूतिः' इत्यत्र ... इति सूत्रेण ... आदेशः ।

(ग) यादौ प्रत्यये परे धातोरेचः ... इति ... आदेशः ।

(घ) 'विष्णव् + इह' इति जाते ... इति सूत्रेण वकारस्य ... भवति ।

(ङ) 'श्रियै + उद्यतः' इति स्थिते ... इति सूत्रेण ... आदेशो भवति ।

(च) 'कौ + स्तः' इत्यत्र अल्लोपस्य ... इति सूत्रेण स्थानिवद्भावे ... आदेशः प्राप्तः ।

## अनुप्रयोगः

### अधस्तनवाक्यानि पठत

(क) **हरये** नमः ।

(ख) याजको **विष्णवे** हविः समर्पयति ।

(ग) **नायकश्**चलचित्रेऽभिनयं करोति ।

(घ) **पावको** वस्तूनि पवित्राणि करोति ।

(ङ) रामेण **गव्यं** निर्मितं वर्तते ।

## २. सन्धिं विधाय सन्धिविधायक सूत्रञ्च निर्दिशत

चे + अनम्, चोरे + अति, भौ + अकः, गै + अकः, बालौ + अत्र, साधो + ए, भो + अनम्, शै + इका, श्रौ + अकः, विष्णो + इह, वने + एकम्

## ३. सन्धिविच्छेदं कुरुत

नायिका, जयः, चिक्षाय, पवनः, नयनम्, द्वावेव, ग्राम एव, भानवे

## ४. अयादिसन्धियुतानि पदानि प्रयुज्यैकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।

अष्टमः पाठः

# गुण–वृद्धिसन्धिः

अधिकारसूत्रम्-

**एकः पूर्वपरयोः ६ । १ । ८४**

**इत्यधिकृत्य ।**

"अदेङ्गुणः" इत्यनेन सूत्रेण 'अ, ए, ओ' इत्येतेषां गुणसंज्ञा उक्ता, सम्प्रति गुणविधायकं सूत्रमाह-

गुणादेशविधायकं विधिसूत्रम्-

**आद् गुणः ६ । १ । ८७**

**अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायाम् । उपेन्द्रः । रमेशः । गङ्गोदकम् ।**

अत्र 'एकः पूर्वपरयोः' इत्यस्याधिकारत्वात् सम्पूर्णं सूत्रमनुवर्तते । 'आद्' इति पञ्चम्यन्तं पदम् । आद् = अवर्णात् । "इको यणचि" इत्यस्माद् 'अचि' इति सप्तम्यन्तं पदमनुवर्तते । तस्माद् अवर्णादचीत्यादिरर्थः सम्पन्नः । तेन 'उप + इन्द्रः' इति स्थिते पकाराद् अकारस्य ततः परस्य इकारस्य च पूर्वपरयोः स्थाने कण्ठतालुस्थानसाम्याद् एको गुणसंज्ञक एकारो भवति । अवर्णशब्देन दीर्घाकारादीनाम्, अचीति दीर्घादीनामपि बोधात्, 'रमा + ईशः' इत्यत्रापि स्थानकृतसादृश्येन एकार एव गुणः । एवं 'गङ्गा + उदकम्' इति स्थिते कण्ठोष्ठस्थानसाम्याद् ओकारः ।

'कृष्ण + ऋद्धिः', 'तव + लृकारः' इति स्थिते 'आद्गुणः' इत्यनेन त्रयोऽपि गुणाः (अ-ए-ओ) प्राप्ताः, तत्र अकारेस्य स्थानिनः त्रिभिरपि आदेशैः । कण्ठस्थानसाम्यम्, ऋकारलृकाराभ्याञ्च केनापि सह स्थानसाम्यं नास्ति । तत्र कतमो गुणः स्यादित्याकाङ्क्षायामाह -

रपरत्वविधायकं विधिसूत्रम्-

**उरण् रपरः १ । १ । ५१**

**'ऋ इति त्रिंशतः संज्ञा' इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्र अर्, 'तवल्कार' इत्यत्र अल् । "अचो रहाभ्याम्-" इति पक्षे द्वित्वम् ।**

"अणुदित्-" सूत्रे ऋकारस्त्रिंशद्तोभेदानां बोधक इत्युक्तम् । अत्र 'उः' इति 'ऋ' इत्यस्य षष्ठ्येकवचनान्तं रूपम्, तस्मात् "षष्ठी स्थाने-" इत्यतः 'स्थाने' इत्यस्य योगः । तथा च- ऋकारस्य स्थाने विधीयमानोऽण् रपरः सन् प्रवर्तते = प्रवृत्तो भवति इति सूत्रार्थः । 'रपर' इत्यत्र 'र' इति प्रत्याहारो विवक्षितः, तेन रलयोर्बोधः । 'अण्' पूर्वणकारेण प्रत्याहाराश्रयणम्, त्रिषु गुणेषु प्रसज्यमानेषु अकारांशे स्थानिभूतेन अकारेण, रेफांशे ऋकारेण,

लकारांशे लृकारेण च स्थानसाम्याच्च अकार-ऋकारयोः स्थाने 'अर्', अकार-लृकारयोः स्थाने च 'अल्' भवति, एकारौकारौ न भवत इत्याशयः ।

ऋध्-धातोः क्तिन्प्रत्यये 'ऋद्धिः' इति द्विधकारकं स्वाभाविकं रूपम्, अकारऋकारयोः 'अर्' इत्यादेशे रेफात्परस्य धकारस्य "अचो रहाभ्यां द्वे" इति द्वित्वपक्षे, द्वित्वाभावपक्षे च लोपविकल्पं मत्वाह-

झरो लोपविधायकं विधिसूत्रम्-

**झरो झरि सवर्णे ८ । ४ । ६५**

**हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि । द्वित्वाभावे लोपे सत्येकधम् । असति लोपे, द्वित्वलोपयोर्वा द्विधम् । सति द्वित्वे लोपे चासति त्रिधम् । कृष्णर्धिः – कृष्णर्द्धिः – कृष्णर्द्द्धिः । 'यण इति पञ्चमी मयः इति षष्ठी' इति पक्षे ककारस्य द्वित्वम् । लस्य तु "अनचि च" इति । तेन 'तवल्कारः' इत्यत्र रूपचतुष्टयम् ।**

**द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि । तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ॥**

अत्र "हलो यमाम्-" इत्यस्माद् 'हलः' इति 'लोपः' इति च, "झयो हः-" इत्यतः 'अन्यतरस्याम्' इति चानुवर्तन्ते । कृष्ण + ऋद्धिः - कृष्ण् (अ, ए, ओ) द्धिः (आद् गुणः) - कृष्ण् (अर्, ए, ओ) द्धिः (उरण् रपरः) - कृष्ण् अर् द्धिः (स्थानेऽन्तरतमः) - कृष्ण् अर् धिः (झरो झरि सवर्णे) - कृष्णर्धिः, झरो लोपाभावपक्षे- कृष्ण् अर् द्धिः - कृष्णर्द्धिः, रेफात् परस्य यरो द्वित्वपक्षे झरो लोपाभावपक्षे च- कृष्ण् अर् द्धिः - कृष्ण् अर् द् द्धिः (अचो रहाभ्यां द्वे) - कृष्णर्द्द्धिः इति रूपत्रयम् ।

तव + लृकारः - तव् (अ, ए, ओ) कारः (आद् गुणः) - तव् (अल्, ए, ओ) कारः (उरण् रपरः) - तव् अल् कारः (स्थानेऽन्तरतमः) - तव् अल् ल् कारः (अनचि च) - तवल्ल्कारः, 'यण इति पञ्चमी मय इति षष्ठी' इति पक्षे ककारस्यापि द्वित्वपक्षे- तव् अल् ल् क् कारः (यणो मयो द्वे वाच्ये) तवल्ल्क्कारः, लकारस्य द्वित्वाभावे ककारस्य द्वित्वपक्षे- तव् अल् क् कारः - तवल्क्कारः, लकार-ककारयोरुभयोरपि द्वित्वाभावे- तव् अल् कारः - तवल्कारः चेति चत्वारि रूपाणि सिद्ध्यन्ति । लस्य द्वित्वपक्षे, ककारस्य द्वित्वपक्षे, उभयोर्द्वित्वाभावे, उभयोर्द्वित्वपक्षे च पृथक् पृथग्रूपाणीति बुधैः = विद्वद्भिः, रूपचतुष्टयं बोध्यमिति कारिकाया आशयः ।

एकादेशवृद्धिविधायकं विधिसूत्रम्-

**वृद्धिरेचि ६ । १ । ८८**

**आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ।**

"आद् गुणः" इत्यत आदित्यनुवर्त्य, 'एकः पूर्वपरयोः' इत्यधिकृत्य च- अवर्णादेचि परे पूर्वपरयोर्वृद्धिरेकादेश इत्यर्थः । "आद् गुणः" इति गुणे प्राप्ते तं प्रबाध्यानेन वृद्धिरिति बोधनाय 'गुणापवादः' इत्युक्तम् । 'कृष्ण + एकत्वम्' इति स्थिते गुणं प्रबाध्य "वृद्धिरेचि" इति अकारैकारयोः कण्ठतालुस्थानकयोः स्थाने तथाविध एव ऐकार एकादेशः । एवं 'गङ्गा + ओघः', 'देव + ऐश्वर्यम्', 'कृष्ण + औत्कण्ठ्यम्' इत्यादावपि । यथा- गङ्गा + ओघः - गङ्ग् (आ, ऐ, औ) घः (वृद्धिरेचि) - गङ्ग् औ घः (स्थानेऽन्तरतमः) - गङ्गौघः ।

एकादेशवृद्धिविधायकं विधिसूत्रम्-

**एत्येधत्यूठ्सु ६ । १ । ८९**

**अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् । पररूपगुणापवादः । उपैति । उपैधते । प्रष्ठौहः । एजाद्योः किम् ? उपेतः । मा भवान्प्रेदिधत् । पुरस्तादपवादन्यायेनेयं वृद्धिः "एङि पररूपम्" इत्यस्यैव बाधिका, न तु "ओमाङोश्च" इत्यस्य । तेन 'अवैहि' इति वृद्धिरसाधुरेव ।**

एतिश्च एधतिश्च ऊठ् च, तेषु एत्येधत्यूठ्सु इति विग्रहः । 'एति' इति 'इण् गतौ', 'एधति' इति 'एध् वृद्धौ' धातू च विवक्षितौ । अत्र "इक्श्तिपौ धातुनिर्देशे" इत्यनेन श्तिपा निर्देशः । "यस्मिन्विधिस्तदादावल्ग्रहणे" इति तदादिग्रहणम्, तच्च एत्येधत्योरेव विशेषणम्, न तु ऊठः, असम्भवात् । अत्रापि पूर्ववद् 'आद्' इति 'एकः पूर्वपरयोः' इति चानुवर्त्त्य- अवर्णादेजाद्योरेत्येधत्योरित्यादिरर्थः सम्पन्नः । तथा च- 'उप + एति' इति स्थिते "एङि पररूपम्" इति पररूपे प्राप्ते तत् प्रबाध्यानेन वृद्धिः । एवम् 'उप + एधते' इत्यत्रापि । 'एति' इति इण्-धातोर्लटि प्रथमपुरुषैकवचने रूपम्, 'एधते' इति एध्-धातोर्लटि प्रथमपुरुषैकवचने रूपम् । प्रष्ठं वहतीति विग्रहे, वह्-धातोर्ण्विप्रत्यये तस्य सर्वापहारलोपे, उपधावृद्धौ 'प्रष्ठवाह्-शब्दः, तस्माद् द्वितीयाया बहुवचने शसि 'वाह ऊठ्' इति सम्प्रसारणसंज्ञके ऊठि कृते पूर्वरूपे 'प्रष्ठ + ऊहः' इति स्थिते "आद् गुणः" इति गुणे प्राप्ते तं प्रबाध्यानेन वृद्धिः । एजाद्योः किम् ? एत्येधत्योः एजाद्योरिति विशेषणाभावे 'उप + इतः' इत्यत्रापि वृद्धिः स्यात्, तद्वारणाय एजाद्योरिति । एवं 'मा भवान् प्र + इदिधत्' इत्यत्रापि । 'इदिधत्' इति णिजन्ताद् एध्-धातोर्लुङि तिपि रूपम् ।

ननु 'अव + आ + इहि' इति स्थिते अन्तरङ्गत्वाद् "आद् गुणः" इति गुणे कृते 'अव + एहि' इत्यत्र एकादेशस्य "अन्तादिवच्च" इति परादिवद्भावेन "आद्यन्तवदेकस्मिन्" इति व्यपदेशिवद्भावेन च इण्-धातोरेजादित्वे तस्मिन् परे "एङि पररूपम्" इति प्राप्तं पररूपं बाधित्वा "एत्येधत्यूठ्सु" इति वृद्धौ 'अवैहि' इति स्यात् । न च "ओमाङोश्च" इति पररूपेण 'अवेहि' इति इष्टं रूपं स्यादिति वाच्यम्, सा च वृद्धिर्यथा "एङि पररूपम्" इत्यस्य बाधिका तथैव "ओमाङोश्च" इत्यस्यापीति चेन्न, प्रकृते "एत्येधत्यूठ्सु" इत्युत्तरं कानिचित् सूत्राणि पठित्वा "एङि पररूपम्" इति पठितम्, ततः कानिचित् सूत्राणि पठित्वा "ओमाङोश्च" इति पठितम् । तस्मात् 'पूर्वपठिता अपवादा अव्यवहितानेवोत्तरान् विधीन् बाधन्ते, न तु व्यवहितान्' इत्यर्थकेन "पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्" इति न्यायेन "एत्येधत्यूठ्सु" इति "एङि पररूपम्" इत्यस्यैवापवादः, न तु "ओमाङोश्च" इत्यस्यापि । तेन 'अव + एहि' इति स्थिते "ओमाङोश्च" इति पररूपे 'अवेहि' इत्येवं रूपं साधु, 'अवैहि' इत्यस्यासाधुत्वमिति भावः । एकादेशवृद्धिप्रसङ्गे कानिचिद् वार्तिकान्याह-

**"अक्षादूहिन्यामुपसंख्यानम्" (वा.) अक्षौहिणी सेना ।**

अक्षशब्दाद् ऊहिनीशब्दे परे पूर्वपरयोरचोः वृद्धिरेकादेश इत्यर्थः । ऊहनमूहः, सोऽस्यास्तीति विग्रहे मत्वर्थीये इनिप्रत्यये, नान्तत्वाद् ङीपि ऊहिनीशब्दः । अक्षाणामूहिनीत्यर्थे 'अक्ष + ऊहिनी' इति स्थिते गुणे प्राप्ते अनेन वार्तिकेन वृद्धिः । "पूर्वपदात्संज्ञायामगः" इति णत्वम्, अक्षौहिणी = परिमाण विशेषविशिष्टा सेना ।

**"स्वादीरेरिणोः" (वा.) स्वैरः । स्वेनेरितुं शीलमस्येति स्वैरी । स्वैरिणी ।**

स्वशब्दाद् ईरशब्दे ईरिन्शब्दे च परे पूर्वपरयोर्वृद्धिरित्यर्थः । 'ईर् गतौ' इत्यस्माद् भावे घञ्प्रत्यये 'ईरः' इति

'स्व + ईरः' इति स्थिते गुणे प्राप्ते अनेन वृद्धिः 'स्वैरः' इति । स्वेन = स्वच्छन्देन (स्वतन्त्रेण) ईरितुं शीलमस्येति विग्रहे "सुप्यजातौ-" इति णिनि प्रत्यये 'स्व + ईरिन्' इति स्थिते गुणं प्रबाध्य अनेन वृद्धौ 'स्वैरी' इति प्रथमाया एकवचने सुविभक्तौ रूपम् । नान्तत्वात् स्त्रियां ङीपि- स्वैरिणी इत्यपि, स्वच्छन्दचारिणीत्यर्थः ।

**"प्रादूहोढोढ्येषैष्येषु' (वा.) प्रौहः । प्रौढः ।**

**"अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्" (प.) "व्रश्च-" इति सूत्रे राजेः पृथग् भ्राजिग्रहणाज्ज्ञापकात् । तेनोढग्रहणेन क्तान्तमेव गृह्यते, न तु क्तवत्वन्तस्यैकदेशः, प्रोढवान् । प्रौढिः । 'इष इच्छायाम्' तुदादिः, 'इष गतौ' दिवादिः 'इष आभीक्ष्ण्ये' क्र्यादिः, तेषां घञि ण्यति च 'एषः' 'एष्यः' इति रुपे, तत्र पररुपे प्राप्ते अनेन वृद्धिः । प्रैषः प्रैष्यः । यस्तु 'ईष उञ्छे' यश्च 'ईष गतिहिंसादर्शनेषु तयोर्दीर्घोपधत्वाद् ईषः, ईष्यः । तत्राद्गुणे- प्रेषः, प्रेष्यः ।**

'प्र' इत्युपसर्गाद् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु परेषु पूर्वपरयोर्वृद्धिरेकादेशः । 'ऊह वितर्के' इत्यस्माद् भावे घञि 'ऊह' इति, 'प्र + ऊह' इति स्थिते गुणं प्रबाध्य अनेन वार्तिकेन वृद्धिः । एवं 'वह् प्रापणे' इत्यस्मात् क्तप्रत्यये सम्प्रसारणे पूर्वरूपे हस्य ढत्वे "झषस्तथोः-" इति तकारस्य धत्वे तस्य ष्टुत्वेन ढकारे "ढो ढे लोपः" इति पूर्वढकारस्य लोपे "ढ्रलोपे पूर्वस्य-" इति दीर्घे 'ऊढः' इति । 'प्र + ऊढः' इति स्थिते अनेन वृद्धिः । ननु वह्-धातोः क्तवतुप्रत्यये ढत्वधत्वष्टुत्वढलोपेषु 'प्र + ऊढवत्' इति स्थिते ऊढ-शब्दस्य परत्वेन श्रवणाद् "प्रादूहोढ-" इति वृद्धिः स्यादिति चेन्न, "अर्थवद्-" इति परिभाषया अर्थवत एव ग्रहणमिति नियमेनार्थवतः क्तप्रत्ययस्यैव ग्रहणम्, क्तवतुप्रत्ययस्यैकदेशस्य क्तस्यानर्थकत्वाद् अत्र ऊढग्रहणेन ऊढवदित्यस्य ग्रहणं न स्यादिति भावः । भावकर्मणोर्विहितस्य क्तस्यार्थवत्वम्, कर्तरि विहितस्य 'क्तवतु' इत्यस्यार्थवत्त्वेऽपि तदेकदेशस्य 'क्त' इत्यस्यानर्थकत्वं बोध्यम् ।

**"ऋते च तृतीयासमासे" (वा.) सुखेन ऋतः सुखार्तः । तृतीया इति किम् ? परमर्तः ।**

तृतीयासमासे अवर्णाद् ऋतशब्दे परे पूर्वपरयोर्वृद्धिरित्यर्थः । 'ऋ गतौ' इत्यस्मात् क्तप्रत्यये 'ऋत' शब्दः, 'सुखेन ऋतः' इति विग्रहे तृतीयासमासे कृते 'सुख + ऋतः' इति स्थिते गुणं प्रबाध्य अनेन वृद्धौ, रपरत्वे 'आर्' इत्येकादेशे 'सुखार्तः' इति । 'परमश्चासौ ऋतश्च' इति कर्मधारये तु 'परम + ऋतः' इति स्थिते तृतीयासमासाभावादस्याप्रवृत्तौ गुणे रपरत्वे 'परमर्तः' इति रूपम् ।

**"प्रवत्सतरकम्बलवसनार्णदशानामृणे" (वा.) प्रार्णम्, वत्सतरार्णमित्यादि । ऋणस्यापनयनाय यदन्यद् ऋणं क्रियते तद् ऋणार्णम् । दशार्णो देशः नदी च दशार्णा ऋणशब्दो दुर्गभूमौ जले च ।**

प्र, वत्सतर, कम्बल, वसन, दश, ऋण इत्येतेषाम् अवर्णाद् ऋणशब्दे परे पूर्वपरयोर्वृद्धिरेकादेशो भवतीति वार्तिकार्थः । प्रगतमृणमिति विग्रहे गतिसमासे 'प्र + ऋणम्' इति स्थिते गुणं प्रबाध्य अनेन वार्तिकेन वृद्धौ, रपरत्वे, प्रार्णम् । वत्सतरः = शिशुवत्सः, तस्य ऋणमिति विग्रहे समासे कृते 'वत्सतर + ऋणम्' इति स्थिते पूर्ववद् वृद्धिः । एवं कम्बलार्णम्, वसनार्णम्, दशार्णम्, ऋणार्णम् इत्यादावपि बोध्यम् ।

एकादेशवृद्धिविधायकं विधिसूत्रम्-

**उपसर्गादृति धातौ ६ । १ । ९१**

**अवर्णान्तादुपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । उपार्च्छति । प्रार्च्छति ।**

अत्रानुवृत्तम् 'आत्' इति उपसर्गविशेषणम्, तदन्तविधिश्च। 'वृद्धिः' 'एकः पूर्वपरयोः' इत्यस्य चानुवृत्त्या अवर्णान्तादुपसर्गादित्यादिरर्थः। तेन 'उप + ऋच्छति', 'प्र + ऋच्छति' इति स्थिते गुणे प्राप्ते तं प्रबाध्यानेन वृद्धौ, रपरत्वे 'आर्' इत्येकादेशः। 'ऋच्छति' इति 'ऋ गतौ इत्यस्य लटि प्रथमपुरुषैकवचने रूपम्। अत्र 'प्रार् + च्छति' 'उपार् + च्छति' इत्यवस्थायाम्-

अन्तादिवद्भावविधायकमतिदेशसूत्रम्-

**अन्तादिवच्च ६।१।८५**

**योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात्। इति रेफस्य पदान्तत्वे–**

'एकः पूर्वपरयोः' इत्यनुवर्तते, यथासंख्यपरिभाषया 'अन्तादिवत्' इत्यस्य क्रमेणान्वयः। तेन पूर्वपरयोर्भवन् एकादेशः पूर्वस्यान्तवत् परस्यादिवत्स्यादित्यर्थः। प्रकृते च 'आर्' इत्येकादेशस्य पूर्वान्तवद्भावेन (पूर्वस्य = उपसर्गस्य अन्तवत् = अवर्णवत्) रेफस्य पदान्तत्वे-

विसर्गादेशविधायकं विधिसूत्रम्-

**खरवसानयोर्विसर्जनीयः ८।३।१५**

**खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते– अन्तवद्भावेन पदान्तरेफस्य न विसर्गः, "उभयथर्क्षु" (सू.) "कर्तरि चर्षिदेवतयोः" (सू.) इत्यादिनिर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे "धातौ" इति योगविभागेन पुनर्वृद्धिविधानार्थम् "ऋत्यकः" (सू.) इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति।**

अत्र "रो रि" इत्यस्माद् 'र' इति षष्ठ्यन्तमनुवर्तते, तच्च "पदस्य" इत्यधिकृतस्य विशेषणम्। "येन विधिः-" इति तदन्तविधिः। तथा च- खरि अवसाने च परे रेफान्तस्य पदस्य विसर्जनीय इत्यर्थः। "अलोऽन्त्यस्य" इति अन्त्यस्य भवति। अनेनात्र रेफस्य विसर्गे प्राप्ते- 'अन्तवद्भावेन पदान्तत्वं प्राप्तस्य रेफस्य विसर्गो न भवती'ति नियमेन निषेधः। उक्तनियमे किं प्रमाणमिति चेदुच्यते- 'उभयथा + ऋक्षु' इति स्थिते गुणे रपरत्वे 'उभयथर् क्षु' इति जाते यदि चान्तवद्भावेन रेफस्य पदान्तत्वं स्यात्तर्हि तत्रभवान् पाणिनिरपि उक्तसूत्रे विसर्गमेवोच्चारयेत्। अत्र विसर्गाभावदर्शनाद् विज्ञायते यद्- अन्तवद्भावेन रेफस्य पदान्तत्वं न भवतीति। नन्वत्र सूत्रे 'धातौ' इति पदं व्यर्थम्, "उपसर्गाः क्रियायोगे" इति क्रियायोगे सत्येव उपसर्गसंज्ञाविधानेन उपसर्गग्रहणादेव 'धातौ' इत्यर्थस्य सिद्धत्वादिति चेन्न, उपसर्गेण धातोः आक्षेपे = अन्यथानुपपत्तिरूपार्थापत्तितो लाभे सत्यपि 'धातौ' इति योगविभागं कृत्वा तेन पुनर्वृद्धिविधानार्थं तस्यावश्यकत्वात्। तेन "ऋत्यकः" इत्यनेन प्राप्तः पाक्षिकः प्रकृतिभावोऽप्यत्र न भवति। अयमाशयः- अत्र "उपसर्गादृति" इति पृथक् सूत्रम्, "धातौ" इति पृथक् सूत्रम्। "उपसर्गादृति" इत्यत्र धातोराक्षेपेणैव धातावित्यर्थलाभः, 'धातौ' इत्युत्तरसूत्रे 'उपसर्गादृति' इत्यनुवर्तते। तथा च पूर्वसूत्रसमानार्थकमेव "धातौ" इति सूत्रमपि स्यात्। एतेन परमपि "ऋत्यकः" इति सूत्रम्- अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परेऽपि पाक्षिकप्रकृतिभावविधानार्थं प्राप्तं पुनर्वृद्धिविधानसामर्थ्याद् बाध्यते।

विभाषया वृद्धिविधायकं विधिसूत्रम्-

**वा सुप्यापिशलेः ६।१।९२**

**अवर्णान्तादुपसर्गाद् ऋकारादौ सुब्धातौ परे वृद्धिरेकादेशो वा स्यात् । आपिशलिग्रहणं पूजार्थम् । प्रार्षभीयति - प्रर्षभीयति । सावर्ण्याद् लृवर्णस्य ग्रहणम्, उपाल्कारीयति - उपल्कारीयति । 'तपरत्वाद्दीर्घे न' उप ॠकारीयति, उपर्कारीयति ।**

"उपसर्गादृति धातौ" सम्पूर्णं सूत्रम्, पूर्वसूत्रेभ्य 'आत्' इति 'वृद्धिः' इति चानुवर्तन्ते । सुप्-शब्देन सुबन्तप्रकृतिको धातुर्विवक्षितः । तथा च- अवर्णान्तादुपसर्गाद् ऋकारादौ सुबन्तप्रकृतिके धातौ परतः पूर्वपरयोरचो वृद्धिरेकादेश इति सूत्रार्थः । सूत्रे आपिशलिग्रहणम् आपिशलिसंज्ञकाचार्यस्याप्ययमर्थः सम्मत इति प्रदर्शनेन तस्य सम्मानार्थम् । ऋषभमात्मन इच्छतीत्यर्थे 'ऋषभ अम्' इति स्थिते "सुप आत्मनः क्यच्" इति क्यचि "सनाद्यन्ता धातवः" इति धातुसंज्ञायां "सुपो धातु-" इति सुपो लुकि "क्यचि च" इति ईत्वे 'ऋषभीय' इत्यस्माल्लटि, तिपि, शपि पररूपे 'ऋषभीयति' इति रूपम् । 'प्र + ऋषभीयति' इति स्थिते गुणे प्राप्ते अनेन वृद्धिरेकादेशो रपरत्वञ्च, वृद्ध्यभावपक्षे- गुणो रपरत्वञ्च । एवं लृकारमात्मन इच्छतीत्यर्थे पूर्ववत् क्यजादिषु 'लृकारीयति' इति । 'उप + लृकारीयति' इत्यत्र वृद्धौ लपरत्वम् । ॠकारादावपि वृद्धिमाशङ्क्याह- 'ॠति' इति तपरकरणेनोच्चार्यमाणेन समकालस्यैव ग्रहणाद् ॠकारे परे वृद्धिविकल्पोऽयं न भवतीति भावः । तेन 'उप + ॠकारीयति' इति स्थिते वृद्धिरियं न प्रवर्तते, गुणे रपरत्वे- उपर्कारीयतीति साधु ।

## विशेषविवरणम्

१. "अन्तादिवच्च" इति सूत्रे कीदृक् पूर्वान्तवद्भावः परादिवद्भावश्चेत्युच्यते- एकादेशस्य द्वौ वर्णौ स्थानिनौ भवतः, पूर्वः परश्च । तयोर्भवन्नेकादेशः पूर्वस्य = प्रथमस्थानिघटितसमुदायस्य योऽन्तः = पूर्वस्थानी तत्कार्यकारी भवति, परस्य = द्वितीयस्थानिघटितसमुदायस्य य आदिः = परस्थानी तत्कार्यकारी भवतीत्येवं विवक्षितः । तेन पूर्वस्य परस्य च समुदायस्य अन्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्राप्ताः प्रातिपदिकत्व-पदत्व-सुप्त्वादयः ते कृतैकादेशस्यापि भवन्तीत्यर्थो निष्पन्नः । यथा पूर्वान्तवत्त्वे- क्षीरपशब्दात् तृतीयैकवचने 'टा' इत्युत्तरपदस्य पूर्वान्तवद्भावेन एकाच्त्वाद् "एकाजुत्तरपदे णः" इति नस्य णत्वे 'क्षीरपेण' इति भवति । परादित्वे- खट्व-शब्दाद् "अजाद्यतष्टाप्' इति टापि सवर्णदीर्घे 'खट्वा' इत्यस्मात् सुविभक्तौ 'खट्वा स्' इति स्थिते सवर्णदीर्घेण विहितस्य आकारस्य परादिवद्भावेन टाप्त्वात् ततः परस्य सोर्हल्ङ्यादिलोपः ।

## प्रयोगसिद्धिप्रकारः

### कृष्णर्द्धिः

'कृष्ण + ऋद्धिः' इति स्थिते "उरण् रपरः", स्थानेऽन्तरतमः' इति सूत्रद्वयसहकृतेन "आद् गुणः" इत्यनेन गुणे, अकार-ऋकारयोः स्थाने 'अर्' इत्येकादेशे 'कृष्ण् अर् द्धिः' इत्यवस्थायां वर्णयोगे 'कृष्णर्द्धिः' इति रूपम् । "अचो रहाभ्यां द्वे" इति रेफात्परस्य पूर्वधकारस्य विकल्पेन द्वित्वे "झरो झरि सवर्णे" इति वैकल्पिके तस्य लोपेऽपि इदमेव रूपम् । द्वित्वाभावे लोपे च सति 'कृष्णर्धिः' इति एकधं रूपम् । सति द्वित्वे लोपे चासति 'कृष्णर्द्द्धिः' इति त्रिधं रूपमिति रूपत्रयं सिद्धम् ।

### उपार्च्छति

'उप + ऋच्छति' इति स्थिते "उपसर्गाः क्रियायोगे" इति सूत्रेण 'उप' इत्यस्योपसर्गसंज्ञायां "भूवादयो धातवः" इत्यनेन 'ऋच्छति' इत्यस्य धातुसंज्ञायाम् "आद् गुणः" इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य "उरण् रपरः" इति सूत्रसहकृतेन "उपसर्गादृति धातौ" इत्यनेन त्रिषु वृद्धिसंज्ञकेषु प्रसज्यमानेषु रेफशिरस्कस्य आकारस्य स्थानिभूतेन आकारेण आकारांशे ऋकारेण रेफांशे स्थानसाम्याद् अकार-ऋकारयोः स्थाने 'आर्' वृद्धौ 'उप् आर् च्छति' इति जाते, वर्णसम्मेलने 'उपार्च्छति' इति सिद्धम्। नन्वत्र "अन्तादिवच्च" इति सूत्रेण 'उपार्' इत्यस्यावयवस्य 'आर्' इत्येकादेशस्य पूर्वान्तवद्भावेन रेफस्य पदान्तत्वात् "खरवसानयोर्विसर्जनीयः" इति तस्य विसर्गः कथं न स्यादिति चेन्न, "अन्तवद्भावेन पदान्तरेफस्य न विसर्गः" इति वचनेन निषेधात्। तद्वचने प्रमाणन्तु "उभयथर्क्षु" इति पाणिनिसूत्रमेव।

## अभ्यासः

### १. अधो लिखितानां प्रश्नानामुत्तराणि दातव्यानि

(क) 'रमा + ईशः' इत्यत्र कथमेकार एव गुणः ?

(ख) 'तवल्कारः' इत्यत्र कथं चत्वारि रूपाणि ?

(ग) 'कृष्ण + एकत्वम्' इति स्थिते केन सूत्रेण किं भवति ?

(घ) 'प्रष्ठौहः' इत्यत्र सन्धिविच्छेदः कः ?

(ङ) "एत्येधत्यूठ्सु" इत्यत्र एजादिग्रहणं किमर्थम् ?

(च) 'अक्षौहिणी' इत्यत्र केन सूत्रेण णत्वं भवति ?

(छ) "वा सुप्यापिशलेः" इत्यत्र आपिशलिग्रहणं किमर्थम् ?

### २. अधस्तनानामुद्धरणानामाशयो वर्णनीयः

'यण इति पञ्चमी मय इति षष्ठी' इति पक्षे ककारस्य द्वित्वम्।

पुरस्तापवादन्यायेनेयं वृद्धिः "एङि पररूपम्" इत्यस्यैव बाधिका, न तु "ओमाङोश्च" इत्यस्यापि, तेन 'अवैहि' इति वृद्धिरसाधुरेव।

### ३. अधस्तनानां वार्तिकानामर्थं विलिख्य उदाहरणानि प्रदर्शनीयानि

(क) अक्षादूहिन्यामुपसंख्यानम्

(ख) प्रादूहोढोढ्येषैष्येषु

(ग) प्रवत्सतरकम्बलवसनार्णदशानामृणे

४. “एत्येधत्यूठ्सु” इत्यस्य “अन्तादिवच्च” इत्यस्य चार्थं नेपालीभाषायां लिखत ।

५. तवल्कारः, उपैति, प्रौढः, प्रार्षभीयति एते प्रयोगाः साधनीयाः ।

६. ‘प्र + ऊढवान्’ इति स्थिते “प्रादूहोढोढ्येषैष्येषु” इति वृद्धिः कथं न भवति ?

७. युक्तकथनेषु ✓ इति चिह्नं तथाऽयुक्तकथनेषु ✗ इति चिह्नं योजनीयम्

(क) ‘तीर्थ + उदकम्’ इत्यत्र “आद् गुणः” इति गुणो भवति ।

(ख) ‘प्रष्ठ + ऊहः’ इति स्थिते गुणो विधीयते ।

(ग) ‘अव + एहि’ इति स्थिते “एत्येधत्यूठ्सु” इति वृद्धिः ।

(घ) “स्वादीरेरिणोः” इति वार्तिकं वृद्धिविधायकम् ।

(ङ) “अन्तादिवच्च” इत्यनेन परस्यान्तवद् भवति ।

(च) “खरवसानयोः-” इति सूत्रेण खरि अवसाने च परे पदान्तरेफस्य विसर्गः ।

(छ) “वा सुप्यापिशलेः” इति अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे वृद्धिर्भवति ।

८. रिक्तस्थानं पूरयत

(क) “उरण् रपरः” इति सूत्रेण ... स्थाने विधीयमानोऽण् ... प्रवर्तते ।

(ख) ‘उप + एधते’ इत्यत्र ... प्रबाध्य ... सूत्रेण वृद्धिः ।

(ग) ‘अक्ष + ऊहिनी’ इति स्थिते ... इत्यनेन वृद्धौ ... इति नस्य णत्वम् ।

(घ) “उपसर्गादृति धातौ” इति ... उपसर्गाद् ... धातौ परे वृद्धिरेकादेशः ।

(ङ) “अर्थवद्ग्रहणे नानर्थकस्य-” इत्यत्र ... इति सूत्रे ... ज्ञापकम् ।

(च) ... इति स्थिते ... प्रबाध्य ... इत्यनेन वृद्धौ ‘वत्सतरार्णम्’ इति ।

(छ) ‘प्र + ऋषभीयति’ इति स्थिते वृद्ध्यभावे ... इति गुणे ... इति रूपम् ।

## नवमः पाठः

# पररूप–दीर्घसन्धिः

एकादेशपररूपविधायकं विधिसूत्रम्-

**एङि पररूपम् ६ । १ । ९४**

**अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् । प्रेजते, उपोषति । इह "वा सुपि" इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तेनैङादौ सुब्धातौ वा, उपेडकीयति – उपैडकीयति । प्रोघीयति – प्रौघीयति ।**

अत्र 'उपसर्गादृति धातौ' इति, 'आद्' इति चानुवर्तेते । आदिति उपसर्गादित्यस्य विशेषणम्, तदन्तविधिः । 'एङि' इत्यत्र "यस्मिन्विधिः-" इति परिभाषया तदादिग्रहणाद्- अवर्णान्तादित्यादिरर्थः । 'एजृ दीप्तौ' इत्यस्य लटि प्रथमपुरुषैकवचने रूपम् 'एजते' इति । 'प्र + एजते' इति स्थिते गुणवृद्धी प्रबाध्य अनेन पररूपम् एकार एकादेशः । 'उष् दाहे' लटि प्रथमपुरुषैकवचने 'ओषति' इति रूपम् । 'उप + ओषति' इत्यत्रापि पूर्ववत् । ननु 'उप + एडकीयति इत्यत्रानेन नित्यमेव पररूपं स्यात्, इष्यते च वृद्धिरपि । अत आह- इह = अस्मिन् सूत्रे "वा सुपि-" इति पदद्वयं पूर्वसूत्रादनुवर्त्य वाक्यभेदेन = भिन्नवाक्यतया व्याख्येयम्, तत्र "एङि पररूपम्" इति प्रथमं वाक्यम्, "वा सुपि" इति द्वितीयम् । प्रथमवाक्यस्य पूर्वोक्तार्थः, द्वितीयस्य तु- अवर्णान्तादुपसर्गाद् एङादौ सुब्धातौ परे पररूपं वा स्यादित्यर्थः । तेन = उक्तप्रकारेण वाक्यभेदाश्रयणेन, एङादौ सुब्धातौ पाक्षिकम्, अन्यत्र नित्यं पररूपमिति लब्धम् । तथा च- एडकम् = मेषमात्मन इच्छतीत्यर्थे एडक-शब्दात् "सुप आत्मनः-" इति क्यचि "क्यचि च" इति ईत्वे लटि प्रथमपुरुषैकवचने 'एडकीयति' इति रूपम् । 'उप + एडकीयति' इति स्थिते पाक्षिके पररूपे- 'उपेडकीयति' इति, पररूपाभावे "वृद्धिरेचि" इति वृद्धौ 'उपैडकीयति' इति रूपद्वयम् ।

**"एवे चानियोगे"** (वा.) **नियोगोऽवधारणम् । क्वेव भोक्ष्यसे, अनवक्लृप्तावेवशब्दः । अनियोगे किम् ? तवैव ।**

नियोगः = अवधारणम् = अन्ययोगव्यवच्छेदः । अवर्णाद् निर्धारणभिन्नेऽर्थे य एवशब्दः तस्मिन् परे पूर्वपरयोः पररूपमेकादेशः स्यादिति वार्तिकार्थः । 'क्व + एव' इति स्थिते वृद्धिं प्रबाध्य अनेन वार्तिकेन पररूपम् । अत्र अनवक्लृप्तौ = अनवधारणे एवशब्दः प्रयुक्तः । तेन 'तव + एव' इत्यत्र एवशब्दस्य निर्धारणार्थत्वाद् वृद्धिरेव, न तु पररूपम् ।

टिसंज्ञाविधायकं सूत्रम्-

**अचोऽन्त्यादि टि १ । १ । ६४**

**अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ।**

'अच' इति निर्धारणे षष्ठी, जातावेकवचनञ्च । अन्ते भवः अन्त्यः, अन्त्य आदिर्यस्य तद् अन्त्यादि । तथा च- अचां मध्ये योऽन्त्यः स आदिर्यस्य तत्समुदायस्य टिसंज्ञा भवतीत्यर्थः ।

**"शकन्ध्वादिषु पररुपं वाच्यम्" (वा.) । "तच्च टेः" (ग.सू.) । शकन्धुः । कर्कन्धुः । कुलटा ।**

शकन्ध्वादिगणपठितेषु शब्दसिद्धिविषये पूर्वपरयोः पररूपं वक्तव्यमित्यर्थः । तच्च = पररूपम्, टेः = टिसंज्ञकस्य । तेन शकादिशब्दानां टेरचि परे टेश्च परस्याचश्च स्थाने पररूपमेकादेशः । 'शकानाम् = देशविशेषाणाम् अन्धुः = कूपः' इति विग्रहः, 'शक + अन्धुः' इति स्थिते "अकः सवर्णे दीर्घः' इति सवर्णदीर्घे प्राप्ते तं प्रबाध्य अनेन वार्तिकेन टिसंज्ञकस्यान्त्याकारस्य पररूपम् । अत्र अन्त्योऽच् ककारादकारः तदादिः = स एव अकारः, "आद्यन्तवदेकस्मिन्" इति सूत्रेणेति बोध्यम् । एवं 'कर्काणां = राज्ञाम् अन्धुः' इति विग्रहे- कर्क + अन्धुः - कर्कन्धुः । 'कुलस्य अटा' इति विग्रहे- कुल + अटा - कुलटा ।

**"सीमन्तः केशवेशे" (वा.) सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः ।**

शकन्ध्वादिगणान्तर्गतं वार्तिकमेतत् । केशानां वेशः सन्निवेशविशेषः, तस्मिन्नर्थे गम्ये सीमन्-शब्दस्य टेः 'अन्' इत्यस्य पररूपमित्यर्थः । 'सीम्नोऽन्तः' इति विग्रहे- सीमन् + अन्तः - सीम् अन्तः - सीमन्तः = केशेषु वर्त्म । 'सीमान्तः' इत्यस्य तु ग्रामान्तप्रदेशोऽर्थः । 'मनस ईषा' इति विग्रहे- मनस् + ईषा - मन् + ईषा - मनीषा, 'अस्' इति टिभागस्य पररूपम् । मनीषा = बुद्धिः । एवं 'हल + ईषा', 'लाङ्गल + ईषा' इत्यत्र टिसंज्ञकस्याकारस्य पररूपम् । 'पतत् + अञ्जलिः' इति स्थिते टेः 'अत्'भागस्य पररूपम् । पतन् अञ्जलिर्यस्मिन्नमस्कार्यत्वात् स पतञ्जलिरित्यर्थः । अथवा 'अञ्जलेः पतन्' इति विग्रहे मयूरव्यंसकादित्वात्समासो बोध्यः ।

**"सारङ्गः पशुपक्षिणोः (ग.सू.) साराङ्गोऽन्यः । आकृतिगणोऽयम्, मार्तण्डः ।**

पशुवाच्ये, पक्षिवाच्ये सति सार-शब्दाद् अङ्गशब्दे परे पूर्वपरयोः पररूपमित्यर्थः । 'सार + अङ्ग' इति स्थिते सवर्णदीर्घं प्रबाध्य पररूपम् । साराणि = बलवन्त्यङ्गानीत्यर्थे तु सवर्णदीर्घेण 'साराङ्गः' इत्येव । शकन्ध्वादिगणस्याऽऽकृतिगणत्वम्मत्त्वा आह- आकृतिगणोऽयमिति । आकृत्या = एवंजातीयकतया गण्यन्ते = परिचीयन्ते शब्दा यस्मिन् स आकृतिगण इत्यभिप्रायः । शकन्ध्वादेराकृतिगणत्वादेव 'मार्तण्ड' इत्यस्य सिद्धिः । मृतमण्डं यस्य स मृतण्डः = कश्चिद् ऋषिः । 'मृत + अण्ड' इति स्थिते सवर्णदीर्घं प्रबाध्य "शकन्ध्वादिषु-" इति पररूपम् । ततोऽपत्येऽर्थे अण्प्रत्यये 'मार्तण्डः' इति रूपम् ।

**"ओत्वोष्ठयोः समासे वा" (वा.) स्थूलोतुः - स्थूलौतुः । बिम्बोष्ठः - बिम्बौष्ठः । समासे किम् ? तवौष्ठः ।**

अवर्णाद् ओतु-शब्दे ओष्ठ-शब्दे च परे समासे पाक्षिकं पररूपमित्यर्थः । ओतुः = बिडालः । स्थूल + ओतुः - स्थूल् + ओतुः - स्थूलोतुः, वृद्धिं बाधित्वाऽनेन वार्तिकेन विकल्पेन पररूपम्, पक्षान्तरे- स्थूल + ओतुः - स्थूल् औ तुः (वृद्धिरेचि) - स्थूलौतुः । एवमेव 'बिम्बङ्गलवद् रक्तवर्णौ ओष्ठौ यस्ये'ति विग्रहे- बिम्ब + ओष्ठः - बिम्बोष्ठः/बिम्बौष्ठः । 'तव + ओष्ठः' इत्यत्र तु समासाभावादस्य प्रवृत्तिर्न, वृद्धौ 'तवौष्ठः' इति ।

पररूपादेशविधायकं विधिसूत्रम्-

**ओमाङोश्च ६ । १ । ९५**

**ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायोंनमः । शिव एहि - शिवेहि ।**

ओम् च आङ् च तयोः ओमाङोः । अत्र 'आद्' 'पररूपम्' 'एकः पूर्वपरयोः' इति चानुवर्तन्ते । ततश्च-

अवर्णाद् ओमि आङि च परे पररूपमेकादेश इत्यर्थः । 'शिवाय + ओंनमः' इति स्थिते वृद्धिं प्रबाध्य पररूपम् । 'शिव + आ + इहि' इति स्थिते "धातूपसर्गयोः कार्यमन्तरङ्गमन्यत्कार्यं बहिरङ्गम्, असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषया प्रथमम् 'आद् गुणः' इति गुणे 'शिव+एहि' इति जाते, ततो वृद्धिं प्रबाध्य "अन्तादिवच्च" इति पूर्वान्तवद्भावे माते सूत्रेण पररूपम् ।

पररूपैकादेशविधायकं विधिसूत्रम्-

**अव्यक्तानुकरणस्यात इतौ ६ । १ । ९८**

**ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात् । पटत् इति – पटिति । "एकाचो न"** ( **वा.**) **श्रदिति ।**

अव्यक्तः = अस्फुटवर्णविभागः वृक्षपतनादिजनितध्वनिः, तस्यानुकरणम् = तत्प्रतिपादकस्तत्सदृशः शब्दः, तस्यावयवो यः 'अत्'शब्दः तस्माद् इतिशब्दे परे पररूपमेकादेशः इत्यर्थः । 'पटत् + इति' इति स्थिते पररूपम् । अत्र सूत्रेऽनेकाज्ग्रहणं कर्तव्यमित्यभिप्रेत्याह एकाच इति - एकः अच् यस्य स एकाच्, तथाभूतस्यानुकरणस्य उक्तं पररूपं नेत्यर्थः । 'श्रत् + इति' इत्यत्र तु एकाच्त्वात्पररूपं न, जश्त्वे- श्रदिति । नन्वव्यक्तानुकरणस्य 'पटत्' इत्यस्य द्विरुच्चारणे 'पटत्पटेति' रूपमिष्यते, "अव्यक्तानुकरणस्यात इतौ" इति पररूपे 'पटत्पटिति' इत्येव स्यादत आह-

पररूपनियामकं सूत्रम्-

**नाम्रेडितस्यान्त्यस्य तु वा ६ । १ । ९९**

**आम्रेडितस्य प्रागुक्तं न स्यात्, अन्त्यस्य तु तकारमात्रस्य वा स्यात् । "डाचि बहुलं द्वे भवतः"** (**वा.**) **इति बहुलग्रहणाद् द्वित्वम् ।**

आम्रेडितस्य अव्यक्तानुकरणस्यावयवो यः 'अत्'शब्दः तस्य इतिशब्दे परे पररूपं न स्यात्, अत्शब्दान्तस्य तकारस्यैव इकारस्य च पररूपं वा स्यादित्यर्थः । 'पटत् + इति' इत्यत्र "डाचि बहुलं द्वे भवतः" इति वार्तिके बहुलग्रहणाद् द्वित्वम् । बहूनर्थान् लाति = गृह्णातीति व्युत्पत्तेर्बहुलग्रहणमधिकविधानार्थम् । अत्र 'आम्रेडितम्' इति किमिति जिज्ञासायामाह-

आम्रेडितसंज्ञाविधायकं सूत्रम्-

**तस्य परमाम्रेडितम् ८ । १ । २**

**द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् । पटत्पटेति ।**

"सर्वस्य द्वे" इति सूत्रानन्तरमस्य सूत्रस्य पाठादत्र 'तस्य' इत्यनेन द्विरुक्तस्य इति बोध्यम् । ततश्च 'पटत् पटत् इति' इति जाते द्वितीयस्य 'पटत्' इत्यस्य अनेन आम्रेडितसंज्ञायां "नाम्रेडितस्य-" इति तकारस्य इकारस्य च पररूपे 'पटत्पट + इति' इत्यवस्थायाम् 'आद् गुणः' इति गुणः । पररूपाभावपक्षे- 'पटत्पटत् + इति' इत्यत्र तकारस्य जश्त्वेन दकारविधायकं सूत्रम्-

जश्त्वविधायकं विधिसूत्रम्-

**झलां जशोऽन्ते ८ । २ । ३९**

**पदान्ते झलां जशः स्युः । पटत्पटदिति ।**

अत्र "पदस्य" इत्यस्याधिकारात् पदान्ते झलां जश्त्वमित्यर्थः । अनेन स्थानसाम्यात् तकारस्य स्थाने जश्त्वेन दकारे 'पटत्पटदिति' इति रूपम् ।

सवर्णदीर्घादेशविधायकं विधिसूत्रम्-

**अकः सवर्णे दीर्घः ६ । १ । १०१**

**अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । अचि किम् ? कुमारी शेते । "नाज्झलौ" इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः, ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः । अकः किम् ? हरये । "अकोऽकि दीर्घः" इत्येव सुवचम् ।**

अत्र "इको यणचि" इत्यतः 'अचि' इत्यनुवर्तते, 'एकः पूर्वपरयोः' इति च । सूत्रे 'अकः' इति पञ्चम्यन्तम्, अत आह- अकः सवर्णेऽचि परे इत्यादि । ततो 'दैत्य + अरिः' इति स्थिते पूर्वपरयोः अकारयोर्दीर्घ आकारः, स च स्थानकृतसादृश्येनेति बोध्यम् । एवं 'श्री + ईशः, विष्णु + उदयः' इत्यादावपि स्थानसाम्येन पूर्वपरयोः ईकारयोः ईकार एकादेशः, उकारयोः ऊकार एकादेशः ।

नन्वत्र 'अकः सवर्णे परे पूर्वपरयोर्दीर्घः स्यात्' इत्यर्थेनैव 'दैत्यारिः' इत्यादिसिद्धेः "इको यणचि" इत्यस्माद् 'अचि' इत्यस्यानुवृत्तिर्व्यर्थैवेति चेन्न, तदभावे 'कुमारी + शेते' इत्यत्र ईकारशकारयोः तालुस्थानविवृतप्रयत्नसाम्येन सवर्णतया तयोर्दीर्घ ईकार एकादेशः स्यात्, तन्निवृत्त्यर्थम् अचीत्यस्यावश्यकत्वात् । न च ईकारशकारयोः स्थानप्रयत्नसाम्येऽपि नाज्झलौ' इति निषेधेन 'अकः सवर्णे' इत्यस्याप्रवृत्तेः अचीत्यनुवृत्तिर्व्यर्थैवेति वाच्यम्, "आदिरन्त्येन-" इति वार्णसमाम्नायिकानामेव अच्शब्दवाच्यत्वबोधनेन तेषामेव "नाज्झलौ" इति सावर्ण्यनिषेधेन ईकारशकारयोः सावर्ण्यसत्वात् 'कुमारी + शेते' इत्यत्रातिप्रसङ्गात् । न च वार्णसमाम्नायिकानामेव अच्शब्दवाच्यत्वेऽपि अणुदित्सूत्र-बलेन अच्शब्दोपस्थितैः अकारादिभिर्दीर्घादीनामपि ग्रहणं भवतीति वाच्यम्, "नाज्झलौ" इति प्रवृत्तिदशायां "अणुदित्-" इति ग्रहणकशास्त्रस्य निष्पत्तित्वाभावात् । निष्पत्तित्वम् = पूर्णतयार्थबोधक्षमत्वम् । एवं च-"प्रकल्प्यापवादविषयमुत्सर्गोऽभिनिविशते" इति नियमेन "नाज्झलौ" इति निषेधसहितस्य "तुल्यास्य-" सूत्रस्य प्रवृत्तेः प्राग् "अणुदित्-" इति अनिष्पन्नम्, तस्माद् "नाज्झलौ" इति अज्ग्रहणेन दीर्घादीनां ग्रहणाभावे ईकारशकारयोः सावर्ण्यनिषेधाभावेन तयोः सावर्ण्यसत्वात् 'कुमारी शेते' इत्यत्र "अकः सवर्णे दीर्घः" इति प्राप्तौ तन्निवृत्त्यर्थम् 'अचि' इत्यनुवृत्तेरावश्यकत्वम् । एवञ्च- सूत्रे 'अकः' इत्यस्याभावे 'हरे + ए' इत्यत्रापि एकारात्सवर्णेऽचि परे सवर्णदीर्घः स्यात् । वस्तुतस्तु सवर्णग्रहणस्य अचीत्यनुवृत्तेर्गौरवं च परिहर्तुम् "अकोऽकि दीर्घः" पठितव्यम्, तत्र यथासंख्याश्रयणाद् 'उपेन्द्रः' इत्यादौ नातिप्रसङ्ग इति भावः ।

**"ॠति सवर्णे ॠ वा" (वा.) होतॄकारः - होतृकारः ।**

अकः सवर्णे ॠति परे पूर्वपरयोः 'ॠ' इत्येकादेशो वा स्यादित्यर्थः । तेन 'होतृ + ॠकारः' इति स्थिते द्वयोः ॠकारयोः स्थाने अनेन वार्तिकेन नृसिंहवद् विलक्षणो रेफद्वयवान् ॠकारो भवति । तदभावे पूर्वसूत्रेण सवर्णदीर्घे- होतृकारः ।

**“लृति सवर्णे लृ वा”** (वा.) **होत्लृकारः। पक्षे ऋकारः सावर्ण्यात् – होतृकारः। “ऋति ऋ वा” “लृति लृ वा” इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफौ, तयोरेका मात्रा। अभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ, शेषं प्राग्वत्। इहोभयत्रापि “ऋत्यकः” इति पाक्षिकः प्रकृतिभावो वक्ष्यते।**

अकः सवर्णे लृति परे पूर्वपरयोः ‘लृ’ इत्येकादेशो वा स्यादित्यर्थः। ‘होतृ + लृकारः’ इति स्थिते अनेन ऋकारलृकारयोः स्थाने विलक्षणो लकारद्वयवान् लृकार आदिश्यते। तदभावे ऋलृवर्णयोः सावर्ण्याद् लृकारस्य च दीर्घाभावाद् “अकः सवर्णे दीर्घः” इत्यनेनैव दीर्घ एकादेश ॠकारो भवति। अत एवोक्तम्- ऋति ॠ वेत्यादि। उभयत्र = वार्तिकद्वयेऽपि, विधेयं वर्णद्वयम् = ॠकारः लृकारश्च द्विमात्रम्। आद्यस्य = ॠकारस्य, अभितः = सर्वतः, अज्भक्तेः = अज्भागस्य, अपरा = द्वितीया मात्रा। द्वितीयस्य = लृकारस्य। अयं भावः - अत्र विधेय ॠकारो लृकारश्च द्विमात्रः, ॠकारस्य मध्ये द्वौ रेफौ स्तः, रेफौ सर्वतश्च अज्भागः। तत्र द्वयोः रेफयोरेका मात्रा अज्भागस्य द्वितीया मात्रा, एवं द्विमात्र ॠकारः। लृकारोऽपि तथैव बोध्यः। इह उभयत्रापि = ‘होतृ + ऋकारः’ ‘होतृ + लृकारः’ इत्यत्रापि “ऋत्यकः” इति पाक्षिकः प्रकृतिभावो भवतीत्यपि बोध्यम्।

पूर्वरूपादेशविधायकं विधिसूत्रम्-

**एङः पदान्तादति ६। १। १०९**

**पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।**

अत्र “अमि पूर्वः” इत्यतः ‘पूर्वः’ इत्यनुवर्तते ‘एकः पूर्वपरयोः’ इति च। ‘हरे + अव’ इति स्थिते अयादेशे प्राप्ते तं प्रबाध्य पूर्वरूपैकादेश एकारः। एवं ‘विष्णो + अव’ इत्यत्रापि अवादेशं प्रबाध्य पूर्वरूपमेकादेश ओकारः।

प्रकृतिभावविधायकं विधिसूत्रम्-

**सर्वत्र विभाषा गोः ६। १। १२२**

**लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। गो अग्रम्- गोऽग्रम्। एङन्तस्य किम्? चित्रग्वग्रम्। पदान्ते किम्? गोः।**

सूत्रे ‘एङः पदान्तात्’ इति पूर्वसूत्रादनुवर्तते, “प्रकृत्यान्तः पादमव्यपरे” इत्यतः ‘प्रकृत्या’ इत्यनुवर्तते। ‘सर्वत्र’ इति लोके वेदे चेत्यर्थो लभ्यते। प्रकृत्या = स्वभावेन निर्विकारस्वरूपेण अवस्थानम्-प्रकृतिभावः। ‘गो + अग्रम्’ इति स्थिते अवादेशं प्रबाध्य पूर्वरूपे प्राप्ते तदपि प्रबाध्य अनेन प्रकृतिभावे ‘गो अग्रम्’ इति रूपम्। अत्र ‘एङन्तस्य’ इति ‘गोः’ इत्यस्य विशेषणं तत् किमर्थमिति प्रश्नः, चित्रा गावोऽस्येति विग्रहे समासे “गोस्त्रियोः-” इति ह्रस्वे चित्रगु-शब्दः। ‘चित्रगु + अग्रम्’ इति स्थिते एङन्तस्येति ग्रहणाभावेऽनिष्टः प्रकृतिभावः स्यात्। ‘पदान्ते’ इत्यस्याभावेऽपि गोशब्दाद् ङसिविभक्तौ ‘गो + अस्’ इति स्थिते प्रकृतिभावं प्राप्नोति, तन्निवृत्त्यर्थं पदान्तग्रहणमिति बोध्यम्।

विभाषयाऽवङादेशविधायकं विधिसूत्रम्-

**अवङ् स्फोटायनस्य ६। १। १२३**

**'अति' इति निवृत्तम् । अचि परे पदान्ते गोरवङ् वा स्यात् । गवाग्रम् । पदान्ते किम् ? गवि । व्यवस्थितविभाषया गवाक्षः ।**

"एङः पदान्तादति" इति सूत्रादायातम् 'अति' इति पदं "सर्वत्र-" इति सूत्रपर्यन्तमागत्य इतो निवृत्तमिति भावः । अत्र व्याख्यानमेव प्रमाणम् । अत्र पदान्तादिति, गोरिति, अचीति चानुवर्तन्ते । स्फोटायनऋषेर्मतमेतत्, अन्येषां मते तु न भवतीत्यनेन विकल्पः सिद्धः । 'अवङ्' इत्यस्य ङित्वात् "ङिच्च" इत्यन्तादेशः । 'गो + अग्रम्' इति स्थिते गकाराद् ओकारस्य 'अवङ्' भवति, ततश्च 'गव + अग्रम्' इति जाते सवर्णदीर्घः । गोशब्दात् सप्तम्येकवचने ङिविभक्तौ 'गो + इ' इति स्थिते ओकारस्य पदान्तत्वाभावाद् अवङादेशो न, अवादेश एव । "सर्वत्र विभाषा गोः" इत्यत्र व्यवस्थितविभाषाश्रयणाद् 'गवाक्षः' इत्यत्र नित्यमेवावङ् सिद्ध्यतीति भावः । व्यवस्थितविभाषा च-लक्ष्यानुसारेण व्यवस्थया प्रवृत्ता विभाषा भवति । गवाक्षः = वातायनम् ।

अवङादेशविधायकं विधिसूत्रम्-

**इन्द्रे च ६ । १ । १२४**

**गोरवङ् स्यादिन्द्रे । गवेन्द्रः ।**

अत्र 'गोः', 'अवङ्' 'अचि' इति पदत्रयमनुवर्तते । नित्यविधानार्थं सूत्रम्, अन्यथा पूर्वसूत्रेणैव विकल्पः स्यात् । 'गो + इन्द्रः' इति स्थितेऽनेन ओकारस्य अवङि, 'गव + इन्द्रः' इति जाते "आद् गुणः" इति गुणः ।

## प्रयोगसिद्धिप्रकारः

### उपेडकीयति

एडकमात्मन इच्छतीत्यर्थे 'एडक अम्' इति स्थिते "सुप आत्मनः क्यच्" इति क्यच्प्रत्ययेऽनुबन्धलोपे धातुसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सुपो लुकि "क्यचि च" इति ईत्वे 'एडकीय' इत्यस्य धातुसंज्ञायां तस्माल्लटि तिपि शपि पररूपे 'एडकीयति' इति, 'उप + एडकीयति' इति स्थिते वृद्धिं प्रबाध्य "एङि पररूपम्" इत्यत्र "वा सुपि" इत्युनुवर्त्य वाक्यभेदाश्रयणेन पररूपे 'उपेडकीयति' इति, पररूपाभावे "वृद्धिरेचि" इति वृद्धौ 'उपैडकीयति' इति रूपद्वयं सिद्धम् ।

### पटत्पटदिति

'पटत्' इत्यस्याव्यक्तानुकरणस्य "डाचि बहुलं द्वे भवतः" इत्यत्र बहुलग्रहणेन डाचं विनाऽपि द्वित्वे 'पटत्पटत् + इति' इति स्थिते "तस्य परमाम्रेडितम्" इति द्वितीयस्य 'पटत्' इत्यस्य आम्रेडितसंज्ञायाम् "अव्यक्तानुकरणस्यात इतौ" इति टिसंज्ञकस्य 'अत्' इत्यस्य पररूपे प्राप्ते "नाम्रेडितस्यान्त्यस्य तु वा" इति तन्निषेधे अन्त्यस्य तकारमात्रस्य वैकल्पिके पररूपे एकादेशे 'पटत्पट + इति' इति जाते "आद् गुणः" इति गुणे 'पटत्पटेति' इति रूपम्, पररूपस्य पाक्षिकत्वात्तदभावे "झलां जशोऽन्ते" इति तकारस्य स्थानसाम्याद् जश्त्वेन दकारे 'पटत्पटदिति' इति रूपद्वयं सिद्धम् ।

# अभ्यासः

१. **अधस्तनानां प्रश्नानामुत्तराणि प्रयच्छत**

(क) "एङि पररूपम्" इत्यत्र "वा सुपि" इत्यनुवृत्तौ कीदृशोऽर्थः ?

(ख) 'क्वेव भोक्ष्यसे' इत्यत्र एवशब्दस्य कोऽर्थः ?

(ग) 'मनस् + ईषा' इत्यत्र केन कस्य पररूपम् ?

(घ) 'पटत् + इति' इत्यत्र केन सूत्रेण पररूपम् ? किञ्च सन्धिगतं रूपम् ?

(ङ) "अकः सवर्णे दीर्घः" इत्यस्य स्थाने "अकोऽकि दीर्घः" इति न्यासे को लाभः ?

(च) 'होतृ + लृकारः' इत्यत्र सवर्णदीर्घे किं रूपम् ?

(छ) "सर्वत्र विभाषा गोः" इत्यत्र 'एङन्तस्य' इत्यस्य सम्बन्धः किमर्थः ?

२. **"नाज्झलौ" इति निषेधेन अज्झलोः परस्परं सावर्ण्याभावाद् हलि परे "अकः सवर्णे–" इत्यस्याप्राप्तौ पुनः "अकः सवर्णे–" इत्यत्र 'अचि' इत्यस्य सम्बन्धः किमर्थः ?**

३. **"अचोऽन्त्यादि टि", "अव्यक्तानुकरणस्यात इतौ" इत्यनयोः सूत्रयोरर्थं नेपालीभाषायां लिखत ।**

४. **प्रेजते, मार्तण्डः, शिवेहि, होतृकारः, गवाग्रम् एते प्रयोगाः साधनीयाः ।**

५. **पररूपपूर्वरूपयोः सोदाहरणं भेदं प्रदर्शयत ।**

६. **युक्तकथनेषु ✓ इति चिह्नम्, अयुक्तकथनेषु ✗ इति चिह्नं योजयत**

(क) अवर्णान्ताद् उपसर्गाद् एङादौ धातौ परे पूर्वरूपं भवति ।

(ख) केशानां सन्निवेशविशेषे 'सीमन्तः' इति प्रयोगः साधुः ।

(ग) 'साराङ्गः' इति प्रयोगः 'पशु' इत्यर्थे 'पक्षी' इत्यर्थे च साधुर्भवति ।

(घ) 'बिम्ब + ओष्ठः' इति स्थिते पररूपे 'बिम्बोष्ठः', वृद्धौ 'बिम्बौष्ठः' इति रूपद्वयम् ।

(ङ) "ऋति सवर्णे ऋ वा" इति विधेये ऋकारे द्वौ रेफौ स्तः ।

(च) 'हरे + अव' इति स्थिते "एचोऽयवायावः" इति अवादेशो भवति ।

(छ) 'गो + अग्रम्' इत्यत्र प्रकृतिभावे 'गो अग्रम्' इत्येव रूपम् ।

## ७. रिक्तस्थानं पूरयत

(क) 'पतत् + अञ्जलिः' इति स्थिते ... इति सूत्रेण ... इत्यस्य टिसंज्ञा ।

(ख) मृतण्डशब्दादपत्येऽर्थे ... प्रत्यये ... इति रूपम् ।

(ग) अवर्णादाङि परे ... इति सूत्रेण ... एकादेशो भवति ।

(घ) "तस्य परमाम्रेडितम्" इति ... पररूपम् ... संज्ञं भवति ।

(ङ) "अकः सवर्णे दीर्घः' इत्यत्र 'अकः' इति ... इत्यत्र ... वारणार्थम् ।

(च) 'विष्णो + अव' इति स्थिते ... प्रबाध्य ... इति सूत्रेण ... एकादेशः ।

(छ) 'गो + अग्रम्' इति स्थिते ... इति सूत्रेण प्रकृतिभावे ... इति रूपम्, ... इति सूत्रेण पूर्वरूपे ... इति रूपम् ।

दशमः पाठः

# प्रकृतिभावः

प्रकृतिभावविधायकं विधिसूत्रम्-

**प्लुतप्रगृह्या अचि नित्यम् ६ । १ । १२५**

**प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि परे नित्यं प्रकृत्या स्युः । एहि कृष्ण३ अत्र गौश्चरति । हरी एतौ । 'नित्यम्' इति किम् ? 'हरी एतौ' इत्यादावयमेव प्रकृतिभावो यथा स्यात्, "इकोऽसवर्णे–" इति ह्रस्वसमुच्चितो मा भूत् ।**

"दूराद्धूते च" इत्यादिना "ईदूदेद् द्विवचनं प्रगृह्यम्" इत्यादिना च प्लुताः प्रगृह्याश्च वक्ष्यन्ते, ते अचि परे प्रकृत्या = स्वभावेनावस्थिताः स्युरित्याशयः । प्रकृतिभावे हि सन्धयो न भवन्तीति बोध्यम् । यथा- 'एहि कृष्ण + अत्र गौश्चरति' इत्यत्र "दूराद्धूते च" इति सूत्रेण णकाराकारस्य प्लुतत्वादनेन सूत्रेण तस्याकारे परे प्रकृतिभावे सवर्णदीर्घो न भवति । एवम्- 'हरी एतौ' इत्यत्र "ईदूदेद्द्विवचनं प्रगृह्यम्" इति सूत्रेण रेफादीकारस्य प्रगृह्यसंज्ञायां प्रकृतसूत्रेण प्रकृतिभावे यण् न भवतीति बोध्यम् । अत्र सूत्रे नित्यग्रहणं किमर्थमिति जिज्ञासायामाह- 'हरी एतौ' इत्यादावयमेव प्रकृतिभावो यथा स्यादित्यादि । अस्यायम्भावो यत्- "सर्वत्र विभाषा गोः" इति पूर्वसूत्रे 'विभाषा' इत्यंशे स्वरितत्वाभावादेव इह विभाषेत्यस्यानुवृत्त्यभावेन नित्ये सिद्धे पुनर्नित्यग्रहणं किमर्थमिति नाशङ्कनीयम्, 'हरी ईशौ' इत्यादौ "प्लुतप्रगृह्या-" इत्यस्य सावकाशत्वात्, 'चक्री अत्र' इत्यत्र "इकोऽसवर्णे-" इत्यस्य सावकाशत्वात्, प्रकृते 'हरी एतौ' इत्यादौ परत्वाद् ह्रस्वसमुच्चित एव प्रकृतिभावः स्यात्, नित्यग्रहणसामर्थ्यात् परमपि "इकोऽसवर्णे-" इति सूत्रं बाधते इति ।

ह्रस्वसमुच्चितप्रकृतिभावविधायकं विधिसूत्रम्-

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६ । १ । १२७**

**पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा । अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितम् । चक्रि अत्र, चक्र्यत्र । 'पदान्ताः' इति किम् ? गौर्यौ ।**

अत्र सूत्रे 'इक' इति षष्ठी "एङः पदान्तादति" इत्यतः पदान्तादित्यनुवर्तते, तच्च षष्ठ्यन्ततया विपरिणम्यते, अचीत्यनुवर्तते । तथा च- पदान्तस्येकोऽसवर्णेऽचि परे ह्रस्वः स्यादित्येकं वाक्यम् । चकारात् "प्रकृत्यान्तः पादम्" इत्यतः प्रकृत्येत्यनुकृष्यते, ह्रस्व इति तत्रापि सम्बध्यते तथा च उक्तो ह्रस्वः प्रकृत्या = स्वभावेन अवतिष्ठते इति वाक्यान्तरं सम्पद्यते । यदि चकारो न क्रियेत तर्हि 'पदान्तस्येको ह्रस्वः' इत्येवार्थः स्यात्, प्रकृतिभावविशिष्टं रूपं न स्यात् । अतः प्रकृत्येत्यनुकर्षणार्थश्चकार आवश्यक इति सूत्रकारमतम् । एवञ्च 'चक्री + अत्र' इति स्थिते ह्रस्वसमुच्चितप्रकृतिभावे 'चक्रि अत्र' इति, प्रकृतिभावाभावे यणि 'चक्र्यत्र' इति च रूपद्वयं बोध्यम् । भाष्यकारमतमाह- अत्र ह्रस्वविधिसामर्थ्यादेवेति । अयम्भावो यत्- अत्र चकारो न कर्तव्यः, प्रकृत्येत्यनुकर्षस्य

व्यर्थत्वात्, ह्रस्वविधिसामर्थ्यादेव यणो निवृत्तिसिद्धिः, अन्यथा यणमेव विदध्यात् । 'पदान्ता इकः' इति कथनेन 'गौरी + औ' इत्यत्र रेफादीकारस्य पदान्तत्वाभावेन प्रकृतसूत्रस्य न प्रवृत्तिरिति ।

**"न समासे" (वा.) वाप्यश्वः ।**

समासे उक्तो ह्रस्वसमुच्चितः प्रकृतिभावो न भवतीत्यर्थः । 'वाप्यामश्वः' इति विग्रहे समासे 'वापी + अश्वः' अत्र समासत्वान्न ह्रस्वसमुच्चितः प्रकृतिभावः, अपि तु यणि 'वाप्यश्वः' इति सिद्ध्यति ।

**"सिति च" (वा.) पार्श्वम् ।**

सकार इत् यस्य स सित्, तस्मिन् परे ह्रस्वसमुच्चितः प्रकृतिभावो न भवतीति वार्तिकार्थः । पार्शु + अम् इति स्थिते ह्रस्वसमुच्चितप्रकृतिभावनिषेधे यणि 'पार्श्वम्' इति, पर्शु-शब्दाद् 'णस्' इति तद्धितसित्प्रत्यययोजनेन पार्श्वशब्दो निष्पद्यते ।

ह्रस्वसमुच्चितप्रकृतिभावविधायकं विधिसूत्रम्-

**ऋत्यकः** ६ । १ । १२८

**ऋति परेऽकः प्रागवत् । ब्रह्म ऋषिः, ब्रह्मर्षिः । 'पदान्ताः' इत्येव । आर्च्छत् । समासेऽप्ययं प्रकृतिभावः । सप्त ऋषीणाम्, सप्तर्षीणाम् ।**

अत्र 'अकः' इति षष्ठी, "एङः पदान्तादति" इत्यतः पदान्तादित्यनुवर्तते । तच्च षष्ठ्यन्ततया विपरिणम्यते तथा च- पदान्तस्य अक ऋति वा ह्रस्वः स्यादित्येकं वाक्यम्, चकारात् प्रकृत्येत्यनुकृष्यते । एवञ्च उक्तो ह्रस्वः प्रकृत्या अवतिष्ठत इति द्वितीयं वाक्यं सम्पद्यते । तथा च- 'ब्रह्मा + ऋषिः' इति स्थिते आकारस्य ह्रस्वः प्रकृतिभावश्चानेन सूत्रेण भवति, अत्र पक्षे "आद् गुणः" इति गुणो न भवति । ह्रस्वसमुच्चितप्रकृतिभावाभावे तु "आद् गुणः" इति गुणे रपरत्वे च 'ब्रह्मर्षिः' इत्यपि सिद्ध्यति । अत्र सूत्रे 'पदान्ताः' इत्यनुवर्तनीयमेव । अत एव- 'आ + ऋच्छत्' इति स्थिते आकारस्य अकः पदान्तत्वाभावान्न प्रकृतिभावः, गुणे रपरत्वे- आर्च्छत् । "न समासे" इति पूर्वसूत्रस्थं प्रकृतिभावनिषेधकं वार्तिकमिह न सम्बध्यत इत्यभिप्रेत्याह- समासेऽप्ययं प्रकृतिभाव इति । 'सप्त ऋषीणाम्' इति प्रकृतिभावपक्षे, प्रकृतिभावाभावे तु "आद् गुणः" इति गुणे रपरत्वे 'सप्तर्षीणाम्' इति ।

अधिकारसूत्रम्-

**वाक्यस्य टेः प्लुत उदात्तः** ८ । २ । ८२

**इत्यधिकृत्य ।**

अत्र पदस्येत्यधिकृतम् । वाक्यस्य टेः पदावयवस्य प्लुतो भवति, स च उदात्तो भवतीति सूत्रार्थः । अस्याधिकारे प्लुतविधय आरभ्यन्ते इत्याशयः ।

प्लुतादेशविधायकं विधिसूत्रम्-

**प्रत्यभिवादेऽशूद्रे** ८ । २ । ८३

**अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्, स चोदात्तः । अभिवादये देवदत्तोऽहम् । आयुष्मान् भव देवदत्त३ ।**

अत्र "वाक्यस्य टेः प्लुत उदात्तः" इत्यधिकृतम् । न शूद्रः अशूद्रः = द्विजातिः, तद्विषयः प्रत्यभिवादः = विधिवदभिवाद्यमानं प्रति विधिवदाशीर्वचनम्, अस्मिन् प्रत्यभिवादविषये यद् वाक्यं तस्य टेः प्लुतः स्यात्, स चोदात्त इति सूत्रार्थः । 'अभिवादये देवदत्तोऽहम्' इति अभिवादवाक्यप्रदर्शनम्, 'आयुष्मान् भव देवदत्त३' इति प्रत्यभिवादवाक्यस्वरूपम् । अत्र देवदत्त-शब्दे तकारादकारस्य प्लुतत्वमित्याशयः ।

**"स्त्रियां न" (वा.) अभिवादये गार्ग्यहम् । आयुष्मती भव गार्गि ।**

स्त्रीविषयकप्रत्यभिवादवाक्ये वाक्यस्य टेः प्लुतो न भवतीत्यर्थः । अत्र 'अभिवादये गार्ग्यहमि'ति अभिवादनवाक्यप्रदर्शनम्, 'आयुष्मती भव गार्गि' इति प्रत्यभिवादवाक्यं बोध्यम् ।

**नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह । आयुष्मानेधि ।**

प्रत्यभिवाद(आशीर्वचन)वाक्ये उच्चरितस्य नाम्नो गोत्रस्य च टेः प्लुतो भवति इति कथनेन यत्र गोत्रस्य ग्रहणं नाम्नोर्वा ग्रहणं तत्रैव टेः प्लुतो भवति । एवञ्च- 'आयुष्मानेधि' इत्यत्र धकारादिकारस्य न प्लुतः, अनामत्वादगोत्रत्वाच्चेति बोध्यम् ।

**"भो राजन्यविशां वेति वाच्यम्" (वा.) आयुष्मानेधि भो३ः । आयुष्मानेधीन्द्रवर्म३न् । आयुष्मानेधीन्द्रपालित३ ।**

भोश्शब्दस्य राजन्यवैश्यवाचकनाम्नोश्च टेः प्लुतो वा स्यादिति वक्तव्यमित्यर्थः । भोस्-शब्दस्य अप्राप्ते इतरयोस्तु नामत्वात् प्राप्ते विभाषेयम् । तत्र भोस्-शब्दे यथा- आयुष्मानेधि भो३ः । राजन्ये यथा- आयुष्मानेधि इन्द्रवर्म३न् । वैश्ये यथा- आयुष्मानेधीन्द्रपालित३ । अत एव भाष्यप्रामाण्यात् प्रत्यभिवादवाक्ये शर्मान्तं ब्राह्मणस्य, वर्मान्तं क्षत्रियस्य, पालितान्तं वैश्यस्येति विधयोऽपि प्रवर्तन्त इति ज्ञायते । उक्तभाष्यस्य मन्वादिस्मृतिविरोधाद् विकल्पो बोध्यः ।

प्लुतादेशविधायकं विधिसूत्रम्-

**दूराद्धूते च ८ । २ । ८४**

**दूरात् सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् । सक्तून् पिब देवदत्त३ ।**

यत्र प्रदेशे स्थितस्य प्रयत्नोच्चारितं शब्दं बोध्यमानो न शृणोति, किन्त्वधिकं प्रयत्नमपेक्षते तद्दूरम् । हूतम् = आह्वानम्, सम्बोधनमिह विवक्षितम् । "वाक्यस्य टेः प्लुत उदात्तः" इत्यधिकृतम् । एवञ्च- दूरात् सम्बोधने यद्वाक्यमित्याद्यर्थः पर्यवस्यति । यदि अत्र आह्वानमेव विवक्षितं स्यात् तदा 'एहि देवदत्त' इत्यादौ आह्वानवाचकशब्दे एव स्यात्, सम्बोधनपरत्वे तु आह्वानादन्यत्रापि भवति । यथा- सक्तून् पिब देवदत्त३ इति ज्ञेयम् ।

प्लुतादेशविधायकं विधिसूत्रम्-

**हैहेप्रयोगे हैहयोः ८ । २ । ८५**

**एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात् । है३ राम । राम हे३ ।**

है, हे इत्यव्यये सम्बोधनद्योतके, तयोः प्रयोगे हैहयोः प्लुतः स्यादित्यर्थः । "दूराद्धूते च" इति सूत्रेण "गुरोरनृतः-" इत्यनेन च सिद्धे इदं सूत्रं किमर्थमिति जिज्ञासायामुच्यते- हैहयोरेवेति । इदं नियमार्थमिति फलति । तथा च- पाहि है३ राम, पाहि हे३ रामेत्यत्र हैहयोरेव प्लुतो न तु "गुरोरनृतः-" इत्यन्यस्यापीति 'हैहयोः' इत्यनेन लभ्यते । अत्र प्रयोगग्रहणाभावे "वाक्यस्य टेः-" इत्यधिकाराद् 'राम है' इत्यत्रैव स्यात् । प्रयोगग्रहणात्तु अनन्त्ययोरपि तयोः प्लुतो भवतीति विशेषः ।

विभाषया प्लुतादेशविधायकं विधिसूत्रम्-

**गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८ । २ । ८६**

**दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात् । दे३वदत्त । देवद३त्त । देवदत्त३ । गुरोः किम् ? वकारात् परस्याकारस्य मा भूत् । अनृतः किम् ? कृष्ण३ । एकैकग्रहणं पर्यायार्थम् । इह 'प्राचाम्' इति योगो विभज्यते, तेन सर्वः प्लुतो विकल्प्यते ।**

अत्र सूत्रे "दूराद्धूते च" इत्यनुवर्तते "वाक्यस्य टेः प्लुत उदात्तः" इत्यधिकृतम् । तथा च दूरात् सम्बोधने यद्वाक्यं तत्र सम्बोध्यमानवाचकं यत् पदं तदवयवस्य ऋकारभिन्नस्य अनन्त्यस्य गुरोः प्लुतः स्यात्, अन्त्यस्य तु गुरोरगुरोश्च प्लुतः स्यादित्यर्थः पर्यवस्यति । 'देवदत्त' इत्यादौ सर्वत्र एहीत्यस्य क्रियापदस्याध्याहारः कर्तव्यः, अन्यथा 'एकतिङ् वाक्यम्' इति वाक्यत्वं नोपपद्यते । सर्वेषां गुरूणां युगपत् प्लुतः स्यात् तन्मा भूदित्येतदर्थमेकैकग्रहणं सूत्रे बोध्यम् । अत्र सूत्रे "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य" इत्येकम्, "प्राचाम्" इति द्वितीयमिति योगविभागः । तथा च- प्राचां मते प्लुतः स्यात्, अन्यमते नेति फलतीति 'सर्वः प्लुतो विकल्प्यते' इति सिद्धान्तः ।

अप्लुतवद्भावविधायकमतिदेशसूत्रम्-

**अप्लुतवदुपस्थिते ६ । १ । १२९**

**उपस्थितोऽनार्ष इति शब्दः तस्मिन् परे प्लुतोऽप्लुतवद् भवति । प्लुतकार्यं प्रकृतिभावं न करोति । सुश्लोक३ इति, सुश्लोकेति ।**

अवैदिके इति-शब्दे परे प्लुतः अप्लुतवत् स्यादिति सूत्रार्थः । अप्लुतवद्भावस्य प्रयोजनं प्लुतकार्यं प्रकृतिभावं न करोतीति । तथा च- 'सुश्लोक३ इति' इति तैत्तरीये प्लुतान्तो मन्त्रः, पदकाले अवग्रहे च, तस्मात् परत इति शब्दं पदकाराः पठन्ति । एवञ्च 'सुश्लोक३ + इति' इति स्थिते अप्लुतवद्भावेन प्रकृतिभावाभावे गुणे 'सुश्लोकेति' इति भवति । अत्र इति-शब्दः पदकारप्रक्षिप्तत्वाद् अवैदिकः । उपस्थितशब्दस्यात्र 'अवैदिक इति-शब्दः' इत्यर्थो भाष्यकृता कृतो दृश्यत इति ज्ञेयम् ।

**वत् किम् ? अप्तुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत । तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् । अग्नी३ इति ।**

अप्लुतवदित्यत्र वद्ग्रहणं किमर्थमिति प्रश्नः । 'अप्लुत उपस्थिते' इत्युक्ते प्लुतस्य स्थाने अप्लुत एव विधीयेत । ततश्च 'अग्नी३' इत्यत्र सम्बोधनप्रथमान्तद्विवचनान्तस्यानुकरणे प्रगृह्य ईकारः त्रिमात्रो न श्रूयेत । वत्करणे तु प्लुतकार्यस्य प्रकृतिभावस्यैव निवृत्त्या प्लुतत्वं श्रूयेत इत्याऽऽशयः ।

अप्लुतवद्भावविधायकमतिदेशसूत्रम्-

**ई चाक्रवर्मणस्य ६ । १ । १३०**

**ई३कारः प्लुतोऽचि परेऽप्लुवद्वा स्यात् । चिनुही३ इति, चिनुहीति । चिनुही३ इदम्, चिनुहीदम् । उभयत्र विभाषेयम् ।**

अचि परे ईकारोऽप्लुतवद् भवति, चाक्रवर्मणमुनेर्मते न तु अन्यमते इति सूत्रार्थः । तथा च- 'चिनुही३ + इदम्' इत्यत्र अनेन वैकल्पिकेऽप्लुतवद्भावे सवर्णदीर्घे चिनुहीदम्' इति, पक्षे 'चिनुही३ इदम्' इति बोध्यम् । इति-शब्दे परे नित्यतया प्राप्ते, इति-शब्दादन्यत्र चाप्राप्ते सूत्रस्यास्यारम्भादुभयत्र विभाषेयं ज्ञेयम् ।

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**ईदूदेद्द्विवचनं प्रगृह्यम् १ । १ । ११**

**ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू । पचेते इमौ । 'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यत्र त्विवार्थे वशब्दो वाशब्दो वा बोध्यः ।**

ईच्च ऊच्च एच्चेति समाहारद्वन्द्वः । ईदूदेदिति द्विवचनविशेषणत्वात्तदन्तविधिः । तथा च- ईदूदेदन्तं यद् द्विवचनमित्यर्थो भवति । 'हरी + एतौ' इत्यत्र "अन्तादिवच्च" इत्यनेन परादिवद्भावाद् द्विवचनत्वम्, अनेन प्रगृह्यसंज्ञायां च "प्लुतप्रगृह्या-" इति प्रकृतिभावान्न यण् । 'गङ्गे + अमू' इत्यत्र च प्रकृतिभावाद् "एङः पदान्तादति" इति न पूर्वरूपमिति बोध्यम् । ईदूदेदन्तमिति तदन्तविधेः प्रयोजनं 'पचेते इमौ' इति । तदन्तविध्यभावे ईदूदेद्रूपस्यैव द्विवचनस्य प्रगृह्यसंज्ञेति लभ्येत । एवं सति 'पचेते' इत्यत्र 'इते' इति द्विवचनस्य एद्रूपत्वाभावात् प्रगृह्यसंज्ञा न स्यादिति बोध्यम् । ननु 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इति भारतश्लोके 'मणी इव' इति ईकारस्य प्रगृह्यत्वे प्रकृतिभावेन सवर्णदीर्घो न स्यादिति जिज्ञासायामाह- अत्र तु इवार्थे व-शव्दो वा-शब्दो वा बोध्य इति ।

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**अदसो मात् १ । १ । १२**

**अस्मात् परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । मात् किम् ? अमुकेऽत्र । असति माद्ग्रहणे एकारोऽप्यनुवर्तेत ।**

अदस्-शब्दावयव-मकारात् परस्य ईकारस्य ऊकारस्य च प्रगृह्यसंज्ञा भवतीति सूत्रार्थः । अत्र "ईदूदेद्द्विवचनं प्रगृह्यम्" इत्यस्माद् 'ईदूत्' इति 'प्रगृह्य' इति चानुवर्तेते । 'एदि'ति 'द्विवचनमि'ति च नानुवर्तेते, अदस्-शब्दे मकारात् परस्य एकारस्यासम्भवात् । अदस्-शब्दे मकारात् परस्य ईकारस्य 'अमी' इति बहुवचनत्वाद्, ऊकारस्य च मकारात् परस्य तत्र द्विवचनान्तेष्वेव सत्त्वेन व्यावर्त्याभावात् । 'अमी + ईशा' इत्यत्र ईकारस्य द्विवचनत्वाभावात् "ईदूदेद्-" इति सूत्रेण प्रगृह्यसंज्ञा न प्राप्नोतीति अनेन प्रगृह्यसंज्ञेति बोध्यम् । 'रामकृष्णावमू + आसाते' इत्यत्र द्विवचनसत्त्वेन पूर्वसूत्रेणैव प्रगृह्यसंज्ञा स्यादिति तु न शङ्क्यम्, पूर्वसूत्रेण प्रगृह्यत्वे कर्तव्ये ऊत्वमत्वयोरसिद्धत्वात्, "अदसो मात्' इति सूत्रं प्रति तु आरम्भसामर्थ्यादूत्वमत्वे नासिद्धे इति विशेषः । "अदसः" इत्येव सूत्रमस्तु, माद्ग्रहणस्य किं प्रयोजनमिति जिज्ञासायामुच्यते- 'अमुकेऽत्र' इति । अदस्-शब्दादकचि, जसि,

त्यदाद्यत्वे पररूपे, जसः 'शी' इत्यादेशे, गुणे, उत्वमत्वे 'अमुके' इति भवति, अत्र एकारस्य प्रगृह्यसंज्ञानिवृत्त्यर्थं माद्ग्रहणम्, कृते च माद्ग्रहणे एकारस्य मात्परत्वाभावान्न प्रगृह्यत्वमिति ज्ञेयम् ।

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**शे १ । १ । १३**

**अयं प्रगृह्यः स्यात् । अस्मे इन्द्राबृहस्पती ।**

इदं सूत्रं छान्दसं सन्दर्भशुद्ध्यर्थमिहोपन्यस्तमिति कतिपये विद्वांसः । तथा च- "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः" इति विहितः 'शे' इत्येकारान्त आदेशः प्रगृह्यः स्यादित्यर्थः । 'अस्मभ्यम्' इत्यत्र भ्यसः 'शे' इत्यादेशे 'अस्मे' इति रूपं बोध्यम् ।

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**निपात एकाजनाङ् १ । १ । १४**

**एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् । इ विस्मये । उ वितर्के । इ इन्द्रः । उ उमेशः । अनाङित्युक्तेरङिदाकारः प्रगृह्य एव । आ एवं नु मन्यसे । आ एवं किल तत् । ङित्तु न प्रगृह्यः । ईषदुष्णम् ओष्णम् । 'वाक्यस्मरणयोरङित्' । अन्यत्र ङिद् इति विवेकः ।**

अत्र 'एकाच्' इति पदे 'एकश्च असौ अच्च' इति कर्मधारयः । तथा च- 'आङ्' इत्येतं विहाय एकाज्रूपाणां निपातानां प्रगृह्यसंज्ञेति फलति । 'इ' इति चादित्वान्निपातः, स च आश्चर्यरूपेऽर्थे वर्तते । 'उ' इति निपातस्य वितर्करूपोऽर्थः । एवञ्च- इ + इन्द्रः, उ + उमेशः इत्यत्र एकाच्त्वान्निपातत्वाच्च प्रगृह्यसंज्ञायां प्रकृतिभावे सवर्णदीर्घो न भवतीति । 'अनाङ्' इत्यत्र ङकारानुबन्धस्य प्रयोजनं किमिति प्रश्ने आह- यत्र आकारोऽङित्तत्र प्रगृह्यसंज्ञैव भवति । यथा- 'आ एवं नु मन्यसे' अत्र पूर्वप्रक्रान्तवाक्यर्थस्य अन्यथात्वद्योतकोऽयमाकारः । 'आ एवं किल तत्' इत्यत्र स्मरणद्योतकोऽयमाकारः, उभयत्रापि आकारस्य ङित्त्वाभावाद् 'अनाङ्' इत्यनेन निषेधाभावात् प्रगृह्यसंज्ञायां प्रकृतिभावो भवति । 'आ + उष्णम्' इत्यत्र तु आकारस्य ङित्त्वात् प्रगृह्यत्वाभावे सन्धिकार्ये 'ओष्णम्' इति भवति । ननु प्रयोगदशायां ङिदाकारेऽङिदाकारे च ङकारस्य श्रवणाविशेषाद् ङिदङिद्विवेकः कथं स्यादिति प्रश्ने आह- वाक्यस्मरणयोरङिदिति । वाक्यार्थस्यान्यथात्वे स्मरणे च अङित्, अन्यत्र ङिदिति विवेकः ।

**तथा च कारिका- ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।**
**एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥**

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**ओत् १ । १ । १५**

**ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ।**

'अहो + ईशाः' इत्यत्र अनेकाच्त्वात् "निपात एकाजनाङ्" इति सूत्रेण अप्राप्तौ सूत्रमिदमारभ्यते । तथा च प्रगृह्यत्वे प्रकृतिभावो भवति ।

विभाषया प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**सम्बुद्धौ शाकल्यस्येतावनार्षे १ । १ । १६**

**सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे । विष्णो इति, विष्ण इति, विष्णविति । अनार्ष इति किम् ? ब्रह्मबन्धवित्यब्रवीत् ।**

अत्र सूत्रे 'सम्बुद्धौ' इति निमित्तसप्तमी, 'ओदि'त्यत्रान्वेति, 'प्रगृह्यमि'त्यनुवर्तते । ऋषिर्वेदः, ऋषौ भव आर्षः, न आर्षः अनार्षः = अवैदिकः । अवैदिके इति-शब्दे परतः सम्बुद्धिनिमित्तक ओकारः शाकल्यस्य मते प्रगृह्यसंज्ञको भवतीति सूत्रार्थः । तथा च- 'विष्णो + इति' इत्यत्र ओकारः सम्बुद्धिनिमित्तकः, अस्य प्रगृह्यत्वे प्रकृतिभावेन "प्लुतप्रगृह्याः-" इति प्रकृतिभावे 'विष्णो इति' इत्येव सिद्ध्यति, प्रगृह्यत्वाभावे- अवादेशे "लोपः शाकल्यस्य" इति वकारस्य वैकल्पिके लोपे 'विष्ण इति' इति, लोपाभावे 'विष्णविति' इति रूपत्रयं बोध्यम् । वैदिके इति-शब्दे परे मा भूदित्येतदर्थम् 'अनार्षे' इत्यस्य ग्रहणम्, तेन 'ब्रह्मबन्धो + इत्यब्रवीत्' इत्यत्र न प्रगृह्यसंज्ञेति बोध्यम् ।

विभाषया प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**उञः १ । १ । १७**

**उञ इतौ वा प्रागुक्तम् । उ इति, विति ।**

'उञः' इत्येकपदं सूत्रम् । अत्र 'शाकल्यस्य', 'इतौ', 'प्रगृह्यम्' इति पदत्रयमनुवर्तते । 'उ' इति ञित् उकारो निपातः, तस्य इति-शब्दे परे शाकल्यस्य मते प्रगृह्यसंज्ञा स्यादित्यर्थः पर्यवस्यति । 'उ + इति' इत्यत्र "निपात एकाजनाङ्" इति सूत्रेण नित्यमेव प्रगृह्यत्वे प्राप्ते विकल्पार्थमिदमिति ज्ञेयम् ।

ऊँ इत्यादेशविधायकं विधिसूत्रम्-

**ऊँ १ । १ । १८**

**उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् । ऊँ इति, विति ।**

इदमप्येकपदं सूत्रम् । 'ऊँ' इति दीर्घस्य अनुनासिकस्य ऊकारस्य लुप्तप्रथमाविभक्तिकस्य रूपम् । अत्र 'उञः', 'इतौ', 'शाकल्यस्य', 'प्रगृह्यम्' इत्यनुवर्त्तन्ते । तथा च- 'उ + इति' इत्यत्रानेन सूत्रेण 'उ' इत्यस्य स्थाने विकल्पेन प्रगृह्यसंज्ञके 'ऊँ' इत्यादेशे 'ऊँ + इति' इत्यवस्थायां प्रगृह्यत्वात् प्रकृतिभावे 'ऊँ इति' इति रूपम्, एतदादेशाभावे "उञः" इति सूत्रेण विकल्पेन प्रगृह्यत्वे ततः प्रकृतिभावे 'उ इति' इति रूपम्, प्रगृह्यत्वाभावे यणि 'विति' इति त्रीणि रूपाणि बोध्यानि ।

विभाषया वकारादेशविधायकं विधिसूत्रम्-

**मय उञो वो वा ८ । ३ । ३३**

**मयः परस्य उञो वो वा स्यादचि । किमु उक्तम्, किम्वुक्तम् । वत्वस्यासिद्धत्वान्नानुस्वारः ।**

'मय' इति पञ्चमी 'उञ' इति षष्ठी, 'अचि' इत्यनुवर्तते । तथा च- 'मयः परस्य उञो वो वा स्यादचि परे' इत्यर्थः फलति । 'किमु + उक्तम्' इति स्थिते मकारादुकारस्य उञो "निपात एकाजनाङ्" इति नित्यं

प्रगृह्यत्वात् प्रकृतिभावाद् यणभावे प्राप्ते वत्वार्थमिदं वचनम्। ननु "इको यणचि" इत्यनन्तरमेव "मय उञो वा" इति पठितव्यम्, वग्रहणाभावेन लाघवात्, त्रिपाद्यां पाठे हि वग्रहणेन गौरवादिति जिज्ञासायामाह- वत्वस्यासिद्धत्वान्नानुस्वार इति। यदि षष्ठाध्याये "इको यणचि" इत्यत्रैव मय उञो यणादेशविकल्पो विधीयते तर्हि 'किम्वुक्तम्' इत्यत्र "मोऽनुस्वारः" इति मकारस्य वकारे परेऽनुस्वारः स्यात्। त्रिपाद्यां वत्वविधौ तु अनुस्वारविध्यपेक्षया वत्वविधौ वत्वस्यैव असिद्धत्वाद् अनुस्वारप्राप्त्यभावः।

प्रगृह्यसंज्ञाविधायकं सूत्रम्-

**ईदूतौ च सप्तम्यर्थे १।१।१९**

**सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधिश्रितः। मामकी तनू इति। "सुपां सुलुक्-" इति सप्तम्या लुक्। अर्थग्रहणं किम्? वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्। वाप्यामश्वो वाप्यश्वः।**

ईदूतौ सप्तम्यावित्येव सिद्धे अर्थग्रहणाद् यत्र सप्तम्या लुकि "यः शिष्यते स लुप्यमानार्थाभिधायी" इति न्यायेन प्रकृतेरेव सप्तम्यर्थे पर्यवसानं तथाविधत्वमीदूदन्तयोर्गम्यते। तथा च सप्तम्यर्थे पर्यवसन्नावीदूदन्तौ शब्दौ प्रगृह्यौ स्त इति सूत्रार्थः। 'सोमो गौर्याम् अधिश्रित' इत्यत्र "सुपां सुलुक्-" इति सप्तम्या लुकि 'गौरी अधिश्रित' इति स्थितेऽनेन प्रगृह्यसंज्ञायां प्रकृतिभावे यण् न भवति। एवं 'मामकी तनू' इत्यत्रापि मामक्यां तन्वामित्यर्थो बोध्यः, अत्रापि पूर्ववत् "सुपां सुलुक्-०" इत्यनेन सप्तम्या लुक्। 'तनू + इति' इत्यत्र प्रगृह्यत्वे प्रकृतिभावो भवति। अत्र सूत्रे अर्थग्रहणं कस्मै प्रयोजनाय इति जिज्ञासायामाह- वृत्तावर्थान्तरोपसङ्क्रान्ते मा भूदिति। अस्यायम्भावो यत्- अर्थग्रहणसामर्थ्याद् लुप्तसप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थो लभ्यते। एवञ्च समासे लुप्तसप्तमीके ईदूदन्तपूर्वपदे उत्तरपदार्थे प्रवृत्ते सति प्रगृह्यसंज्ञा न भवति। ततश्च 'वाप्यामश्व' इत्यत्र समासे कृते लुप्तसप्तमीकस्य वापी-शब्दस्य आधेयभूते अश्वेऽपि प्रवृत्तिसत्त्वेन सप्तम्यर्थमात्रविश्रान्त्यभावेन न प्रगृह्यत्वमित्याशयः।

विभाषया अनुनासिकादेशविधायकं विधिसूत्रम्-

**अणोऽप्रगृह्यस्यानुनासिकः ८।४।५७**

**अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधिँ, दधि। अप्रगृह्यस्य किम्? अग्नी।**

प्रगृह्यसंज्ञकभिन्नानाम् अ-इ-उ-वर्णानां वैकल्पिकोऽनुनासिक आदेशो भवतीति सूत्रार्थः। तथा च 'दधिँ' इति अनुनासिकपक्षे, 'दधि' इति तदभावे रूपे बोध्ये। अप्रगृह्यस्येति कथनेन 'अग्नी' इत्यत्र ईकारान्तद्विवचनतया प्रगृह्यत्वान्नानुनासिक इति विशेषः।

इत्यच्सन्धिप्रकरणम्।

# विशेषविवरणम्

### (क) अभिवादनप्रकारः

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयेत, उरः समं राजन्यः, मध्यसमं वैश्यः, नीचैः शूद्र अभिवादयेत इति । तथा च यथावर्णं दक्षिणबाहुं प्रसार्य 'अभिवादये देवदत्तोऽहं भोः' इति ब्रूयादिति ।

### (ख) प्रत्यभिवादनप्रकारः

भव सोम्येति विप्रो वाच्योऽभिवादने । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः । इति मनुनोक्तं बोध्यम् ।

## प्रयोगसिद्धिप्रकारः

### ब्रह्म ऋषिः/ब्रह्मर्षिः

'ब्रह्मा + ऋषिः' इति स्थिते "आद् गुणः" इत्यनेन प्राप्तं गुणं बाधित्वा "ऋत्यकः" इति सूत्रेण वैकल्पिके ह्रस्वे प्रकृतिभावे च कृते 'ब्रह्म ऋषिः' इति रूपं सिद्धम् । ह्रस्वाभावे "आद् गुणः" इति गुणे रपरत्वे च कृते 'ब्रह्म् अर् षिः' इति जाते वर्णसम्मेलने 'ब्रह्मर्षिः' इत्यपि सिद्ध्यति ।

### विष्णो इति/विष्ण इति/विष्णविति

'विष्णो + इति' इति स्थिते प्राप्तमवादेशं बाधित्वा "सम्बुद्धौ शाकल्यस्येतावनार्षे" इति सूत्रेण ओकारस्य विकल्पेन प्रगृह्यसंज्ञायां "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रेण प्रकृतिभावे 'विष्णो इति' इति, प्रगृह्यत्वाभावे "एचोऽयवायावः" इति सूत्रेण ओकारस्य अवादेशे 'विष्णव् + इति' इत्यवस्थायां "लोपः शाकल्यस्य" इत्यनेन वैकल्पिके वलोपे 'विष्ण इति' इति, वलोपाभावे 'विष्णविति' इति रूपत्रयं सिद्ध्यति ।

# अभ्यासः

## १. अधस्तनप्रश्नानामुत्तराणि दत्त

(क) प्रकृतिभावशब्दस्य कोऽर्थः ?

(ख) "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रं किं करोति ?

(ग) "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" इति सूत्रे चकारग्रहणस्य प्रयोजनमस्ति न वा ?

(घ) "दूराद्धूते च" इति सूत्रेण कस्य प्लुतादेशो भवति ?

(ङ) "अदसो मात्" इति सूत्रे माद्ग्रहणप्रयोजनं किम् ?

(च) "सम्बुद्धौ शाकल्यस्येतावनार्षे" इति सूत्रेण कीदृशे इतिशब्दे परे प्रगृह्यसंज्ञा भवति ?

(छ) "गरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" इत्यत्र एकग्रहणप्रयोजनं किम् ?

## २. अधोऽङ्कितानां सूत्राणामर्थं लिखत

(क) ईदूदेद्द्विवचनं प्रगृह्यम् (ख) निपात एकाजनाङ्

(ग) ईदूतौ च सप्तम्यर्थे (घ) मय उञो वो वा

## ३. 'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यस्य साधुत्वमुपपादयत ।

## ४. अधस्तनकथनानामाशयं प्रकाशयत

(क) इह 'प्राचाम्' इति योगो विभज्यते, तेन सर्वः प्लुतो विकल्प्यते ।

(ख) अप्लुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत ।

(ग) 'अनाङ्' इत्युक्तेरङिदाकारः प्रगृह्य एव ।

(घ) 'वाक्यस्मरणयोरङित्' अन्यत्र ङित् इति विवेकः ।

## ५. अधो लिखितानां प्रयोगाणां साधुत्वं दर्शयत

चक्रि अत्र, एहि कृष्ण३ अत्र गौश्चरति, वाप्यश्वः, सुश्लोक इति ।

## ६. समीचीनेषु कथनेषु ✓ चिह्नमसमीचीनेषु च ✗ चिह्नं दर्शयत

(क) 'हरी एतौ' इत्यादौ ह्रस्वसमुच्चितप्रकृतिभावो भवति ।

(ख) 'वापी + अश्वः' इत्यत्र यण् भवति ।

(ग) अशूद्रविषये प्रत्यभिवादवाक्ये टेः प्लुतो भवति ।

(घ) 'सक्तून् पिब देवदत्त३' इत्यत्र प्लुतो भवति ।

(ङ) "हैहेप्रयोगे हैहयोः" इति सूत्रं नियमार्थम् ।

(च) अवैदिके इतिशब्दे परेऽप्लुतवद् भवति ।

(छ) प्रगृह्यसंज्ञकादचि परे प्रकृतिभावो भवति ।

(ज) "अप्लुतवदुपस्थिते" इति सूत्रे वद्ग्रहणस्य प्रयोजनं नास्ति ।

## ७. रिक्तस्थानं पूरयत

(क) "प्लुत प्रगृह्या अचि नित्यम्" इति सूत्रेण ... भवति ।

(ख) दूराद्धूते च इति सूत्रं ... करोति ।

(ग) 'इ + इन्द्रः' इत्यत्र ... सूत्रेण प्रगृह्यसंज्ञा भवति ।

(घ) 'अमी + ईशाः' इत्यत्र ... इति सूत्रेण ... संज्ञायाम् ... इति सूत्रेण प्रकृति भावे ... इति रूपं भवति ।

(ङ) 'वापी + अश्वः' इत्यत्र ... इति सूत्रेण यण् भवति ।

# एकादशः पाठः

## अथ हल्सन्धिप्रकरणे

# श्चुत्वष्टुत्वसन्धिः

श्चुत्वविधायकं विधिसूत्रम्-

**स्तोः श्चुना श्चुः ८ । ४ । ४०**

**सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ।**

स्-त्-थ्-द्-ध्-न्-वर्णानां स्थाने शकारेण चवर्गेण च योगे सति क्रमेण शकारचवर्गा आदिश्यन्ते ।

यथा- 'हरिस् + शेते' इत्यत्र सकारस्य शकारेण योगे शकारादेशे कृते 'हरिश्शेते' इति । 'रामस् + चिनोति' इत्यत्र चवर्गेण योगे सस्य स्थाने शकारे कृते 'रामश्चिनोति' इति रूपम् । 'सत् + चित्' इत्यत्र चकारेण योगे श्चुत्वेन तकारस्य चकारे 'सच्चित्' इति । नात्र कुत्वं सम्भवति, कुत्वं प्रति श्चुत्वस्यासिद्धत्वात् । 'शार्ङ्गिन् + जय' इत्यत्र जकारेण योगे नकारस्य स्थाने ञकारे 'शार्ङ्गिञ्जय' इति ।

श्चुत्वनिषेधकं विधिसूत्रम्-

**शात् ८ । ४ । ४४**

**शात् परस्य तवर्गस्य चुत्वं न स्यात् ।**

**विश्नः । प्रश्नः ।**

शकारात् परस्य तवर्गस्य स्थाने चवर्गादेशो न भवतीति सूत्रार्थः । 'विश् + नः, प्रश् + नः' इत्यत्र "स्तोः श्चुना श्चुः" इति सूत्रेण शकारेण योगे नकारस्य चुत्वे प्राप्ते अनेन सूत्रेण चुत्वनिषेधे 'विश्नः, प्रश्नः' इत्येव रूपे सिद्ध्यतः ।

ष्टुत्वविधायकं विधिसूत्रम्-

**ष्टुना ष्टुः ८ । ४ । ४१**

**स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।**

सकारतवर्गयोः स्थाने षकारटवर्गाभ्यां योगे क्रमेण षकारटवर्गौ भवतः । सकारस्य षकारेण टवर्गेण वा योगे, त्, थ्, द्, ध्, न् इति वर्णानां षकारेण टवर्गेण वा योगे सति सकारस्य स्थाने षकारः, त्, थ्, द्, ध्, न् इति वर्णानां स्थाने ट्, ठ्, ड्, ढ्, ण् इति वर्णाः क्रमेण भवन्ति । 'रामस् + षष्ठः' इत्यत्र सकारस्य षकारेण योगे, 'रामस्

+ टीकते' इत्यत्र सकारस्य टवर्गेण योगे सस्य षकारो भवति । 'पेष् + ता' इत्यत्र षकारेण योगे तकारस्य स्थानेऽनेन सूत्रेण ष्टुत्वेन टकारे- पेष्टा । 'तत् + टीका', 'चक्रिन् + ढौकसे' इत्यत्र तकारनकारयोः स्थाने ष्टुत्वेन टकार-णकारयोः 'तट्टीका', 'चक्रिण्ढौकसे' इति ।

ष्टुत्वनिषेधकं विधिसूत्रम्-

**न पदान्ताट्टोरनाम् ८ । ४ । ४२**

**'अनाम्' इति लुप्तषष्ठीकं पदम् । पदान्ताट्टवर्गात् परस्यानामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात् किम् ? ईट्टे । टोः किम् ? सर्पिष्टमम् ।**

'षट् + सन्तः, षट् + ते' इत्यत्र सकारस्य तकारस्य च "ष्टुना ष्टुः" इति सूत्रेण ष्टुत्वे प्राप्तेऽनेन सूत्रेण ष्टुत्वनिषेधः ।

पदान्तात् टवर्गात्परयोः स्तोरेव ष्टुर्न भवति, तेन 'ईड् + ते' इत्यत्र "खरि च" इति सूत्रेण चर्त्वेन टकारे 'ईट् + ते" इति जाते 'ष्टुना टुः' इति सूत्रेण ष्टुत्वे 'ईट्टे' इति रूपम्, अत्र टकारस्य पदान्तत्वाभावान्न ष्टुत्वनिषेधः । एवमेव टवर्गात्परयोः सकारतवर्गयोरेव ष्टुत्वनिषेधो न तु षकारात्परयोः । यथा- 'सर्पिष् + तमम्' इत्यत्र पदान्तात् षकारात् परस्य तकारस्य 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वं भवत्येव, तेन 'सर्पिष्टमम्' इति सिद्धम् ।

**"अनाम्नवतिनगरीणामिति वाच्यम्"** (वा.) **षण्णाम् । षण्णवतिः । षण्णगर्यः ।**

पदान्ताट्टवर्गात् परयोः नाम्-नवति-नगरीशब्दावयवभिन्नयोः सकारतवर्गयोरेव ष्टुत्वनिषेधो वक्तव्य इति वार्तिकार्थः । "न पदान्ताट्टोरनाम्" इति सूत्रे 'अनाम्' इति निर्देशेन पदान्तटवर्गात् परस्य 'नाम्' शब्दस्यैव ष्टुत्वनिषेधस्य प्रतिषेधः कृतो विद्यते, तत्र "न पदान्ताट्टोरनाम्नवतिनगरीणाम्ः" इति पठित्वा नवति-नगरीशब्दयोरपि ष्टुत्वनिषेधस्य प्रतिषेधः कर्तव्य इति वार्तिकाशयः ।

सङ्ख्यावाचकात् षष्-शब्दात् षष्ठ्या बहुवचने आमि "षट्चतुर्भ्यश्च" इति नुटि 'षष् + नाम्' इत्यवस्थायां 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदान्तत्वात् षस्य जश्त्वेन डकारे 'षड् + नाम्' इति जाते नकारस्य ष्टुत्वेन णकारे 'षड् + णाम्' इत्यवस्थायां "प्रत्यये भाषायां नित्यम्" इति वार्तिकेनानुनासिके नस्य णकारे 'षण्णाम्' इति रूपम् । अत्र 'अनाम्' इति निर्देशाद् "न पदान्ताट्टोरनाम्" इति सूत्रेण ष्टुत्वनिषेधो न । 'षड् + नवतिः, षड् + नगर्यः' इत्यत्र तु ष्टुत्वे प्राप्ते तस्य "न पदान्ताट्टोरनाम्" इति सूत्रेण निषेधे प्राप्ते तस्य "अनाम्नवतिनगरीणामिति वाच्यम्" इति वार्तिकेन प्रतिषेधे ततः "ष्टुना ष्टुः" इति ष्टुत्वेन नकारस्य णकारे 'षड् + णवतिः, षड् + णगर्यः' इति जाते डकारस्य "यरोऽनुनासिके-" इति वैकल्पिकेऽनुनासिके णकारे 'षण्णवतिः, षण्णगर्यः' इति, अनुनासिकाभावपक्षे- 'षड्णवतिः, षड्णगर्यः' इत्यपि रूपे सिद्ध्यतः ।

ष्टुत्वनिषेधकं सूत्रम्-

**तोः षि ८ । ४ । ४३**

**तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः ।**

'सन् + षष्ठः' इत्यत्र षकारेण योगे तवर्गीयस्य नकारस्य स्थाने "ष्टुना ष्टुः" इति ष्टुत्वे प्राप्तेऽनेन सूत्रेण तन्निषेधे 'सन्षष्ठः' इति रूपम् ।

## प्रयोगसिद्धिप्रकारः

### सच्चित्

'सत् + चित्' इति स्थिते "यथासङ्ख्यमनुदेशः समानाम्" इति सूत्रसहकृतेन "स्तोः श्चुना श्चुः" इति सूत्रेण श्चुत्वे तकारस्य स्थाने चकारादेशे 'सच्चित्' इति रूपं सिद्धम् ।

### पेष्टा

'पेष् + ता' इति स्थिते षकारेण योगे तकारस्य स्थाने "ष्टुना ष्टुः" इति सूत्रेण ष्टुत्वेन टकारादेशे 'पेष्टा' इति रूपं सिद्धम् ।

# अभ्यासः

## १. अधो लिखितेषु प्रयोगेषु सन्धिविच्छेदं कुरुत

कृष्णश्चपलः, नारदश्शशाप, ग्रामाच्चलितः, तच्च, भवड्डमरुः, मनष्षष्ठम्, तड्ढक्का

## २. सन्धिं कुरुत

हरिस् + शरणम्, कश्चित् + चौरः, द्वादशस् + ठकारः, उद् + डीयते, तद् + जन्यः, राजन् + जय, भवान् + जीवतु

## ३. 'विश् + नः' इत्यत्र कथं नकारस्य चुत्वं न भवति ?

## ४. "ष्टुना ष्टुः" इति सूत्रस्यार्थं लिखत ।

## ५. ससूत्रं प्रयोगसिद्धिप्रकारं दर्शयत

रामश्चिनोति, तट्टीका, षण्णवतिः, सन् षष्ठः, प्रश्नः, षण्णाम्, षट् सन्तः

## ६. रिक्तस्थानं पूरयत

(क) 'विश्नः' इत्यत्र "स्तोः श्चुना श्चुः" इति सूत्रेण नकारस्य श्चुत्वे प्राप्ते ... इति सूत्रेण तस्य निषेधो भवति ।

(ख) 'षट् + सन्तः' इत्यत्र ... इति सूत्रेण ष्टुत्वनिषेधः क्रियते ।

(ग) 'षण्णगर्यः' इत्यत्र ... इति वार्तिकेन ष्टुत्वनिषेधस्य प्रतिषेधात् ष्टुत्वं विधीयते ।

(घ) षकारे परे तवर्गस्य ... इति सूत्रेण ष्टुत्वनिषेधः ।

## ७. परस्परं मेलयत

| | |
|---|---|
| स्तोः श्चुना श्चुः | शात् परस्य तवर्गस्य चुत्वनिषेधकम् |
| ष्टुना ष्टुः | पदान्तटवर्गात्परयोः स्तोः ष्टुत्वनिषेधकम् |
| तोः षि | श्चुत्वविधायकम् |
| न पदान्ताट्टोरनाम् | तवर्गस्य षकारे परे ष्टुत्वनिषेधकम् |
| शात् | ष्टुत्वविधायकम् |

# परसवर्णपूर्वसवर्णादिसन्धिः

विभाषयानुनासिकादेशविधायकं विधिसूत्रम्-

**यरोऽनुनासिकेऽनुनासिको वा ८ । ४ । ४५**

**यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः, एतद्मुरारिः । स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते । चतुर्मुखः ।**

पदान्तस्य यर्प्रत्याहारस्थवर्णस्य स्थानेऽनुनासिकादेशो विकल्पेन भवत्यनुनासिके परे । 'एतद् + मुरारिः' इत्यत्र दकारस्य स्थाने वैकल्पिकेऽनुनासिके, स्थानप्रयत्नसाम्याद् नकारे एतन्मुरारिः, अनुनासिकाभावे एतद्मुरारिः इति सिद्धम् । विधिरयं रेफे न प्रवर्तते, 'एतद् + मुरारिः' इत्यत्र दन्तस्थानसाम्यात् स्पृष्टप्रयत्नसाम्याच्च दस्य अनुनासिको नकारादेशः, 'चतुर् + मुखः' इत्यादौ तु रेफस्य णकारेण स्थानसाम्येऽपि प्रयत्नभेदाद् अनुनासिकविधिर्न प्रवर्तते इत्यर्थः ।

**"प्रत्यये भाषायां नित्यम्"** (वा.) **तन्मात्रम् । चिन्मयम् । कथं तर्हि मदोदग्राः ककुद्मन्त इति । यवादिगणे दकारनिपातनात् ।**

अनुनासिकादौ प्रत्यये परे पदान्तस्य यरो लौकिकप्रयोगे नित्यमनुनासिको भवति । 'तद् + मात्रम्' इत्यत्र मात्रच्प्रत्ययत्वाद् अनेन वार्तिकेन नित्यमेव दकारस्यानुनासिके नकारे 'तन्मात्रम्' इति रूपम् । एवमेव- चिद् + मयम् - चिन्मयम् । 'ककुद् + मन्तः' इत्यत्रानेन दकारस्य स्थाने कथमनुनासिकनकारो न भवतीति जिज्ञासायां यवादिगणे ककुद्मच्छब्दे दकारनिर्देशात् तस्यानुनासिको न सम्भवतीति भावः ।

परसवर्णादेशविधायकं विधिसूत्रम्-

**तोर्लि ८ । ४ । ६०**

**तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः । विद्वाँल्लिखति । नकारस्यानुनासिको लकारः ।**

लकारे परे सति तवर्गस्थवर्णानां स्थाने परसवर्णादेशो भवतीति सूत्रार्थः । 'तद् + लयः' इत्यत्र दकारस्य स्थाने परसवर्णो लकारादेशः । 'विद्वान् + लिखति' इत्यत्र अनुनासिकस्य नकारस्य स्थानेऽनुनासिक एव लँकारादेशः, तेन 'विद्वाँल्लिखति' इति रूपम् ।

पूर्वसवर्णादेशविधायकं विधिसूत्रम्-

**उदः स्थास्तम्भोः पूर्वस्य ८ । ४ । ६१**

**उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् । "आदेः परस्य" । उत्थानम् । उत्तम्भनम् ।**

उद्-शब्दात् परयोः स्था-स्तम्भशब्दयोराद्यस्य सकारस्य स्थाने पूर्वसवर्णादेशो भवतीति सूत्रार्थः । अत्र अघोषस्य महाप्राणस्य सस्य स्थाने तादृश एव थकारो बोध्यः । सस्य "झरो झरि सवर्णे" इति पाक्षिको लोपः । लोपाभावपक्षे तु थकारस्यैव श्रवणम् । न तु "खरि च" इति चर्त्वम्, चर्त्वं प्रति पूर्वसवर्णथकारादेशस्यासिद्धत्वात् । 'उद् + स्थानम्', 'उद् + स्तम्भनम्' इत्यत्र "तस्मादित्युत्तरस्य", "आदेः परस्य" इति परिभाषासूत्राभ्यां स्था-स्तम्भोः सकारस्याघोषमहाप्राणस्य स्थाने अनेन सूत्रेण तादृशे पूर्वसवर्णे थकारे 'उद् थ् थानम्, उद् थ् तम्भनम्' इति जाते "झरो झरि सवर्णे" इति सूत्रेण दकारोत्तरवर्तिथकारस्य पाक्षिके लोपे, दकारस्य "खरि च" इति चर्त्वे वर्णसम्मेलने 'उत्थानम्, उत्तम्भनम्' इति रूपे, लोपाभावपक्षे- 'उत्थ्थानम्, उत्थ्तम्भनम्' इति रूपे । अत्र 'उत् थ् थानम्, उत् थ् तम्भनम्' इत्यत्र तकारोत्तरवर्तिथकारस्य न चर्त्वम्, "खरि च" इति सूत्रापेक्षया "उदः स्थास्तम्भोः पूर्वस्य" इति परत्रिपादीत्वाच्चर्त्वं न सम्भवति ।

पूर्वसवर्णादेशविधायकं विधिसूत्रम्-

**झयो होऽन्यतरस्याम् ८ । ४ । ६२**

**झयः परस्य हस्य पूर्वसवर्णो वा स्यात् । घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः । वाग्घरिः, वाग्हरिः ।**

'वाच् + हरिः' इत्यत्र "चोः कुः" इति चकारस्य कुत्वे 'वाक् + हरिः' इति जाते ककारस्य जश्त्वेन गकारे 'वाग् + हरिः' इत्यवस्थायां "झयो होऽन्यतरस्याम्" इति सूत्रेण हकारस्य पूर्वसवर्णविधौ गकारः पूर्वनिमित्तम्, तस्य सवर्णाः क्, ख्, ग्, घ्, ङ् इति पञ्चवर्णाः सन्ति । तेषां हकारेण स्थानिना स्थानत आन्तर्यं समानम्, आभ्यन्तरप्रयत्नसाम्यं तु पञ्चानामपि हकारेण स्थानिना न विद्यते, तेन बाह्यप्रयत्ने घोषनादसंवारमहाप्राणवतो हकारस्य स्थाने घोषनादसंवारमहाप्राणवान् घकारादेशो जायते, तेन पूर्वसवर्णपक्षे- वाग्घरिः, पूर्वसवर्णाभावपक्षे- वाग्हरिरिति द्वे रूपे ।

विभाषया छकारादेशविधायकं विधिसूत्रम्-

**शश्छोऽटि ८ । ४ । ६३**

**पदान्ताज्झयः परस्य शस्य छो वा स्यादटि । दस्य श्चुत्वेन जकारे कृते ।**

चर्त्वविधायकं विधिसूत्रम्-

**खरि च ८ । ४ । ५५**

**खरि झलां चरः स्युः । इति जकारस्य चकारः । तच्छिवः, तच्शिवः ।**

'तद् + शिवः' इत्यत्र दस्य श्चुत्वेन जकारे 'तज् + शिवः' इति जातेऽनेन सूत्रेण चर्त्वे 'तच् + शिवः' इत्यवस्थायां "शश्छोऽटि" इति सूत्रेण शकारस्य वैकल्पिके छकारे 'तच्छिवः' इति, अन्ये पक्षे 'तच्शिवः' इति द्वे रूपे ।

**छत्वममीति वाच्यम् (वा । तच्छ्लोकेन, तच्श्लोकेन । अमि किम् ? वाक्च्योतति ।**

पदान्ताद् झयः परस्य शस्य छो वा स्याद् अमि परे इति वक्तव्यम् । "शश्छोऽटि" इत्यस्य स्थाने "शश्छोऽमि" इति पठितव्यमिति वार्तिकाशयः । 'तद् + श्लोकेन' इत्यत्र दकारस्य श्चुत्वेन जकारे, तस्य चर्त्वेन चकारे 'तच् + श्लोकेन' इति जातेऽनेन वार्तिकेन शकारस्य वैकल्पिके छत्वे 'तच्छ्लोकेन' इति, पक्षे 'तच्श्लोकेन' इति द्वे रूपे । 'अमि' इति निर्देशाद् 'वाक् + श्च्योतति' इत्यत्र चकारस्य अम्प्रत्याहाराद् बहिर्भूतत्वान्न छत्वम् ।

## प्रयोगसिद्धिप्रकारः

### एतन्मुरारिः/एतद्मुरारिः

'एतद् + मुरारिः' इत्यवस्थायां "स्थानेऽन्तरतमः" इति सूत्रसहकृतेन "यरोऽनुनासिकेऽनुनासिको वा" इति सूत्रेण दकारस्य स्थाने वैकल्पिकेऽनुनासिके नकारादेशे 'एतन्मुरारिः' इति रूपम्, तदभावे 'एतद्मुरारिः' इति रूपं सिद्धम् ।

### तल्लयः

'तद् + लयः' इत्यत्र "तोर्लि" इति सूत्रेण परसवर्णे दकारस्य स्थाने लकारादेशे 'तल्लयः' इति रूपं सिद्धम् ।

### वाग्घरिः/वाग्हरिः

'वाच् + हरिः' इत्यत्र "चोः कुः" इति सूत्रेण कुत्वे 'वाक् + हरिः' इति जाते "झलां जशोऽन्ते" इति सूत्रेण ककारस्य जश्त्वेन गकारे 'वाग् + हरिः' इत्यवस्थायां "झयो होऽन्यतरस्याम्" इति सूत्रेण हकारस्य वैकल्पिके पूर्वसवर्णे घकारादेशे 'वाग्घरिः' इति, पूर्वसवर्णाभावपक्षे 'वाग्हरिः' इति द्वे रूपे सिद्धे ।

# अभ्यासः

१. **'झय्' प्रत्याहारे के वर्णाः समायान्ति ?**

२. **अधो लिखितानां सूत्राणामर्थं लिखत**

(क) यरोऽनुनासिकेऽनुनासिको वा

(ख) तोर्लि

(ग) उदः स्थास्तम्भोः पूर्वस्य

(घ) शश्छोऽटि

३. **अधस्तनानां प्रयोगाणां सन्धिविच्छेदं कुरुत**

तन्मात्रम्, प्राङ्न्यायः, एतन्मुखम्, उल्लेखः, भवाँल्लुनाति, तद्धितम्, उत्थाय, भेत्ता, छेत्तव्यम्

४. **ससूत्रं रूपसिद्धिप्रकारं प्रदर्शयत**

तन्मात्रम्, विद्वाँल्लिखति, उत्थानम्, तच्छिवः

५. **रिक्तस्थानं पूरयत**

(क) अम्प्रत्याहारे ... वर्णा भवन्ति ।

(ख) तवर्गस्य लकारे परे ... इत्यनेन परसवर्णादेशः क्रियते ।

(ग) झयः परस्य हस्य वैकल्पिके पूर्वसवर्णे कृते 'तद्धीनम्' इति रूपम्, पक्षे ........ इति रूपं भवति ।

(घ) 'तद् + शिवः' इत्यत्र श्चुत्वे कृते ........... स्थितिर्भवति ।

(ङ) "उदः स्थास्तम्भोः पूर्वस्य" इति सूत्रं ............ करोति ।

६. **परस्परं मेलयत**

| | |
|---|---|
| यर् | अ इ उ ऋ लृ ए ओ ऐ औ ह् य् व् र् |
| झय् | झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् ह् |
| अट् | ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् |
| खर् | झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् |
| झल् | य् व् र् ल् ञ् म् ङ् ण् न् झ् भ् घ् ढ् ध् ज् ब् ग् ड् द् ख् फ् छ् ठ् थ् च् ट् त् क् प् श् ष् स् |
| चर् | च् ट् त् क् प् श् ष् स् |

त्रयोदशः पाठः

# अनुस्वारपरसवर्णादिसन्धिः

पदान्तेऽनुस्वारादेशविधायकं विधिसूत्रम्-

**मोऽनुस्वारः ८ । ३ । २३**

**मान्तस्य पदस्यानुस्वारः स्याद्धलि । "अलोऽन्त्यस्य" । हरिं वन्दे । 'पदस्य' इति किम् ? गम्यते ।**

हलि परे सति मकारान्तं यत् पदं तस्यान्त्यस्य मकारस्य स्थानेऽनुस्वारादेशो भवतीति सूत्रार्थः । 'हरिम् + वन्दे' इत्यत्रान्त्यस्यालो मकारस्य स्थानेऽनेन सूत्रेणानुस्वारादेशे 'हरिं वन्दे' इति रूपम् । विधिरयं पदान्त एव प्रवर्तते, तेन 'गम् + यते' इत्यत्र मकारस्य पदान्तत्वाभावान्नानुस्वारः, 'गम्यते' इत्येव रूपम् ।

अपदान्तेऽनुस्वारादेशविधायकं विधिसूत्रम्-

**नश्चापदान्तस्य झलि ८ । ३ । २४**

**नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि किम् ? मन्यते ।**

अपदान्तस्य नकारस्य मकारस्य च झलि परेऽनुस्वारादेशो भवति । 'यशान् + सि', 'आक्रम् + स्यते' इत्यत्रापदान्ते स्थितस्य नकारस्य मकारस्य च स्थानेऽनेन सूत्रेणानुस्वारे- यशांसि, आक्रंस्यते । एवमेव पयांसि, अवगंस्यते, धनूंषि इत्यादयः प्रयोगाः सिद्धचन्ति । अत्र झल्ग्रहणाभावे 'मन्यते' इत्यादावपि अनुस्वारं प्राप्नोति, झल्ग्रहणे तु नस्य झल्परकत्वाभावान्नानुस्वारः ।

परसवर्णादेशविधायकं विधिसूत्रम्-

**अनुस्वारस्य ययि परसवर्णः ८ । ४ । ५८**

**स्पष्टम् । अङ्कितः । अञ्चितः । कुण्ठितः । शान्तः । गुम्फितः । 'कुर्वन्ति' इत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम् ।**

यय्-प्रत्याहारस्थेषु वर्णेषु परेषु सत्सु अपदान्तस्यानुस्वारस्य स्थाने परसवर्णादेशो भवतीति सूत्रार्थः ।

'अन् + कितः, अन् + चितः, कुन् + ठितः, शाम् + तः, गुन् + फितः' इत्यत्र नकारस्य मकारस्य स्थाने "नश्चापदान्तस्य झलि" इति सूत्रेण अनुस्वारादेशे "अनुस्वारस्य ययि परसवर्णः" इति सूत्रेणानुस्वारस्य परसवर्णे, नासिकास्थानसाम्याद् वर्गपञ्चमे 'अङ्कितः' इत्यादीनि रूपाणि जायन्ते ।

विभाषया परसवर्णादेशविधायकं विधिसूत्रम्-

**वा पदान्तस्य ८ । ४ । ५९**

**पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि, त्वं करोषि। सय्ँयन्ता, संयन्ता। सवँ्वत्सरः संवत्सरः। यलँ्लोकम्, यं लोकम्। अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः।**

'त्वम् + करोषि' इत्यत्र "मोऽनुस्वारः" इति मस्यानुस्वारे 'त्वं + करोषि' इति स्थितेऽनेन सूत्रेणानुस्वारस्य स्थाने विकल्पेन परसवर्णे ङकारादेशे 'त्वङ्करोषि', परसवर्णाभावपक्षे 'त्वं करोषि' इति रूपद्वयम्। एवं 'सम् + यन्ता' इत्यत्र पूर्ववद् मस्यानुस्वारे 'सं + यन्ता' इत्यवस्थायामनेन सूत्रेण वैकल्पिके परसवर्णे, अनुस्वारस्य स्थानेऽनुनासिकयँकारादेशे- सय्ँयन्ता, पक्षे- संयन्ता। एवमेव- 'सं + वत्सरः, यं + लोकम्' इत्यत्रापि वैकल्पिके परसवर्णेऽनुस्वारस्य स्थानेऽनुनासिकवँकारलँकारौ बोध्यौ, तेन 'सवँ्वत्सरः, यलँ्लोकम्' इति, 'संवत्सरः, यं लोकम्' इति च।

मकारादेशविधायकं विधिसूत्रम्-

**मो राजि समः क्वौ ८। ३। २५**

**क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।**

'सम् + राट्' इत्यवस्थायां "मोऽनुस्वारः" इति मकारस्यानुस्वारे प्राप्ते तं प्रबाध्य अनेन सूत्रेण समो मकारस्य स्थाने मकार एवादेशे कृते 'सम्राट्' इति रूपम्। मस्य मविधानमनुस्वारनिवृत्यर्थम्।

मकारादेशविधायकं विधिसूत्रम्-

**हे मपरे वा ८। ३। २६**

**मपरे हकारे परे मस्य म एव स्याद् वा।**

**किम् ह्मलयति, किं ह्मलयति।**

**"यवलपरे यवला वा"** (वा.)

यवलपरे हकारे परे मकारस्य स्थाने यथासङ्ख्येन यवला वा भवन्ति।

यथासंख्यविधायकं नियमसूत्रम्-

**यथासंख्यमनुदेशः समानाम् १। ३। १०**

**समसम्बन्धी विधिर्यथासंख्यं स्यात्।**

**कियँ ह्यः, किं ह्यः। किवँ ह्वलयति, किं ह्वलयति। किलँ ह्लादयति, किं ह्लादयति।**

विभाषया नकारादेशविधायकं विधिसूत्रम्-

**नपरे नः ८। ३। २७**

**नपरे हकारे परे मस्य नः स्याद् वा। किन् ह्नुते, किं ह्नुते**

नकारपरके हकारे परे मकारस्य स्थाने विभाषया मकारादेशो भवति। 'किम् + ह्नुते' इत्यत्र "मोऽनुस्वारः" इति मस्यानुस्वारे प्राप्ते तं प्रबाध्य अनेन सूत्रेण मस्य विकल्पेन नकारादेशे 'किन् ह्नुते', पक्षे मस्यानुस्वारे 'किं ह्नुते' इति द्वे रूपे।

विभाषया कुक्टुगागमविधायकं विधिसूत्रम्-

**ङ्णोः कुक्टुक् शरि ८ । ३ । २८**

**ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि । कुक्टुकोरसिद्धत्वाज्जश्त्वं न ।**

शरि परे सति पदान्तयोर्ङकार-णकारयोः क्रमेण कुक्, टुक् इत्येतौ आगमौ विकल्पेन भवतः । उभयत्र उकार-ककारयोरित्संज्ञायां लोपे कुगागमे क्, टुगागमे च ट् इत्येव अवशिष्येते । कित्वाद् उभावागमौ “आद्यन्तौ टकितौ” इत्यनेन ङकार-णकारयोरन्तावयवत्वेन तिष्ठतः ।

**“चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्”** (वा.) **पौष्करसादिराचार्यः । प्राङ्ख्षष्ठः, प्राङ्क्षष्ठः, प्राङ्षष्ठः । सुगण्ठ्षष्ठः, सुगण्ट्षष्ठः, सुगण्षष्ठः ।**

पौष्करसादिनामकाचार्यस्य मते शरि परे वर्गप्रथमवर्णानां स्थाने वर्गद्वितीयवर्णा आदिश्यन्ते ।

‘प्राङ् + षष्ठः’ इति स्थिते “ङ्णोः कुक्टुक् शरि” इति विकल्पेन कुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे ‘प्राङ्क् + षष्ठः’ इति जातेऽनेन वार्तिकेन विकल्पेन ककारस्य स्थाने खकारादेशे ‘प्राङ्ख् षष्ठः’ इति रूपम्, अन्यमते तु द्वितीयादेशाभावपक्षे क्ष्संयोगे क्षत्वे ‘प्राङ्क्षष्ठः’ इति, कुगागमाभावे ‘प्राङ् षष्ठः’ इति त्रीणि रूपाणि ज्ञयानि । एवमेव ‘सुगण् + षष्ठः’ इत्यत्र वैकल्पिके टुगागमे ‘सुगण्ट् + षष्ठः’ इत्यवस्थायामनेन वार्तिकेन टकारस्य विकल्पेन द्वितीयादेशे ठकारे ‘सुगण्ठ्षष्ठः’ इति, द्वितीयादेशाभावे ‘सुगण्ट्षष्ठः’, टुगागमाभावे ‘सुगण्षष्ठः’ इति रूपत्रयम् ।

विभाषया धुडागमविधायकं विधिसूत्रम्-

**डः सि धुट् ८ । ३ । २९**

**डात् परस्य सस्य धुड्वा स्यात् । षट्त् सन्तः, षट् सन्तः ।**

डकारात्परस्य सकारस्य विभाषया ‘धुट्’ इत्यागमो भवति । उकार-टकारयोरित्संज्ञायां लोपे ‘ध्’ इत्येव शिष्यते । टित्वादाद्यवयवत्वम् । ‘षड् + सन्तः’ इत्यत्र अनेन सूत्रेण विकल्पेन धुडागमेऽनुबन्धलोपे टित्वादाद्यवयवत्वे ‘षड्ध् + सन्तः’ इत्यवस्थायामुभयत्र चर्त्वे ‘षट्त्सन्तः’, धुडभावे डकारस्य चर्त्वेन टकारे ‘षट् सन्तः’ इति । अत्र “चयो द्वितीयाः शरि” इति तु न प्रवर्तते, चर्त्वस्यासिद्धत्वात् ।

विभाषया धुडागमविधायकं विधिसूत्रम्-

**नश्च ८ । ३ । ३०**

**नकारान्तात्परस्य सस्य धुड् वा स्यात् । सन्त्सः, सन्सः ।**

‘सन् + सः’ इत्यत्र अनेन सूत्रेण विकल्पेन धुडागमे, धस्य चर्त्वेन तकारे ‘सन्त्सः’ इति रूपम्, पक्षे ‘सन्सः’ इति ।

विभाषया तुगागमविधायकं विधिसूत्रम्-

**शि तुक् ८ । ३ । ३१**

**पदान्तस्य नस्य शे परे तुग्वा स्याद् । "शश्छोऽटि" इति छत्वविकल्पः । पक्षे "झरो झरि सवर्णे" इति चलोपः । सञ्छम्भुः, सञ्च्छम्भुः, सञ्चशम्भुः, शञ्शम्भुः ।**

**ञ्छौ ञ्चछा ञ्चशा ञशाविति चतुष्टयम् ।**
**रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥**

'सन् + शम्भुः' इत्यत्र "शि तुक्" इत्यनेन वैकल्पिके तुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे 'सन्त् + शम्भुः' इति स्थिते तकारस्य श्चुत्वेन चकारे, नकारस्यापि श्चुत्वेन ञकारे 'सञ्च् + शम्भुः' इति स्थिते "शश्छोऽटि" इति शकारस्य वैकल्पिके छत्वे 'सञ्च् + छम्भुः इति जाते "झरो झरि सवर्णे" इति वैकल्पिके चकारस्य लोपे 'सञ्छम्भुः' इति रूपम्, चकारलोपाभावपक्षे 'सञ्च्छम्भुः' इति, छत्वलोपयोरभावे 'सञ्च्शम्भुः' इति, तुगभावे 'सञ्शम्भुः' इति चलोप-छत्व-तुगागम-विकल्पनाच्चत्वारि रूपाणि जायन्ते ।

ङमुडागमविधायकं विधिसूत्रम्-

**ङमो ह्रस्वादचि ङमुण्नित्यम् ८ । ३ । ३२**

**ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात् । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ।**

ह्रस्वात्परो यो ङम् (ङ्, ण्, न्), तदन्तात्पदात् परस्याऽच्-वर्णस्य क्रमेण 'ङमुट्' (ङम् = ङ्, ण्, न्) इत्यागमो नित्यं भवति । 'प्रत्यङ् + आत्मा, सुगण् + ईशः, सन् + अच्युतः' इत्यत्र अनेन सूत्रेण ङकार-णकार-नकारेभ्य उत्तरेषाम् आकार-ईकार-अकाररूपाणामचां क्रमेण ङकार-णकार-नकारागमेषु 'प्रत्यङ् + ङ् आत्मा, सुगण् + ण् ईशः, सन् + न् अच्युतः' इत्यवस्थासु वर्णसम्मेलने 'प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः' इति रूपाणि सिद्ध्यन्ति ।

## प्रयोगसिद्धिप्रकारः

### हरिं वन्दे

'हरिम् + वन्दे' इति स्थिते "अलोऽन्त्यस्य" इति सूत्रसहकृतेन "मोऽनुस्वारः" इति सूत्रेण मकारस्य स्थानेऽनुस्वारादेशे 'हरिं वन्दे' इति रूपं सिद्धम् ।

### यशांसि

यशस्-शब्दाज्जसि, जसः श्यादेशे, नुमि कृते, उपधादीर्घे च 'यशान् + सि' इत्यवस्थायां "नश्चापदान्तस्य झलि" इति सूत्रेण नस्यानुस्वारे 'यशांसि' इति रूपं सिद्धम् ।

### प्रत्यङ्ङात्मा

'प्रत्यङ् + आत्मा' इति स्थिते "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति सूत्रेण अकारादुत्तरस्य ङकारात्परस्य आकारस्य ङमुडागमेऽनुबन्धलोपे, यथासंख्यनियमेन ङकारागमे, टित्वादाद्यवयवत्वे च 'प्रत्यङ्ङात्मा' इति रूपं सिद्धम् ।

# अभ्यासः

१. **सन्धिविच्छेदं कुरुत**

वनं याति, पयांसि, अहञ्चिनोमि, एवम्मन्यसे, सम्राट्, गच्छन्नस्ति

२. **रूपसिद्धिप्रकारं दर्शयत**

आक्रंस्यते, अङ्कितः, त्वङ्करोषि, प्राङ्ख्षष्ठः, सञ्च्छम्भुः, सुगण्णीशः

३. **अधस्तनानां सूत्राणामर्थं लिखत**

(क) वा पदान्तस्य
(ख) अनुस्वारस्य ययि परसवर्णः
(ग) मो राजि समः क्वौ
(घ) हे मपरे वा
(ङ) नपरे नः
(च) ङमो ह्रस्वादचि ङमुण्नित्यम्

४. **अधो लिखितेषु प्रत्याहारेषु समागतान् वर्णान् लिखत**

हल्, झल्, शर्, चय्, ङम्

५. **परस्परं मेलयत**

| | |
|---|---|
| धनूंषि | "शि तुक्" इति तुक् |
| अङ्कितः | "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति ङमुट् |
| सञ्च्छम्भुः | "नश्चापदान्तस्य झलि" इत्यनुस्वारः |
| सन्नच्युतः | "अनुस्वारस्य ययि परसवर्णः" इति परसवर्णः |

६. **रिक्तस्थानं पूरयत**

(क) "नश्च" इति सूत्रं ... करोति ।
(ख) "शि तुक्" इति सूत्रेण ... विधीयते ।
(ग) ........... इति सूत्रं ङकार-णकारयोः कुक्-टुगागमौ करोति ।
(घ) "नपरे नः" इति सूत्रेण मस्य वा ... भवति ।
(ङ) 'कुण्ठितः' इत्यत्र परसवर्णविधायकं सूत्रं ............ ।

## चतुर्दशः पाठः

# रुत्वादिविधिः

रुत्वविधायकं विधिसूत्रम्-

**समः सुटि ८ । ३ । ५**

**समो रुः स्यात् सुटि । "अलोऽन्त्यस्य" ।**

विभाषया अनुनासिकादेशविधायकं विधिसूत्रम्-

**अत्रानुनासिकः पूर्वस्य तु वा ८ । ३ । २**

**अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ।**

अनुस्वारागमविधायकं विधिसूत्रम्-

**अनुनासिकात्परोऽनुस्वारः ८ । ३ । ४**

**अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात् । "खरवसानयोर्विसर्जनीयः" ।**

सत्वविधायकं विधिसूत्रम्-

**विसर्जनीयस्य सः ८ । ३ । ३४**

**खरि विसर्जनीयस्य सः स्यात् । एतदपवादे "वा शरि" इति पाक्षिके विसर्गे प्राप्ते–**

**"संपुंकानां सो वक्तव्यः"** (वा.) **सँस्स्कर्ता । संस्स्कर्ता ।**

सम्, पुम्, कान् इत्येतेषां विसर्गस्य स्थाने सकारादेशो भवतीति वार्तिकार्थः ।

'सम् + स्कर्ता' इति स्थिते "समः सुटि" इति सूत्रेण मकारस्य रुत्वेऽनुबन्धलोपे 'सर् + स्कर्ता' इति जाते "अत्रानुनासिकः पूर्वस्य तु वा" इति सूत्रेण सकारोत्तराकारस्यानुनासिकत्वविकल्पे 'सँर् + स्कर्ता' इति जाते, अनुनासिकत्वाभावपक्षे "अनुनासिकात्परोऽनुस्वारः" इति सूत्रेणानुस्वारागमे 'संर् + स्कर्ता' इत्यवस्थायां "खरवसानयोर्विसर्जनीयः" इति सूत्रेण रेफस्य विसर्गे 'सँः + स्कर्ता, संः + स्कर्ता' इति जाते "विसर्जनीयस्य सः" इत्यनेन प्राप्तं सत्वं बाधित्वा "वा शरि" इति विकल्पेन विसर्गादेशे प्राप्ते तमपि प्रबाध्य "संपुंकानां सो वक्तव्यः" इति वार्तिकेन विसर्जनीयस्य सकारादेशे 'सँस्स्कर्ता, संस्स्कर्ता' इति द्वे रूपे सिद्धे ।

रुत्वविधायकं विधिसूत्रम्-

**पुमः खय्यम्परे ८ । ३ । ६**

**अम्परे खयि पुम्शब्दस्य रुः स्यात् । व्युत्पत्तिपक्षे "अप्रत्ययस्य" इति षत्वपर्युदासात् ≍क≍पयोः प्राप्तौ, अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ, "संपुंकानाम्-" इति सः । पुँस्कोकिलः, पुंस्कोकिलः । पुँस्पुत्रः, पुंस्पुत्रः । अम्परे किम् ? पुंक्षीरम् । खयि किम् ? पुंदासः ।**

'पुँस्कोकिलः' इत्यादौ पुंशब्द औणादिकडुम्सुन्प्रत्ययान्तो विद्यते, उणादौ व्युत्पन्नपक्षोऽव्युत्पन्नपक्षश्च आश्रीयते, तेन व्युत्पत्तिपक्षे प्रत्ययस्य विसर्गत्वात् "इदुदुपधस्य-" इत्यनेन षत्वाप्राप्तौ "कुप्वो≍क≍पौ च" इत्यनेन प्राप्तस्य विसर्गस्य वारणार्थम्, अव्युत्पत्तिपक्षे च "इदुदुपधस्य" इत्यनेन प्राप्तस्य षत्वस्य वारणार्थमत्र वार्तिके पुम्शब्दस्य ग्रहणमित्यर्थः । 'पुमान् कोकिलः' इति विग्रहे कर्मधारयसमासे, सुब्लुकि, सकारलोपे 'पुम् + कोकिलः' इति जाते मकारस्य "पुमः खय्यम्परे" इति रुत्वे 'पुर् + कोकिलः' इति जाते "अत्रानुनासिकः पूर्वस्य तु वा" इति वैकल्पिके अनुनासिके 'पुँर् + कोकिलः', अनुनासिकत्वाभावेऽनुस्वारागमे 'पुंर् + कोकिलः' इति जाते रेफस्य विसर्गे "संपुंकानां सो वक्तव्यः" इति विसर्गस्य सकारादेशे 'पुँस्कोकिलः, पुंस्कोकिलः' इति । एवं 'पुम् + पुत्रः' इत्यत्र पूर्ववत् 'पुँस्पुत्रः, पुंस्पुत्रः' इति । 'अम्परे' इत्युक्तत्वात् 'पुंक्षीरम्' ककारोत्तरवर्त्तिषकारे अम्त्वाभावाद् न मस्य रुः । 'खयि' इति ग्रहणेन 'पुंदासः' इत्यत्र न रुः ।

**"ख्याञादेशे न" (वा.) पुंख्यानम् ।**

ख्याञादेशे पुम्-शब्दस्य मकारस्य रुत्वं न भवतीत्यर्थः ।

'पुम् + ख्यानम्' इत्यत्र "पुमः खय्यम्परे" इति सूत्रेण मस्य रुत्वे प्राप्तेऽनेन वार्तिकेन तन्निषेधे, मस्यानुस्वारे 'पुंख्यानम्' इति ।

रुत्वविधायकं विधिसूत्रम्-

**नश्छव्यप्रशान् ८ । ३ । ७**

**अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान्शब्दस्य । विसर्गः । सत्वम् । श्चुत्वम् । शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि । चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व । पदस्य किम् ? हन्ति । अम्परे किम् ? सन्त्सरुः । त्सरुः खड्गमुष्टिः । अप्रशान् किम् ? प्रशान्तनोति ।**

'शार्ङ्गिन् + छिन्धि' इत्यत्र अनेन सूत्रेण नस्य रुत्वे, वैकल्पिके अनुनासिकादेशे, पक्षेऽनुस्वारागमे, रेफस्य "खरवसानयोर्विसर्जनीयः" इति विसर्गे "विसर्जनीयस्य सः" इति विसर्गस्य सत्वे "स्तोः श्चुना श्चुः" इति श्चुत्वे 'शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि' इति द्वे रूपे ।

रुत्वविधायकं विधिसूत्रम्-

**नॄन्पे ८ । ३ । १०**

**नॄन् इत्यस्य रुः स्याद्वा पकारे परे ।**

विभाषया जिह्वामूलीयोपध्मानीयविसर्गविधायकं विधिसूत्रम्-

**कुप्वो≍क≍पौ च । ८ । ३ । ३७**

**कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः, चाद्विसर्गः । येन नाप्राप्तन्यायेन "विसर्जनीयस्य सः" इत्यस्यापवादोऽयम्, न तु "शर्परे विसर्जनीयः" इत्यस्य । तेन 'वासः क्षौमम्' इत्यादौ विसर्ग एव । नॄँ≍पहि, नॄं≍पाहि, नॄँःपाहि, नॄंःपाहि, नॄन्पाहि ।**

'नॄन् + पाहि' इत्यत्र नकारस्य "नॄन्पे" इति सूत्रेण रुत्वे, वैकल्पिकेऽनुनासिकादेशे पक्षेऽनुस्वारागमे च, रेफस्य विसर्गे "विसर्जनीयस्य सः" इति सूत्रेण प्राप्तं सत्वं बाधित्वा "कुप्वो≍क≍पौ च" इति सूत्रेण विकल्पेनोपध्मानीयादेशे 'नॄँ≍पाहि, नॄं≍पाहि' इति, पक्षान्तरेऽनेनैव सूत्रेण चाद् विसर्गस्य विसर्गे 'नॄँःपाहि, नॄंपाहि', रुत्वाभावे 'नॄन्पाहि' इति पञ्च रूपाणि ।

रुत्वविधायकं विधिसूत्रम्-

**कानाम्रेडिते ८ । ३ । १२**

**कान्नकारस्य रुः स्यादाम्रेडिते परे । संपुंकानामिति सः । यद्वा ।**

षकारादेशविधायकं विधिसूत्रम्-

**कस्कादिषु च ८ । ३ । ४८**

**≍क≍पयोरपवादः । एष्विण उत्तरस्य विसर्गस्य षः स्यात् । अन्यस्य तु सः । काँस्कान्, कांस्कान् । कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालम् । आकृतिगणोऽयम् ।**

कस्कादिगणपठितेषु शब्देषु इणप्रत्याहारस्थवर्णात् परस्य विसर्गस्य स्थाने षकारादेशः, इणभिन्नवर्णात् परस्य विसर्गस्य स्थाने तु सकारादेशो भवतीति सूत्रार्थः । 'कान्' इत्यस्य वीप्सायां द्वित्वे 'कान् + कान्' इति स्थिते द्वितीयस्य 'कान्' इत्यस्य "तस्य परमाम्रेडितम्" इति आम्रेडितसंज्ञायां "कानाम्रेडिते" इति सूत्रेण प्रथमनकारस्य रुत्वे, वैकल्पिकेऽनुनासिके, रेफस्य विसर्गे 'काँः + कान्' इति जाते "विसर्जनीयस्य सः" इति सूत्रेण सत्वे प्राप्ते तत् प्रबाध्य "कस्कादिषु च" इति सूत्रेण सत्वे 'काँस्कान्' इति, अनुनासिकाभावेऽनुस्वारागमे पूर्ववत् 'कांस्कान्' इति द्वे रूपे ।

अधिकारसूत्रम्-

**संहितायाम् ६ । १ । ७२**

**इत्यधिकृत्य**

तुगागमविधायकं विधिसूत्रम्-

**छे च ६ । १ । ७३**

**ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम् । श्चुत्वस्यासिद्धत्वाज्जश्त्वेन दः । ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः । तस्य चर्त्वेन चः । श्चुत्वस्यासिद्धत्वात् 'चोः कुः' इति कुत्वं न । स्वच्छाया । शिवच्छाया ।**

'शिव + छाया, स्व + छाया' इत्यत्र अनेन सूत्रेण तुगागमे 'शिवत् + छाया, स्वत् + छाया' इति जाते

श्चुत्वस्याऽसिद्धत्वात् पूर्वं तकारस्य “झलां जशोऽन्ते” इति जश्त्वेन दकारे ‘शिवद् + छाया, स्वद् + छाया’ इति स्थितौ चर्त्वस्यासिद्धत्वात्पूर्वं दकारस्य श्चुत्वेन जकारे ‘शिवज् + छाया, स्वज् + छाया’ इति जाते “खरि च” इति जकारस्य चर्त्वेन चकारे ‘शिवच्छाया, स्वच्छाया’ इति, अत्र “चोः कुः” इति कुत्वन्तु न, कुत्वं प्रति श्चुत्वस्यासिद्धत्वात् ।

तुगागमविधायकं विधिसूत्रम्-

**आङ्माङोश्च ६ । १ । ७४**

**एतयोश्छे परे तुक् स्यात् । “पदान्ताद्वा” इति विकल्पापवादः । आच्छादयति । माच्छिदत् ।**

तुगागमविधायकं विधिसूत्रम्-

**दीर्घात् ६ । १ । ७५**

**दीघाच्छे परे तुक्स्यात् । दीर्घस्यायं तुक्, न तु ह्रस्य, सेनासुराच्छाया इति ज्ञापकात् । चेच्छिद्यते ।**

विभाषया तुगागमविधायकं विधिसूत्रम्-

**पदान्ताद्वा ६ । १ । ७६**

**दीर्घात् पदान्ताच्छे परे तुग्वा स्यात् । लक्ष्मीच्छाया, लक्ष्मीछाया ।**

॥ इति हल्सन्धिप्रकरणम् ॥

# प्रयोगसिद्धिप्रकारः

### स्वच्छाया

'स्व + छाया' इति स्थिते "छे च" इति सूत्रेण वकारादकारस्य तुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे 'स्वत् + छाया' इति जाते श्चुत्वस्याऽसिद्धत्वात् पूर्वं तकारस्य "झलां जशोऽन्ते" इति जश्त्वेन दकारे 'स्वद् + छाया' इति जाते चर्त्वस्यासिद्धत्वात्पूर्वं दकारस्य "स्तोः श्चुना श्चुः" इति श्चुत्वेन जकारे 'स्वज् + छाया' इति जाते "खरि च" इति जकारस्य चर्त्वेन चकारे 'स्वच्छाया' इति रूपं सिद्धम् । अत्र "चोः कुः" इति कुत्वन्तु न भवति, कुत्वं प्रति श्चुत्वस्यासिद्धत्वात् ।

### लक्ष्मीच्छाया/लक्ष्मीछाया

'लक्ष्मी + छाया' इति स्थिते "पदान्ताद्वा" इति सूत्रेण ईकारस्य विकल्पेन तुगागमेऽनुबन्धलोपे 'लक्ष्मीत् + छाया' इति जाते तकारस्य जश्त्वेन दकारे, तस्य श्चुत्वेन जकारे, तस्य चर्त्वेन चकारे च कृते 'लक्ष्मीच्छाया' इति रूपम्, तुगभावपक्षे 'लक्ष्मीछाया' इति रूपद्वयं सिद्धम् ।

### काँस्कान्/कांस्कान्

'कान्' इत्यस्य वीप्सायां द्वित्वे 'कान् + कान्' इति स्थिते द्वितीयस्य 'कान्' इत्यस्य "तस्य परमाम्रेडितम्" इति आम्रेडितसंज्ञायां "कानाम्रेडिते" इति सूत्रेण प्रथमनकारस्य रुत्वे 'कार् + कान्' इति जाते "अत्रानुनासिकः पूर्वस्य तु वा" इति सूत्रेण वैकल्पिकेऽनुनासिके "खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्गे 'काँः + कान्' इति जाते "विसर्जनीयस्य सः" इति सूत्रेण सत्वे प्राप्ते तत् प्रबाध्य "कस्कादिषु च" इति सूत्रेण विसर्गस्य सत्वे 'काँस्कान्' इति रूपं सिद्धम् । अनुनासिकाभावपक्षे "अनुनासिकात् परोऽनुस्वारः" इति सूत्रेणाऽनुस्वारागमे पूर्ववत् 'कांस्कान्' इति रूपञ्च सिद्ध्यति ।

# अभ्यासः

**१. सन्धिविच्छेदं कुरुत**

सँस्स्कारः, पुँस्पुत्रः, वृक्षाँश्चिनोति, नॄन्पश्य, कस्कः, पदच्छेदः, काँश्चन, अनुच्छेदः

२. ससूत्रं प्रयोगसिद्धिप्रक्रियां दर्शयत

सँस्स्कर्ता, पुंस्कोकिलः, पुंख्यानम्, नॄँ≍पाहि, सर्पिष्कुण्डिका, आच्छादयति, शिवच्छाया

**३. अधो लिखितानां सूत्राणामर्थं लिखत**

(क) छे च (ख) आङ्माङोश्च (ग) दीर्घात्

(घ) कुप्वोः≍क≍पौ च (ङ) पुमः खय्यम्परे

**४. शुद्धं वाचयत**

समः सुटि, अनुनासिकात्परोऽनुस्वारः, नश्छव्यप्रशान्, नॄन्पे, कस्कादिषु च

**५. रिक्तस्थानं पूरयत**

(क) ........... इति सूत्रं रोः पूर्वस्यानुनासिकं करोति ।

(ख) 'सँस्स्कर्ता' इत्यत्र ........... इति वार्तिकेन विसर्गस्य सत्वं विधीयते ।

(ग) पुम्-शब्दस्य ........... इति सूत्रेण मकारस्य रुत्वं भवति ।

(घ) 'पुंख्यानम्' इत्यत्र मस्य ........... इति वार्तिकेन रुत्वं निषिद्धम् ।

(ङ) 'पुँस्पुत्रः' इत्यत्र ........... इति वार्तिकं सादेशं करोति ।

**६. परस्परं मेलयत**

| | |
|---|---|
| अत्रानुनासिकः पूर्वस्य तु वा | दीर्घात् छे परे तुक् |
| अनुनासिकात्परोऽनुस्वारः | वा जिह्वामूलीयोपाध्मानीयौ |
| आङ्माङोश्च | ह्रस्वस्य छे परे तुक् |
| दीर्घात् | अनुस्वारागमः |
| कुप्वोः≍क≍पौ च | अनुनासिकादेशः |

## पञ्चदशः पाठः

# अथ विसर्गसन्धिप्रकरणम्

# विसर्गसन्धिः

**"विसर्जनीयस्य सः" विष्णुस्त्राता ।**

विसर्जनीयपदानुवृत्तिप्रदर्शनार्थं "विसर्जनीयस्य सः" इति सूत्रं पुनरुपन्यस्तम् । 'विष्णुः + त्राता' इत्यवस्थायां "विसर्जनीयस्य सः" इति सूत्रेण विसर्गस्य सत्वे 'विष्णुस्त्राता' इति रूपम् ।

विसर्गादेशविधायकं विधिसूत्रम्-

**शर्परे विसर्जनीयः ८ । ३ । ३५**

**शर्परे खरि विसर्जनीयस्य विसर्जनीयः, न त्वन्यत् । कःत्सरुः । घनाघनः क्षोभणः । इह यथायथं सत्वं जिह्वामूलीयश्च न ।**

'कस् + त्सरुः' इत्यत्र सस्य "ससजुषो रुः" इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे "खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्गे 'कः + त्सरुः' इति स्थितौ "शर्परे विसर्जनीयः" इति सूत्रेण विर्सगस्य स्थाने विसर्गादेशे 'कःत्सरुः' इति । एवमेव 'घनाघनः क्षोभणः, अयः क्षुरः, भवतः क्षेत्रम्, वासः क्षौमम्' इत्यादयः प्रयोगा भवन्ति । अनेन विसर्गस्य विसर्गविधानं जिह्वामूलीयविसर्गादिकार्यं परिहारार्थम् ।

विसर्गादेशविधायकं विधिसूत्रम्-

**वा शरि ८ । ३ । ३६**

**शर्परे विसर्जनीयस्य विसर्जनीय एव वा स्यात् । हरिः शेते, हरिश्शेते ।**

शर्-प्रत्याहारे परे विसर्जनीयस्य स्थाने विसर्जनीय एवादेशो विकल्पेन विधीयते । 'हरिस् + शेते' इत्यत्र रुत्वादिकार्ये 'हरिः + शेते' इति जाते "विसर्जनीयस्य सः" इति सूत्रेण विसर्गस्य सत्वे प्राप्ते तं बाधित्वा "वा शरि" इत्यनेन विसर्गस्य वैकल्पिके विसर्गे 'हरिः शेते' इति, तदभावे विसर्गस्य सत्वे, श्चुत्वे च 'हरिश्शेते' इति द्वे रूपे । एवमेव- मासः षष्ठः, मासष्षष्ठः । बालः शयितः, बालश्शयितः । वायुः सरति, वायुस्सरति । इत्यादि ।

**"खर्परे शरि वा विसर्गलोपो वक्तव्यः"** (वा.) **राम स्थाता, रामः स्थाता । हरि स्फुरति, हरिः स्फुरति । पक्षेविसर्गे सत्वे च त्रैरुप्यम् ।**

खर्प्रत्याहारपरके शर्प्रत्याहारे परे विसर्गस्य वैकल्पिको लोपो भवतीत्यर्थः । 'हरिः + स्फुरति' इत्यत्र "वा शरि"

इत्यनेन वैकल्पिके विसर्गे प्राप्ते तं प्रबाध्य "खर्परे शरि वा विसर्गलोपो वक्तव्यः" इति वैकल्पिके विसर्गलोपे 'हरि स्फुरति' इति, पक्षे "वा शरि" इति वैकल्पिके विसर्गे 'हरिः स्फुरति' इति, तदभावे "विसर्जनीयस्य सः" इति विसर्गस्य सत्वे 'हरिस्स्फुरति' इति त्रीणि रूपाणि ज्ञेयानि ।

**"कुप्वो ≍क≍पौ च" क≍करोति, कः करोति । क≍खनति, कः खनति । क≍पचति, कः पचति । क≍फलति, कः फलति ।**

सकारादेशविधायकं विधिसूत्रम्-

**सोऽपदादौ ८ । ३ । ३८**

**विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः ।**

**"पाश-कल्प-क-काम्येष्विति वाच्यम्"** (वा.) **पयस्पाशम् । यशस्कल्पम् । यशस्कम् । यशस्काम्यति ।**

अपदाद्येषु पाश-कल्प-क-काम्यशब्देष्वेव विसर्जनीयस्य सकारादेशो भवतीति वार्तिकार्थः । पाश, कल्प, क, काम्य एते प्रत्ययाः ।

**"काम्ये रोरेवेति वाच्यम्" (वा.) नेह । गीःकाम्यति ।**

काम्यप्रत्यये परे रुस्थानिकस्यैव विसर्गस्य सकारादेशो भवति, न त्वन्यस्येति वार्तिकार्थः । तेन रेफान्ताद् गिर्-शब्दान्निष्पन्नस्य 'गीः' इत्यस्य विसर्गस्य रुस्थानिकत्वाभावात् सत्वं न, तेन 'गीःकाम्यति' इति ।

**"अनव्ययस्येति वाच्यम्" (वा.) प्रातःकल्पम् ।**

"सोऽपदादौ" इति सूत्रेण विधीयमानं विसर्जनीयस्य सत्वमव्ययविसर्जनीयस्य न भवतीति वक्तव्यमित्यर्थः । 'प्रातः' इत्यस्याव्ययत्वान्नात्र सकारादेशः ।

षकारादेशविधायकं विधिसूत्रम्-

**इणः षः ८ । ३ । ३९**

**इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति ।**

इण उत्तरस्य विसर्जनीयस्य स्थाने षकारादेशो भवति, कवर्गे पवर्गे च परे । विशेषेण पाश-कल्प-क-काम्येष्वेव अयं विधिः । 'सर्पिः + कल्पम्' इत्यत्र "सोऽपदादौ" इत्यनेन विसर्गस्य सकारे प्राप्ते तं प्रबाध्य "इणः षः" इति षत्वे 'सर्पिष्कल्पम्' इति रूपम् । एवमेव 'सर्पिष्कमि'त्यादिरूपाणि ।

सकारादेशविधायकं विधिसूत्रम्-

**नमस्पुरसोर्गत्योः ८ । ३ । ४०**

**गतिसंज्ञयोरनयोर्विसर्गस्य सः कुप्वोः परयोः । नमस्करोति । साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा । तदभावे नम≍करोति, नमः करोति । "पुरोऽव्ययम्" इति नित्यं गतिसंज्ञा पुरस्करोति । अगतित्वान्नेह । पूः पुरौ पुरः प्रवेष्टव्याः ।**

कवर्गे पवर्गे च परे सति गतिसंज्ञकयोः नमस्-पुरस्-शब्दयोर्विसर्गस्य स्थाने सकारदेशो भवति । 'नमस् + करोति' इत्यत्र रुत्वादिकार्ये 'नमः + करोति' इति स्थितौ नमस्-शब्दस्य कृधातोर्योगे "साक्षात्प्रभृतीनि च" इति विकल्पेन गतिसंज्ञायां "कुप्वो ≍क≍पौ च" इति जिह्वामूलीये प्राप्ते तं प्रबाध्य विभाषया गतिसंज्ञापक्षे "नमस्पुरसोर्गत्योः" इति सूत्रेण विसर्गस्य सत्वे 'नमस्करोति', गतिसंज्ञाभावपक्षे 'नमः करोति' इति । पुरस्-शब्दस्य तु "पुरोऽव्ययम्" इति नित्यमेव गतिसंज्ञायां 'पुरः + करोति' इत्यवस्थायामनेन सूत्रेण विसर्गस्य सत्वे 'पुरस्करोति' इति रूपम् । 'पुरः प्रवेष्टव्यम्' इत्यत्र तु पुर्-शब्दस्य गतिसंज्ञाभावान्न विसर्गस्य सत्वम् ।

षकारादेशविधायकं विधिसूत्रम्-

**इदुदुपधस्य चाप्रत्ययस्य ८ । ३ । ४१**

**इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः । निष्प्रत्यूहम् । दुष्कृतम् । अप्रत्ययस्य किम् ? अग्निः करोति । वायुः करोति ।**

इकारोपधस्य उकारोपधस्य चाप्रत्ययस्य विसर्जनीयस्य षकारादेशो भवति कवर्गे पवर्गे च परे ।

**"एकादेशशास्त्रनिमित्तकस्य न षत्वम्" (वा.) कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् । तेनेह न मातुः कृपा ।**

एकादेशनिमित्तकविसर्जनीयस्य स्थाने अप्रत्ययविसर्जनीयत्वेऽपि उक्तं सत्वं न भवतीति वार्तिकार्थः ।

**मुहुसः प्रतिषेधः (वा.) मुहुः कामा ।**

मुहुस्-शब्दस्य विषये "इदुदुपधस्य चाप्रत्ययस्य" इत्यनेन विधीयमानं षत्वं न भवतीति वार्तिकार्थः ।

विभाषया सकारादेशविधायकं विधिसूत्रम्-

**तिरसोऽन्यतरस्याम् ८ । ३ । ४२**

**तिरसो विसर्गस्य सो वा स्यात् कुप्वोः परयोः । तिरस्कर्ता, तिरःकर्ता ।**

'तिरस् + कर्ता' इत्यत्र सस्य "ससजुषो रुः" इति रुत्वे, रेफस्य विसर्गे "तिरसोऽन्यतरस्याम्" इति विसर्गस्य विकल्पेन सकारे 'तिरस्कर्ता', पक्षे- 'तिरःकर्ता' इति ।

विभाषया षकारादेशविधायकं विधिसूत्रम्-

**द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ८ । ३ । ४३**

**कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः । द्विष्करोति, द्विःकरोति । त्रिष्करोति, त्रिःकरोति । चतुष्करोति, चतुःकरोति ।**

कवर्गे पवर्गे च परे सति द्विस्, त्रिस्, चतुर् इत्येतेषां कृत्वोऽर्थे वर्तमानानां शब्दानां विसर्जनीयस्य स्थाने विकल्पेन षकारादेशो भवति ।

'द्विस् + करोति' इत्यत्र सस्य रुत्वे विसर्गे च 'द्विः + करोति' इति जातेऽनेन सूत्रेण विकल्पेन विसर्गस्य षत्वे 'द्विष्करोति', तदभावे 'द्विःकरोति' इति । एवं त्रिष्करोतीत्यादि ।

'चतुष्कपालः' इत्यत्र तु कृत्वोऽर्थे वर्तमानत्वाभावादस्य विधेरप्रवृत्तौ "इदुदुपधस्य चाप्रत्ययस्य" इति नित्यं षत्वम् ।

विभाषया षकारादेशविधायकं विधिसूत्रम्-

**इसुसोः सामर्थ्ये ८ । ३ । ४४**

**इसुसोर्विसर्गस्य षः स्याद्वा कुप्वोः । सर्पिष्करोति, सर्पिःकरोति । धनुष्करोति, धनुःकरोति । सामर्थ्यमिह व्यपेक्षा । सामर्थ्ये किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम् ।**

इस्, उस् इत्येतयोर्विसर्जनीयस्य स्थाने विकल्पेन षकारादेशो भवति, सामर्थ्ये सति कवर्गे पवर्गे च परतः ।

'सर्पिस् + करोति' इत्यत्र सस्य रुत्वे विसर्गे च "कुप्वोः≍क≍पौ च" इति जिह्वामूलीये प्राप्ते तं प्रबाध्य अनेन सूत्रेण विकल्पेन षत्वे 'सर्पिष्करोति', पक्षे 'सर्पिःकरोति' इति ।

षकारादेशविधायकं विधिसूत्रम्-

**नित्यं समासेऽनुत्तरपदस्थस्य ८ । ३ । ४५**

**इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात् कुप्वोः परयोः । सर्पिष्कुण्डिका । अनुत्तरपदस्थस्य इति किम् ? परमसर्पिः कुण्डिका । कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो व्यपेक्षायां नित्यार्थश्च ।**

कवर्गे पवर्गे च परे सति समासे इसुसोऽनुत्तरपदस्थस्य विसर्जनीयस्य नित्यं षत्वं भवति ।

सकारादेशविधायकं विधिसूत्रम्-

**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ८ । ३ । ४६**

**अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु, न तूत्तरपदस्थस्य ।**

**अयस्कारः । अयस्कामः । अयस्कंसः । अयस्कुम्भः । अयस्पात्रम् । अयस्सहिता कुशा अयस्कुशा । अयस्कर्णी । अतः किम् ? गीः कारः । अनव्ययस्य किम् ? स्वः कामः । समासे किम् ? यशः करोति । अनुत्तरपदस्थस्य किम् ? परमयशः कारः ।**

अकारादुत्तरस्य समासेऽनुत्तरपदस्थस्यानव्ययस्य विसर्जनीयस्य नित्यं सकारादेशो भवति कृ, कमि, कंस, कुम्भ, पात्र, कुशा, कर्णी इत्येतेषु परेषु । 'अयः + कारः' इत्यवस्थायां "कुप्वोः≍क≍पौ च" इति सूत्रं प्रबाध्य अनेन सूत्रेण विसर्गस्य नित्यं सकारादेशे 'अयस्कारः' इति रूपम् ।

सकारादेशविधायकं विधिसूत्रम्-

अधश्शिरसी पदे ८ । ३ । ४७

**एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे ।**

**शिरस्पदम् । अधस्पदम् । समास इत्येव । अधः पदम् । शिरः पदम् । अनुत्तरपदस्थस्येत्येव । परमशिरःपदम् । कस्कादिषु च । भास्करः ।**

पद-शब्दे परे सति अधस्, शिरस् इत्येतयोः शब्दयोर्विसर्जनीयस्य समासेऽनुत्तरपदस्थस्य सकारादेशो भवति । 'अधस् + पदम्' इत्यत्र सस्य रुत्वे विसर्गे च "कुप्वोः≍क≍पौ च" इति सूत्रं प्रबाध्य अनेन सूत्रेण विसर्गस्य स्थाने सादेशे 'अधस्पदम्' इति रूपम् । एवमेव 'शिरस् + पदम्' इत्यत्र पूर्ववत् 'शिरस्पदम्' इति रूपम् ।

॥ इति विसर्गसन्धिप्रकरणम् ॥

# प्रयोगसिद्धिप्रकारः

## वायुःसरति/वायुस्सरति

'वायुस् + सरति' इति स्थिते "ससजुषो रुः" इति सस्य रुत्वेऽनुबन्धलोपे "खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्गे "विसर्जनीयस्य सः" इति विसर्गस्य सत्वे प्राप्ते तत् प्रबाध्य "वा शरि" इति सूत्रेण विसर्जनीयस्य स्थाने वैकल्पिके विसर्गे 'वायुःसरति' इति, अन्ये पक्षे विसर्गस्य सत्वे 'वायुस्सरति' इति द्वे रूपे सिद्धे ।

## नमस्करोति

'नमस् + करोति' इति स्थिते "ससजुषो रुः" इति सस्य रुत्वे, रेफस्य विसर्गे 'नमः + करोति' इति जाते नमस्-शब्दस्य कृधातोर्योगे "साक्षात्प्रभृतीनि च" इति विकल्पेन गतिसंज्ञायां "कुप्वोः ≍क≍पौ च" इति जिह्वामूलीये प्राप्ते तं प्रबाध्य गतिसंज्ञापक्षे "नमस्पुरसोर्गत्योः" इति सूत्रेण विसर्गस्य सत्वे 'नमस्करोति' इति रूपं सिद्धम् । गतिसंज्ञाभावपक्षे 'नमः + करोति' इति इत्यवस्थायां "कुप्वोः≍क≍पौ च" इति विसर्गस्य वैकल्पिके जिह्वामूलीयादेशे 'नम≍करोति' इति, चकाराद् विसर्गस्य स्थाने विसर्गे च कृते 'नमः करोति' इति रूपत्रयं सिद्ध्यति ।

## शिरस्पदम्

'शिरस् + पदम्' इत्यत्र सकारस्य रुत्वे विसर्गे च कृते 'शिरः + पदम्' इति जाते "कुप्वोः≍क≍पौ च" इति सूत्रं प्रबाध्य "अधश्शिरसी पदे" इति सूत्रेण विसर्गस्य स्थाने सकारादेशे 'शिरस्पदम्' इति रूपं सिद्धम् ।

# अभ्यासः

१. **अधो लिखितानां सूत्राणामर्थं लिखत**

शर्परे विसर्जनीयः, कुप्वो ≍क≍पौ च, सोऽपदादौ, इदुदुपधस्य चाप्रत्ययस्य, द्विस्त्रिश्चतुरिति कृत्वोऽर्थे, नित्यं समासेऽनुत्तरपदस्थस्य

२. **सन्धिं विच्छेदयत**

अधस्पदम्, अयस्कुशा, धनुष्फलम्, तिरःकारः, बहिष्कारः

३. **प्रयोगसिद्धिप्रकारं लिखत**

कःत्सरुः, हरिश्शेते, पयस्पाशम्, कःकरोति, दुष्कृतम्, अयस्कामः

४. **परस्परं मेलयत**

| | |
|---|---|
| वा शरि | अपदाद्योः कुप्वोः परयोर्विसर्गस्य सत्वम् |
| सर्पिष्काम्यति | “इदुदुपधस्य चाप्रत्ययस्य” इति षत्वम् |
| दुष्कृतम् | “इणः षः” इति षत्वम् |
| तिरस्कर्ता | विकल्पेन विसर्गस्य विसर्गः |
| सोऽपदादौ | “तिरसोऽन्यतरस्याम्” सत्वम् |

५. **प्रश्नान् उत्तरयत**

(क) ‘घनाघनः क्षोभणः’ इत्यत्र केन सूत्रेण विसर्गादेशः ?

(ख) ‘हरि स्फुरति’ इत्यत्र विसर्गलोपविधायकं सूत्रं किम् ?

(ग) ‘कः + करोति’ इत्यत्र कस्य सूत्रस्य प्रवृत्तिर्भवति ?

(घ) ‘क ≍फलति’ इत्यत्र उपध्मानीयादेशविधायकं सूत्रं किम् ?

(ङ) ‘धनुष्करोति’ इत्यस्य सन्धिं विच्छेदयत ।

## षोडशः पाठः

# अथ स्वादिसन्धिप्रकरणम्

# रुत्वोत्वादिसन्धिः

**"स्वौजसमौट्-" इति सुप्रत्यये 'शिवस् + अर्च्यः' इति स्थिते ।**

रुत्वविधायकं विधिसूत्रम्-

**ससजुषो रुः ८ । २ । ६६**

**पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् । जश्त्वापवादः ।**

उत्वविधायकं विधिसूत्रम्-

**अतो रोरप्लुतादप्लुते ६ । १ । ११३**

**अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । "भोभगोअघो-" इति प्राप्तस्य यत्वस्यापवादः । उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति, रुत्वमनूद्योत्वविधेः सामर्थ्यात् ।**

अप्लुतादकारादुत्तरस्य रो रेफस्योकारादेशो भवति प्लुतभिन्नेऽकारे परतः । शिव-प्रातिपदिकात् "स्वौजसमौट्-" इत्यादिना सूत्रेण प्रथमैकवचने सु-प्रत्ययेऽनुबन्धलोपे 'शिवस् + अर्च्यः' इति स्थिते "झलां जशोऽन्ते" इति जश्त्वे प्राप्ते तत् प्रबाध्य "ससजुषो रुः" इति सस्य रुत्वेऽनुबन्धलोपे 'शिवर् + अर्च्यः' इति स्थिते रेफस्य "भो-भगो-अघो-अपूर्वस्य योऽशि" इति यत्वे प्राप्ते तत् प्रबाध्य "अतो रोरप्लुतादप्लुते" इति रेफस्योत्वे 'शिव उ + अर्च्यः' इति स्थिते-

पूर्वसवर्णदीर्घैकादेशविधायकं विधिसूत्रम्-

**प्रथमयोः पूर्वसवर्णः ६ । १ । १०२**

**अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ।**

अक्प्रत्याहारात् प्रथमाद्वितीयाविभक्तिसम्बन्धिन्यचि परे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति । अनेन सूत्रेण 'शिव उ' इत्यत्र पूर्वसवर्णदीर्घे प्राप्ते-

पूर्वसवर्णदीर्घनिषेधकं विधिसूत्रम्-

**नादिचि ६ । १ । १०४**

**अवर्णादिचि परे न पूर्वसवर्णदीर्घः । “आद् गुणः” । “एङः पदान्तादति” । शिवोऽर्च्यः ।**

अनेन सूत्रेण पूर्वसवर्णदीर्घनिषेधे ‘शिव उ + अर्च्यः’ इत्यवस्थायाम् “आद् गुणः” इति गुणे ‘शिवो + अर्च्यः’ इति जाते “एङः पदान्तादति” इति पूर्वरूपे खण्डाकारे ‘शिवोऽर्च्यः’ इति ।

**‘अतः’ इति तपरः किम् ? देवा अत्र । अति इति तपरः किम् ? श्व आगन्ता । अप्लुतादिति किम् ? ‘एहि सुश्रोत३ अत्र स्नाहि । प्लुतस्यासिद्धत्वादतः परोऽयम् । ‘अप्लुतात्’ इति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम् । तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्त्या चरितार्थत्वात् । ‘अप्लुते’ इति किम् ? तिष्ठतु पय अ३ग्निदत्त । “गुरोरनृतः–” इति प्लुतः ।**

“अतो रोरप्लुतादप्लुते’ इति सूत्रे ‘अतः’ इति ग्रहणेन अकारोत्तरवर्त्तिरेफस्यैव उत्वं भवति । तेन ‘देवार् + अत्र’ इत्यत्र आकारोत्तरवर्त्तिरेफस्य नोत्वम् । ‘अति’ तपरत्वात् ‘श्वर् + आगन्ता’ इत्यत्र आकारपरत्वाद् रेफस्य नोत्वम् ।

उत्वविधायकं विधिसूत्रम्-

**हशि च ६ । १ । ११**

**अप्लुतादतः परस्य रोरुः स्याद्धशि । शिवो वन्द्यः । रोरित्युकारानुबन्धग्रहणान्नेह । प्रातरत्र । भ्रातर्गच्छ ।**

हश्प्रत्याहारस्थेषु वर्णेषु परेषु सत्सु प्लुतभिन्नाद् ह्रस्वाकारात् परस्य उकारानुबन्धरेफस्य स्थाने उकारादेशो भवति । ‘शिवस् + वन्द्यः’ इति स्थिते सकारस्य “ससजुषो रुः” इति रुत्वेऽनुबन्धलोपे ‘शिवर् + वन्द्यः’ इति जाते “हशि च” इति रेफस्य उत्वे ‘शिव उ + वन्द्यः’ इति जाते, प्राप्तस्य पूर्वसवर्णदीर्घस्य “नादिचि” इत्यनेन निषेधे “आद् गुणः” इति गुणे ‘शिवो वन्द्यः’ इति रूपम् । एवमेव बालो हसति, रामो गच्छति, एको देवः, उन्नतो वृक्षः इत्यादयः प्रयोगा बोध्या । ‘भ्रातर् + गच्छ’ इत्यत्र तु रेफस्य उकारानुबन्धत्वाभावाद् अनेन सूत्रेण नोत्वम्, ‘भ्रातर्गच्छ’ इत्येव रूपं ज्ञेयम् । ‘भ्रातर्’ इत्यत्र रेफो भ्रातृशब्दस्य सम्बोधनैकवचने ऋकारस्य गुणरपरत्वेन जातः । एवं ‘प्रातर् + अत्र’ इत्यत्रापि “अतो रोरप्लुतादप्लुते” इति रेफस्य नोत्वम्, तत्र उकारानुबन्धत्वाभावात् । ‘प्रातर्’ रेफान्तमव्ययम् ।

## प्रयोगसिद्धिप्रकारः

### शिवोऽर्च्यः

‘शिवस् + अर्च्यः’ इति स्थिते जश्त्वं प्रबाध्य “ससजुषो रुः” इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे ‘शिवर् + अर्च्यः’ इति जाते “भो-भगो-अघो-अपूर्वस्य योऽशि” इति सूत्रेण रेफस्य यत्वे प्राप्ते तत् प्रबाध्य “अतो रोरप्लुतादप्लुते” इति सूत्रेण रेफस्य उत्वे ‘शिव उ + अर्च्यः’ इति जाते “प्रथमयोः पूर्वसवर्णः” इति सूत्रेण ‘शिव उ’ इत्यत्र पूर्वसवर्णदीर्घे प्राप्ते “नादिचि” इति तन्निषेधे “आद् गुणः” इति सूत्रेण गुणे ‘शिवो + अर्च्यः’ इति जाते “एङः पदान्तादति” इति सूत्रेण पूर्वरूपे खण्डाकारे ‘शिवोऽर्च्यः’ इति रूपं सिद्धम् ।

### शिवो वन्द्यः

'शिवस् + वन्द्यः' इति स्थिते सकारस्य "ससजुषो रुः" इति रुत्वेऽनुबन्धलोपे 'शिवर् + वन्द्यः' इति जाते "हशि च" इति रेफस्य उत्वे 'शिव उ + वन्द्यः' इति जाते, प्राप्तस्य पूर्वसवर्णदीर्घस्य "नादिचि" इत्यनेन निषेधे "आद् गुणः" इति गुणे, वर्णयोगे 'शिवो वन्द्यः' इति रूपं सिद्धम् ।

## अभ्यासः

### १. सूत्राणामर्थं लिखत

(क) अतो रोरप्लुतादप्लुते (ख) प्रथमयोः पूर्वसवर्णः

(ग) हशि च (घ) नादिचि

(ङ) ससजुषो रुः

### २. सन्धिविच्छेदं कुरुत

लोकस्तिष्ठति, रामोऽत्र, उन्नतो वृक्षः, बालो हसति, एको वासः

### ३. सन्धिं कुरुत

सस् + अयम्, एषस् + अपि, छात्रस् + अगच्छत्, बालकस् + अवदत्, कस् + अत्र

४. शिवोऽर्च्यः, शिवो वन्द्यः इति प्रयोगयोः ससूत्रं सिद्धिपथं दर्शयत ।

### ५. रिक्तस्थानं पूरयत

(क) "हशि च" इति सूत्रम् ......... करोति ।

(ख) "नादिचि" इति ....... निषेधकं सूत्रम् ।

(ग) "प्रथमयोः पूर्वसवर्णः" इत्यनेन ........ विधीयते ।

(घ) 'शिवो वन्द्यः' इत्यत्र ....... इति सूत्रेण रेफस्योत्वम् ।

(ङ) "अतोऽम्" इति सूत्रेऽकारस्य ........ जातमस्ति ।

सप्तदशः पाठः

# यत्वादिसन्धिः

**'देवास् इह' इति स्थिते । रुत्वम् ।**

यकारादेशविधायकं विधिसूत्रम्-

**भो-भगो-अघो-अपूर्वस्य योऽशि ८ । ३ । १७**

**एतत्पूर्वस्य रोर्यादेशः स्यादशि परे । असन्धिः सौत्रः । "लोपश्शाकल्यस्य" । देवा इह, देवायिह । अशि किम् ? देवास्सन्ति । यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथापि विसर्गस्य स्थनिवद्भावेन रुत्वाद्यत्वं स्यात् । नह्ययमल्विधिः । रोरितिसमुदायरूपाश्रयणात् । भोस्, भगोस्, अघोस् इति सकारान्ता निपाताः । तेषां रोर्यत्वे कृते ।**

अश्-प्रत्याहारस्थेषु वर्णेषु परेषु सत्सु भोपूर्वस्य, भगोपूर्वस्य, अघोपूर्वस्य, अवर्णपूर्वस्य चोकारानुबन्धस्य रेफस्य स्थाने यकारादेशो भवति । 'देवास् + इह' इत्यत्र सस्य रुत्वेऽनुबन्धलोपे 'देवार् + इह' इति स्थिते "भो-भगो-अघो-अपूर्वस्य योऽशि" इति सूत्रेण रेफस्य यादेशे 'देवाय् + इह' इति जाते "लोपः शाकल्यस्य" इति सूत्रेण विकल्पेन यकारलोपे 'देवा इह' इति रूपम् । अत्र "पूर्वत्रासिद्धम्" इत्यनेन गुणं प्रति यलोपस्यासिद्धत्वान्न गुणसन्धिः । यलोपाभावपक्षे 'देवायिह' इत्यपि सिद्ध्यति ।

विभाषया वकारयकारादेशविधायकं विधिसूत्रम्-

**व्योर्लघुप्रयत्नतरः शाकटायनस्य ८ । ३ । १८**

**पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे । यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः ।**

यकारस्य लोपादेशविधायकं विधिसूत्रम्-

**ओतो गार्ग्यस्य ८ । ३ । २०**

**ओकारात्परस्य पदान्तस्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् । गार्ग्यग्रहणं पूजार्थम् ।**

**भो अच्युत । लघुप्रयत्नपक्षे भोयच्युत । पदान्तस्य किम् ? तोयम् ।**

'भोस् + अच्युत' इत्यत्र सस्य रुत्वे, रेफस्य "भो-भगो-अघो-अपूर्वस्य योऽशि" इति यादेशे 'भोय् + अच्युत' इति जाते, यकारस्य "व्योर्लघुप्रयत्नतरः शाकटायनस्य" इति वैकल्पिके लघूच्चारणे वर्णसम्मेलने 'भोयच्युत' इति, अलघुप्रयत्नपक्षे "ओतो गार्ग्यस्य" इति नित्यं यकारलोपे 'भो अच्युत' इति द्वे रूपे ।

यवयोर्लोपादेशविधायकं विधिसूत्रम्-

**उञि च पदे ८ । ३ । २१**

**अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे । स उ एकाग्निः । पदे किम् ? तन्त्रयुतम् । वेञः सम्प्रसारणे रूपम् । यदि तु प्रतिपदोक्तो निपात उञिति ग्रहीष्यते, तर्ह्युत्तरार्थं पदग्रहणम् ।**

अवर्णपूर्वयोः पदान्तयोर्यकारवकारयोर्लोपो भवति 'उञि' इति पदे परतः । 'सर् + उ एकाग्निः' इत्यत्र "भो-भगो-" इत्यादिना सूत्रेण यत्वे 'सय् + उ एकाग्निः' इति जाते "उञि च पदे" इति नित्यं यलोपे 'स उ एकाग्निः' इति । 'उतम्' इति 'वेञ् तन्तुसन्ताने' इति धातोः क्तप्रत्ययान्तरूपम् । 'तन्त्रय् + उतम्' इत्यत्र 'उ' पदस्याभावान्न यलोपस्तेन 'तन्त्रयुतम्' इति रूपम् ।

यलोपविधायकं विधिसूत्रम्-

**हलि सर्वेषाम् ८ । ३ । २८**

**भो-भगो-अघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन । भो देवाः । भो लक्ष्मि । भो विद्वद्वृन्द । भगो नमस्ते । अघो याहि । देवा नम्याः । देवा यान्ति । हलि किम् ? देवायिह, देवा इह ।**

'भोस् + देवाः, देवास् नम्याः' इत्यादिषु सकारस्य रुत्वेऽनुबन्धलोपे 'भोर् + देवाः, देवार् + नम्याः' इति जाते "भो-भगो-अघो-अपूर्वस्य योऽशि" इति रेफस्य यत्वे "हलि सर्वेषाम्" इति यकारस्य नित्यं लोपे 'भो देवाः, देवा नम्याः' इत्यादयः प्रयोगाः सिद्ध्यन्ति ।

रेफादेशविधायकं विधिसूत्रम्-

**रोऽसुपि ८ । २ । ६९**

**अह्नो रेफादेशः स्यान्न तु सुपि । रोरपवादः । अहरहः । अहर्गणः । असुपि किम् ? अहोभ्याम् । अत्र 'अहन्' (सू) इति रुत्वम् । एकदेशविकृतस्यानन्यत्वाद् - अहोरात्रः । अहोरथन्तरम् ।**

अहन्-शब्दस्य नकारस्य स्थाने रेफादेशो भवति सुब्भिन्ने परे । विधिरयम् "अहन्" इति रुत्वस्यापवादः ।

'अहन् + अहः' इत्यत्र "अहन्" इति सूत्रेण नकारस्य रुत्वे प्राप्ते तं प्रबाध्य "रोऽसुपि" इति नस्य रेफादेशे 'अहरहः' इति । अत्र उकारानुबन्धरेफाभावाद् उत्वस्याप्राप्तिर्ज्ञेया ।

**"रुपरात्रिरथन्तरेषु रूत्वं वाच्यम्" (वा.) अहो रुपम् । गतमहो रात्रिरेषा ।**

रूप-रात्रि-रथन्तरशब्देषु परेषु अहन्-शब्दस्य नकारस्य रुत्वं भवति, न तु रेफादेशः । 'अहन् + रूपम्' इत्यत्र रेफादेशं बाधित्वा अनेन वार्तिकेन नकारस्य रुत्वेऽनुबन्धलोपे, उकारानुबन्धरेफत्वाद् "हशि च" इति उत्वे, गुणे 'अहो रूपम्' इति । एवम् अहन् + रात्रिः - अहो रात्रिः । 'अहन् + रात्रम्' इत्यत्र 'एकदेशविकृतमनन्यवत्' इति न्यायेन अनेन वार्तिकेन रुत्वे पूर्ववद् 'अहोरात्रम्' इति ।

**"अहरादीनां पत्यादिषु वा रेफः" (वा.) विसर्गापवादः ।**

अहर्पतिः । गीर्पतिः । धूर्पतिः । पक्षे विसर्गोपध्मानीयौ ।

रेफलोफादेशविधायकं विधिसूत्रम्-

**रो रि ८ । ३ । १४**

**रेफस्य रेफे परे लोपः स्यात् ।**

दीर्घादेशविधायकं विधिसूत्रम्-

**ढ्रलोपे पूर्वस्य दीर्घोऽणः ६ । ३ । १११**

**ढरेफौ लोपयतीति तथा, तस्मिन् वर्णेऽर्थाद् ढकारे रेफात्मके परे पूर्वस्याणो दीर्घः स्यात् । पुना रमते ।**

**हरी रम्यः । शम्भू राजते । अणः किम् ? तृढः । वृढः । तृहू हिंसायाम् । वृहू उद्यमने । पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम् । अजर्घा । लीढः ।**

ढलोपनिमित्तके ढकारे परे, रेफलोपनिमित्तके रेफे परे च पूर्वस्य अण्-वर्णस्य दीर्घो भवति । पुनर् + रमते - पुन + रमते (रो रि) - पुना रमते (ढ्रलोपे पूर्वस्य दीर्घोऽणः) । एवं हरिस् + रम्यः - हरिर् + रम्यः (ससजुषो रुः) - हरि + रम्यः (रो रि) - हरी रम्यः (ढ्रलोपे पूर्वस्य दीर्घोऽणः) । एवमेव शम्भुस् + राजते - शम्भुर् + राजते - शम्भु + राजते - शम्भू राजते ।

**'मनस् + रथः' इत्यत्र रूत्वे कृते "हशि च" इत्युत्वे "रो रि" इति रेफलोपे च प्राप्ते ।**

परिभाषासूत्रम्-

**विप्रतिषेधे परं कार्यम् १ । ४ । २**

**तुल्यबलविरोधे सति परं कार्यं स्यात् । इति रेफलोपे च प्राप्ते "पूर्वत्रासिद्धम्" इति "रो रि" इत्यस्यासिद्धत्वादुत्त्वमेव । मनोरथः ।**

लोपादेशविधायकं विधिसूत्रम्-

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६ । १ । १३२**

**अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे । एष विष्णुः, स शम्भुः । अकोः किम् ? एषको रुद्रः, ककारत्वान्न सुलोपः । अनञ्समासे किम् ? असश्शिवः । हलि किम् ? एषोऽत्र ।**

सुलोपादेशविधायकं विधिसूत्रम्-

**सोऽचि लोपे चेत्पादपूरणम् ६ । १ । १३४**

**सस् इत्येतस्य सोर्लोप स्यादचि पादश्चेल्लोपे सत्येव पूर्येत । सेमामविड्ढि प्रभृतिम् । य ईशिषे । 'इह ऋक्पाद एव गृह्यते' इति वामनः । 'अविशेषाच्छ्लोकपादोऽपि' इत्यपरे । सैष दाशरथी रामः । लोपे चेद् इति किम् ? स इत्क्षेति । स एवमुक्त्वा । सत्येव इत्यवधारणं तु "स्यश्छन्दसि बहुलम्" इति पूर्वसूत्राद्बहुलग्रहणानुवृत्त्या लभ्यते । तेनेह न– 'सोऽहमाजन्मशुद्धनाम्' ॥**

॥ इति स्वादिसन्धिप्रकरणम् ॥

## प्रयोगसिद्धिप्रकारः

### देवा इह/देवायिह

'देवास् + इह' इति स्थितौ सस्य "ससजुषो रुः" इति सूत्रेण रुत्वेऽनुबन्धलोपे 'देवार् + इह' इति जाते "भो-भगो-अघो-अपूर्वस्य योऽशि" इति सूत्रेण रोर्यादेशे 'देवाय् + इह' इति जाते "लोपः शाकल्यस्य" इति सूत्रेण विकल्पेन यलोपे 'देवा इह' इति रूपं सिद्धम्। यलोपाभावपक्षे वर्णसम्मेलने 'देवायिह' इति द्वे रूपे सिद्धे। यलोपानन्तरं 'देवा + इह' इत्यवस्थायाम् "आद् गुणः" इति न प्रवर्तते, गुणं प्रति "लोपः शाकल्यस्य" इति सूत्रस्य त्रैपादिकत्वात् "पूर्वत्रासिद्धम्" इत्यनेन यलोपासिद्धेः।

### भो अच्युत/भोयच्युत

'भोस् + अच्युत' इति स्थिते सस्य रुत्वेऽनुबन्धलोपे 'भोर् + अच्युत' इति जाते "भो-भगो-अघो-अपूर्वस्य योऽशि" इति सूत्रेण रोर्यादेशे 'भोय् + अच्युत' इति जाते "व्योर्लघुप्रयत्नतरः शाकटायनस्य" इति पदान्तस्य यकारस्य वैकल्पिके लघुप्रयत्नतरे कृते वर्णयोगे 'भोयच्युत' इति। लघुप्रयत्नतराभावपक्षे "ओतो गार्ग्यस्य" इति सूत्रेण यलोपे 'भो अच्युत' इति रूपम्।

### मनोरथः

'मनस् + रथः' इति स्थिते "ससजुषो रुः" इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे 'मनर् + रथः' इत्यवस्थायां "हशि च" इति सूत्रेण रेफस्य उत्वे प्राप्ते "रो रि" इति सूत्रेण रेफस्य लोपे च प्राप्ते "विप्रतिषेधे परं कार्यम्" इति सूत्रनियमेन परत्वाद् रेफस्य लोपे प्राप्ते "पूर्वत्रासिद्धम्" इति सूत्रेण उत्वं प्रति "रो रि" इत्यस्य परत्रिपादित्वेन असिद्धत्वाद् "हशि च" इत्यनेन रेफस्य उत्वे 'मन उ + रथः' इति जाते "आद् गुणः" इति गुणे, वर्णसम्मेलने 'मनोरथः' इति रूपं साधु।

# अभ्यासः

## १. अर्थं लिखत

(क) रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्  (ख) हलि सर्वेषाम्

(ग) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि  (घ) उञि च पदे

(ङ) सोऽचि लोपे चेत्पादपूरणम्

## २. शुद्धं श्रावयत

(क) भो-भगो-अघो-अपूर्वस्य योऽशि  (ख) व्योर्लघुप्रयत्नतरः शाकटायनस्य

(ग) सोऽचि लोपे चेत्पादपूरणम्  (घ) ओतो गार्ग्यस्य ।

(ङ) विप्रतिषेधे परं कार्यम् ।

## ३. प्रयोगसिद्धिप्रकारं लिखत

देवा इह/देवायिह, भो अच्युत/भोयच्युत, देवा यान्ति, भो देवाः, अहरहः, अहो रूपम्, स उ एकाग्निः, मनोरथः, सैष दाशरथी रामः, एष विष्णुः

## ४. अधस्तनानां प्रश्नानामुत्तराणि लिखत

(क) 'देवा इह' इत्यत्र 'आद् गुणः' इति कथं न प्रवर्तते ?

(ख) 'अहन् + अहः' इत्यत्र केन नस्य रेफादेशो भवति ? कथञ्च तत्र रुत्वं न भवति ?

(ग) रूपरात्रिरथन्तरेषु परेषु केन 'अहन्' इत्यस्य नस्य रुत्वं भवति ?

(घ) 'सर् उ एकाग्निः' इत्यत्र केन सूत्रेण रेफस्य लोपः क्रियते ?

(ङ) 'पुना रमते' इत्यत्र दीर्घसम्पादकं सूत्रं किम् ?

## ५. सूत्राणि वृत्या सह परस्परं मेलयत

| | |
|---|---|
| रो रि | तुल्यबलविरोधे सति परं कार्यं स्यात् । |
| विप्रतिषेधे परं कार्यम् | सस् इत्येतस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत । |
| सोऽचि लोपे चेत् पादपूरणम् | ओकारात्परस्य पदान्तस्यालघूच्चराणप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् । |
| ओतो गार्ग्यस्य | रेफस्य रेफे परे लोपः स्यात् । |

# अजन्तपुँल्लिङ्गप्रकरणम्

## प्रातिपदिकसंज्ञा

अपदं न प्रयुञ्जीत इति प्रामाणिकानां विदुषां वचनात् संस्कृते पदत्वमापन्नाः शब्दा एव प्रयुज्यन्ते इति विज्ञायते । सुप्तिङन्तं पदम् इति निर्देशेन पदानि द्विविधानि सन्ति, सुबन्तानि तिङन्तानि च । तेषु सुप्तिङन्तेषु तिङन्तानि पदानि क्रियावाचीनि भवन्ति, तेषां विस्तरेण निरूपणं तिङन्तप्रकारेण विधास्यते । क्रियावचनातिरिक्तानि संज्ञासर्वनामविशेषणादीनां वाचकानि पदानि सुबन्ते जायन्ते । तेषां निरूपणाय प्रकरणमिदमारभ्यते । सुबन्तत्व-सम्पादकाः सु-औ-जसादयः सुप्प्रत्ययाः प्रातिपदिकाज्जायन्ते । तेन प्रथमं शब्दानां प्रातिपदिकसंज्ञाविधानमावश्यकं भवति । प्रातिपदिकसंज्ञा च व्युत्पन्नाव्युत्पन्नयोः शब्दयोः पृथक्-पृथक् सूत्रेण विधीयते ।

शब्दा व्युत्पन्ना अव्युत्पन्नाश्च भवन्ति । यत्र प्रकृतिप्रत्ययार्थयोः स्पष्टतया प्रतिपत्तिर्भवति स व्युत्पन्नशब्दः । यथा- पाचकः, कर्ता गत्वा इत्यादि । यत्र प्रकृतिप्रत्ययार्थयोरन्वेषणं विनैव कस्यचिन्नामरूपेण शब्दः स्वीक्रियते तथा सोऽव्युत्पन्नः, तत्रैव अर्थानुरूपं प्रकृतिप्रत्यययोरन्वेषणं क्रियते तर्हि सोऽपि व्युत्पन्नः । यथा- यदा रामशब्दः कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुज्यते तदा सोऽव्युत्पन्नः, यदा तु रमन्ते योगिनोऽस्मिन्निति विग्रहे रम्धातोर्घञि कृते निष्पन्नस्य भगवतो रामस्य वाचकस्य रामशब्दस्य ग्रहणं भवति तदा स व्युत्पन्नो भवति ।

तत्र प्रथममव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधायकं सूत्रमाह-

**अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १ । २ । ४५**

**धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।**

अर्थोऽस्यास्तीत्यर्थवत् अध्याहृतशब्दस्वरूपविशेष्यानुरोधेन नपुंसकत्वम् । तन्त्रादीन् आश्रित्य अप्रत्यय इत्यस्य प्रत्ययभिन्नं प्रत्ययान्तभिन्नञ्चार्थः । अव्युत्पत्तिपक्षे 'घटः, पटः' इत्यादिशब्दाः प्रकृतसूत्रस्योदाहरणानि सन्ति । व्युत्पत्तिपक्षे तु बहुपटवः इत्यादीनि उदाहरणानि ज्ञेयानि । अर्थवदिति किम् ? धनं वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत् । सत्याञ्च संज्ञायां प्रतिवर्णं पदत्वाद् नलोपादि स्यात् । अधातुः इति किम् ? अहन् इत्यादौ नलोपादिर्मा भूत् । प्रत्ययभिन्नमिति किम् ? हरिषु, करोषि इत्यादौ सुप्सिपोः प्रातिपदिकसंज्ञा मा भूत् । अप्रत्ययान्तः इति किम् ? हरिषु, करोषि इति प्रत्ययान्तस्य संज्ञा मा भूत् । सत्याञ्च संज्ञायां "सात्पदाद्योः" इति षत्वनिषेधः स्यात् ।

प्रातिपदिकसंज्ञाविधायकं सूत्रम्-

**कृत्तद्धितसमासाश्च १ । २ । ४६**

**कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः । पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम् । यत्र संघाते पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैव । तेन वाक्यस्य न ।**

कृत्प्रत्ययान्तास्तद्धितप्रत्ययान्ताः समाससंज्ञकाश्च शब्दाः प्रातिपदिकसंज्ञां लभन्ते। यथा- दृश् + अनीयर् (कृत्) = दर्शनीयः। दशरथ + इञ् (तद्धितः) = दाशरथिः, पूर्व + भूतः (समासः) = भूतपूर्वः। अत्र कृत्तद्धितान्तयोः प्रत्ययान्ततया पूर्वसूत्रेणाप्राप्ते प्रातिपदिकसंज्ञावचनं सार्थकमस्ति तथापि समासस्य धातु-प्रत्यय-प्रत्ययान्तत्वभिन्नतया पूर्वसूत्रेणैव प्रातिपदिकत्वे सिद्धे समासग्रहणं व्यर्थमिति जिज्ञासायामाह- यत्र संघाते (शब्दसमूहे) पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैव इति ज्ञापनार्थं समासग्रहणमस्ति, तेन शब्दसमूहरूपस्य वाक्यस्यार्थवत्वेऽपि प्रातिपदिकसंज्ञा न भवति।

अधिकारसूत्रम्-

**प्रत्ययः** १। १। १

**आपञ्चमपरिसमाप्तेरधिकारोऽयम्।**

तृतीयाध्यायस्य प्रथमसूत्रादारभ्य पञ्चमाध्यायस्यान्तिमसूत्रं यावत् प्रत्यया विधीयन्ते। तेषां प्रत्ययनाम्ना व्यवहारो भवतीत्यर्थः।

अधिकारसूत्रम्-

**परश्च** ३। १। २

**अयमपि तथा।**

प्रत्ययः प्रकृतेः परो भवति।

अधिकारसूत्रम्-

**ङ्याप्प्रातिपदिकात्** ४। १। १

**ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारः।**

**"प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्"** (प.) **इत्यनेनैव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्याद् ङ्याब्भ्यां प्राङ् मा भूदित्येवमर्थम्।**

अत्र यथा श्वशुरस्य स्त्री इत्यर्थे ऊङ्प्रत्यये उकाराकारयोर्लोपेन निष्पन्नस्य श्वश्रूशब्दस्य प्रत्ययान्ततया अर्थवत्सूत्रेण कृत्तद्धितप्रत्ययभिन्नतया कृत्तद्धितेति सूत्रेण च प्रातिपदिकसंज्ञाऽभावेऽपि स्वादिविध्यर्थं 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया स्त्रीप्रत्ययात्पूर्वं जाताया प्रातिपदिकसंज्ञाया आश्रयणेन स्वादयो विधीयन्ते तथैव ङ्यन्ताबन्तेष्वपि तयैव परिभाषया प्रातिपदिकत्वमाश्रित्य स्वादयः सिद्ध्यन्तीति ङ्याब्ग्रहणं व्यर्थमिति जिज्ञासायामाह- उक्तयुक्त्या स्वादीनां सिद्धावपि यत्र प्रातिपदिकात् तद्धितप्रत्ययाः स्त्रीप्रत्ययौ (ङ्यापौ) च सहैव प्राप्नुवन्ति तत्र ङ्याबन्तादेव तद्धितप्रत्ययाः स्युरित्येतदर्थं "ङ्याप्प्रातिपदिकात्" इति सूत्रे ङ्यापोर्ग्रहणं बोध्यम्। तेन लोहनिका आर्यका च सिध्यति। तथा हि- "वर्णादनुदात्तात्तोपधात्तो नः" इति सूत्रेण मणौ विद्यमानाल्लोहितशब्दात्स्त्रीत्वविवक्षायां ङीप्, तत्संनियोगेन तकारस्य नकारादेशश्च प्राप्तः। "लोहितान्मणौ" इति स्वार्थिकः कनपि प्राप्तः। तत्र स्वार्थिकत्वादन्तरङ्गः परश्च कन् नत्वसंनियोगशिष्टं ङीपं बाधित्वा प्रवर्तेत।

ततश्च ङीपो न प्रसक्तिः, कोपधत्वेन तोपधत्वाऽभावात् । ततश्च लोहितकशब्दात् "अजाद्यतष्टाप्" इति टापि "प्रत्ययस्थात्-" इत्यादिना सूत्रेण इत्वे लोहितिकेत्येव स्यात्, न तु लोहिनिकेति । इष्यते तु रूपद्वयमपि । ङ्याप्प्रातिपदिकादित्यत्र ङीब्ग्रहणे तु तत्सामर्थ्यादन्तरङ्गं परमपि कनं बाधित्वा नत्वसंनियोगशिष्टे ङीपि कृते, लोहिनीशब्दात्कनि, "केऽण" इति ह्रस्वे, लोहिनिकेति रूपम् । वर्णादनुदात्तादित्यस्य वैकल्पिकतया नत्वसंनियोगशिष्टङीबभावे तु लोहिताशब्दात्कनि, ह्रस्वे, पुनः कान्ताट्टापि, प्रत्ययस्थादितीत्वे लोहितिकेत्यपि सिध्यति । तथा आर्यशब्दात्स्वार्थिके कनि, समुदायोत्तरटापैव स्त्रीत्वबोधनसम्भवादेकाज्द्विर्वचनन्यायेन कनन्तादेव टापि, कनः पूर्वं टाबभावात्, आत्स्थानिकस्य अतोऽभावाद् "उदीचामातः स्थाने-" इति इत्वविकल्पस्याऽप्रवृत्तौ, "प्रत्ययस्थादि"ति नित्यमित्वे आर्यिकेत्येव स्यात्, आर्यकेति न स्यात् । इष्यते तूभयमपि । ङ्याप्प्रातिपदिकादित्यत्र आब्ग्रहणे तु तत्सामर्थ्यात्स्वार्थिकं कनं बाधित्वा टापि, ततः कनि, "केऽण" इति ह्रस्वे, पुनः कन्नन्ताट्टापि "उदीचामातः स्थाने-" इतीत्वविकल्पे रूपद्वयं सिध्यति ।

स्वादिप्रत्ययविधायकं विधिसूत्रम्-

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** ४ । १ । २

**ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः । सुङस्योरुकारेकारौ जशटङपाश्चेतः ।**

सु इत्यत्रोकारस्य ङसि इत्यत्र इकारङकारयोः, अन्यासु च जकार-शकार-टकार-ङकार-पकाराणाञ्च यथास्थानमित्संज्ञा भवतीत्यर्थः ।

विभक्तिसंज्ञाविधायकं सूत्रम्-

**विभक्तिश्च** १ । ४ । १०४

**सुप्तिङौ विभक्तिसंज्ञौ स्तः । तत्र 'सु' 'औ' 'जस्' इत्यादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञा । ताभिरिहापि व्यवहारः ।**

स्वादय एकविंशतिः प्रत्ययाः तिबादयोऽष्टादश प्रत्ययाश्च विभक्तिसंज्ञका भवन्तीति सूत्रार्थः । तत्र केषां प्रत्ययानां का विभक्तिरिति पाठान्ते द्रष्टव्यम् ।

एकवचन-द्विवचन-बहुवचनसंज्ञाविधायकं सूत्रम्-

**सुपः** ३ । ४ । १०३

**सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ।**

'सु, औ, जस्' इत्यादित्रिकाणां क्रमश एकवचनादिसंज्ञा भवन्ति । यथा सु = एकवचनम्, औ = द्विवचनम्, जस् = बहुवचनम् ।

द्विवचनैकवचप्रत्ययविधायकं विधिसूत्रम्-

**द्व्येकयोर्द्विवचनैकवचने १ । ४ । २२**

**द्वित्वैकत्वयोरेते स्तः ।**

प्रातिपदिकार्थगतैकत्वद्वित्वसंख्ययोर्विवक्षायां क्रमश एकवचन-द्विवचनसंज्ञका विभक्तयो भवन्तीति सूत्रार्थः । प्रातिपदिकार्थगतैकत्वविवक्षायामेकवचनम्, प्रातिपदिकार्थगतद्वित्वविवक्षायाञ्च द्विवचनं भवतः ।

बहुवचनप्रत्ययविधायकं विधिसूत्रम्-

**बहुषु बहुवचनम् १ । ४ । २१**

**बहुत्वे एतत्स्यात् ।**

द्व्यधिके बहुत्वे विवक्षिते बहुवचनसंज्ञका विभक्तयो जायन्ते । तत्र एकत्वद्वित्वबहुत्वविवक्षाया अभावे यदा कस्यापि सङ्ख्यायाः प्रतीतिर्न भवति तत्र त्वौत्सर्गिकमेकवचनं बोध्यम् ।

उपर्युक्तैः पञ्चभिः सूत्रैः व्यवस्थापितानां विभक्तीनां निदर्शनम्-

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सु (स्) | औ | जस् (अस्) |
| द्वितीया | अम् | औट् (औ) | शस् (अस्) |
| तृतीया | टा (आ) | भ्याम् | भिस् |
| चतुर्थी | ङे (ए) | भ्याम् | भ्यस् |
| पञ्चमी | ङसि (अस्) | भ्याम् | भ्यस् |
| षष्ठी | ङस् (अस्) | ओस् | आम् |
| सप्तमी | ङि (इ) | ओस् | सुप् (सु) |

राम-शब्दस्य व्युत्पत्तिपक्षे कृदन्तत्वेन प्रातिपदिकसंज्ञायां सु-विभक्तौ उकारस्यानुबन्धलोपे 'रामस्' इति जाते, पदसंज्ञायाम्, अवसाने स्थितस्य सकारस्य रुत्वे विसर्गे च 'रामः' इति रूपम् ।

## प्रयोगसिद्धिप्रकारः

### रामः

राम-शब्दस्य व्युत्पत्तिपक्षे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इत्यादिना सूत्रेण प्रथमाया एकवचने सु-विभक्तौ 'राम+सु' इति जाते "उपदेशेऽजनुनासिक इत्" इत्यनेन उकारस्येत्संज्ञायां "तस्य लोपः" इति सूत्रेण लोपे 'रामस्' इति जाते सुबन्तत्वात् "सुप्तिङन्तं पदम्" इति सूत्रेण पदसंज्ञायां सकारस्य "ससजुषो रुः" इत्यनेन रुत्वेऽनुबन्धलोपे 'रामर्' इति जाते "विरामोऽवसानम्" इति सूत्रेण अवसानसंज्ञायां "खरवसानयोर्विसर्जनीयः" इत्यनेन रेफस्य विसर्गे 'रामः' इति रूपं सिद्धम् ।

# अभ्यासः

१. **अधस्तनानि सूत्राणि कण्ठस्थानि श्रावयत**

(क) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्
(ख) कृत्तद्धितसामासाश्च
(ग) ङ्याप्प्रातिपदिकात्
(घ) द्व्येकयोर्द्विवचनैकवचने
(ङ) बहुषु बहुवचनम् ।

२. **एकविंशतिसुप्-प्रत्ययान् तदनुबन्धविनिर्मुक्तस्वरूपाणि च विभक्ति-वचननिदर्शनपूर्वकं सारिण्यां प्रदर्शयत ।**

३. **प्रश्नानामुत्तराणि लिखत**

(क) "कृत्तद्धितसमासाश्च" इत्यत्र समासग्रहणं किमर्थम् ?
(ख) सुप् इत्यनेन केषां बोधो भवति ?
(ग) स्वादयः प्रत्ययाः केभ्यः परे भवन्ति ?
(घ) स्वादीनामेकवचन-द्विवचन-बहुवचनसंज्ञा केन सूत्रेण विधीयते ?
(ङ) प्रातिपदिकार्थस्य बहुत्वे का विभक्तयो भवन्ति ?

४. **परस्परं मेलयत**

| | |
|---|---|
| व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा | विभक्तिश्च |
| अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा | प्रत्ययः |
| विभक्तिसंज्ञा | कृत्तद्धितसमासाश्च |
| बहुवचनविधानम् | अर्थवदधातुरप्रत्ययः प्रातिपदिकम् |
| प्रत्ययाधिकारसूत्रम् | बहुषु बहुवचनम् |

५. **व्युत्पनाव्युत्पन्नशब्दयोः परिचयं दत्त ।**

# अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया- १

अथ 'प्रत्यर्थं शब्दाभिनिवेशः', 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इत्याद्यनुसारेण प्रातिपदिकार्थगतद्वित्वादिविवक्षायां द्वयोः द्व्यधिकानां वा प्रातिपदिकानां प्रयोगे प्राप्ते सूत्रमिदमारभ्यते-

एकशेषविधायकं विधिसूत्रम्-

**सरूपाणामेकशेष एकविभक्तौ** १। २। ६४

**एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते।**

एकविभक्ताविति सरूपाणामित्यत्रान्वेति। समानं रूपं येषां तानि सरूपाणि। वृद्धो यूनेति सूत्राद् एवेत्यपकृष्यते। शिष्यते इति शेषः। एकश्चासौ शेषश्चेति एकशेषः। एकस्यां विभक्तौ परतः सरूपाणामेव दृष्टानां प्रातिपदिकानां मध्ये एकमेव शिष्यते, अन्ये लुप्यन्त इति सूत्रार्थः। एवेति किम् ? मातृ-शब्दस्तावज्जननीवाची परिच्छेतृवाची च। तत्र मातृभ्यामिति भ्यामादौ क्वचित्सारूप्ये सत्यपि, औजसादिषु मातरौ, मातारौ इति वैरूप्यदर्शनान्नैकशेषः। यद्यपि कतिपयविभक्तौ उक्तयोर्मातृशब्दयोः सारूप्येणैव दर्शनमस्ति। तथापि एकस्यामपि विभक्तौ परतो विरूपाणि न दृष्टानीत्यर्थो विवक्षितः। एतद्द्योतनायैव एकविभक्तावित्यत्र एकग्रहणम्। एकशेष इत्यत्र एकपदोपादानं तु द्विबहूनामपि शेषो मा भूदित्येतदर्थम्। शेषपदानुपादाने तु सरूपाणां स्थाने एक आदेशः स्यात्। एकविभक्ताविति सारूप्ये उपलक्षणम्। न तु एकविभक्तौ परत एकशेषो भवतीति व्याख्यानमुचितम्, जननीपरिच्छेतृवाचिनोरेकशेषापत्तेः।

द्वित्वसङ्ख्याया विवक्षायां राम-शब्दात् प्रथमाया द्विवचने औ-विभक्तौ 'राम राम + औ' इत्यवस्थायाम् अनेन सूत्रेण एकशेषे 'राम + औ' इति जाते गुणवृद्धी बाधित्वा "प्रथमयोः पूर्वसवर्णः" इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते "नादिचि" इत्यनेन तन्निषेधे, पुनः "वृद्धिरेचि" इत्यनेन वृद्धौ "रामौ" इति सिद्ध्यति। रामशब्दस्य प्रातिपदिकसंज्ञानन्तरं जस्विभक्तौ-

इत्संज्ञाविधायकं सूत्रम्-

**चुटू** १। ३। ७

**प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्येत्संज्ञायाम्।**

प्रत्ययस्य आदौ स्थितानां चवर्ग-टवर्गस्थानां वर्णानामित्संज्ञा भवति। अनेन सूत्रेण जसो जकारस्य इत्संज्ञायां लोपे 'राम + अस्' इति स्थितौ प्रत्ययान्त्यस्य सकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां प्राप्तायाम्-

इत्संज्ञानिषेधकं सूत्रम्-

**न विभक्तौ तुस्माः १ । ३ । ४**

**विभक्तिस्थाः तवर्गसकारमकारा इतो न स्युः । इति सकारस्य नेत्वम् ।**

विभक्तिस्थानां तवर्गसकारमकाराणामित्संज्ञा न भवतीति सूत्रार्थः । 'राम + अस्' इत्यवस्थायां सवर्णदीर्घे प्राप्ते-

पररूपैकादेशविधायकं सूत्रम्-

**अतो गुणे ६ । १ । ९७**

**अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात् । इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घः । "पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्"** (प.) **इति न्यायेन "अतो गुणे" इति हि "अकः सवर्णे दीर्घः" इत्यस्यैवापवादो न तु "प्रथमयोः पूर्वसवर्णः" इत्यस्यापि । रामाः ।**

'राम + अस्' इत्यत्र "अकः सवर्णे दीर्घः" इत्यनेन प्राप्तं दीर्घं बाधित्वा "अतो गुणे" इति पररूपं प्राप्नोति एतदपि बाधित्वा "प्रथमयोः पूर्वसवर्णः" इत्यनेनात्र पूर्वसवर्णदीर्घो भवति । "अतो गुणे", "अकः सवर्णे दीर्घः", "प्रथमयोः पूर्वसवर्णः" इत्येतेषां सूत्राणां पाठक्रमः । तेन पूर्वपठितमपवादसूत्रम् "अतो गुणे" इति अनन्तरस्य "अकः सवर्णे दीर्घः" इत्यस्य बाधको भवति, न तु उत्तरस्य "प्रथमयोः पूर्वसवर्णः" इत्यस्यापि इत्यभिप्रायः ।

'राम + अस्' इत्यवस्थायामनेन सूत्रेण प्राप्तं पररूपं बाधित्वा पूर्वसवर्णदीर्घे 'रामास्' इति जाते, पदत्वे, सकारस्य रुत्वे, विसर्गे च 'रामाः' इति ।

सम्बुद्धिसंज्ञाविधायकं सूत्रम्-

**एकवचनं सम्बुद्धिः २ । ३ । ४९**

**सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ।**

सम्बोधनेऽर्थे विहितायाः प्रथमाविभक्तेरेकवचनं सम्बुद्धिसंज्ञकं भवतीति सूत्रार्थः ।

लोपादेशविधायकं विधिसूत्रम्-

**एङ्ह्रस्वात्सम्बुद्धेः ६ । १ । ६९**

**एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह लोपः-** हे **कतरत् कुलेति ।** हे **राम** ! हे **रामौ** ! हे **रामाः** ! **एङ्ग्रहणं किम्** ? हे **हरे** ! हे **विष्णो** ! **अत्र** हि **परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति ।**

एङ्ह्रस्वादित्यङ्गविशेषणं, तदन्तविधिः । सुतिस्यपृक्तं हलित्यतो हलिति प्रथमान्तमनुवर्तते, तच्चाङ्गादित्यत्रान्वेति- अङ्गात् परं हलिति । "लोपो व्योर्वलि" इत्यतो लोप इत्यनुवर्तते । तच्च हलित्यनेन सामानाधिकरण्येनान्वेति । लुप्यते इति लोपः । कर्मणि घञ् । सम्बुद्धेरित्यवयवषष्ठी हलित्यत्रान्वेति । ततश्च एङन्ताद्ध्रस्वान्ताच्चाङ्गात्परः सम्बुद्ध्यवयवभूतो हल् लुप्यते इति सूत्रार्थः । अङ्गस्य इत्यधिकाराभावेऽपि सम्बुद्ध्याङ्गस्याक्षेपो भवति तच्च

एङ्ह्रस्वाभ्यां विशेषितं भवति । तेन हे कतरत् ! इत्यत्र यदि एङ्ह्रस्वादित्यत्राङ्गस्य विशेष्यत्वं न स्यात्, तदा कतरदित्यत्र तकारस्य हलो ह्रस्वादकारात् परत्वात्सम्बुद्ध्यवयवत्वाच्च लोपः प्रसज्येत । अङ्गस्य विशेष्यत्वे तु न दोषः । अत्र हि टिलोपानन्तरं 'कतर्' इति रेफान्तमङ्गम् । तत्तु न ह्रस्वान्तम् । यत्तु ह्रस्वान्तं तन्नाङ्गम् । रेफादकारस्य सुस्थानिकाद्डादेशावयवत्वेन प्रत्ययावयवतया प्रकृतिभागानन्तर्भावात् । राम-शब्दस्य ह्रस्वान्ततया ह्रस्वादित्यनेनैव सिद्धे एङ्ग्रहणं 'हे हरे !। हे विष्णो !' इत्यादौ हल्लोपार्थम् । अत्र हि परत्वान्नित्यत्वाच्च पूर्वं सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति ।

राम-शब्दात् सम्बोधनेऽर्थे प्रथमाया एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'राम + स्' इत्यवस्थायां पूर्वसूत्रेण सकारस्य सम्बुद्धिसंज्ञायामनेन सूत्रेण सलोपे 'हे' इति सम्बोधनसूचकशब्दस्य पूर्वप्रयोगे 'हे राम' इति ।

पूर्वरूपैकादेशविधायकं सूत्रम्-

**अमि पूर्वः ६ । १ । १०७**

**अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात् ।**

अक्-प्रत्याहारस्थवर्णेभ्योऽम्सम्बन्धिनि अचि परे पूर्वरूपमेकादेशो भवतीति सूत्रार्थः । राम-शब्दाद् द्वितीयैकवचने अम्-विभक्तौ 'राम + अम्' इत्यवस्थायां पूर्वसवर्णदीर्घं बाधित्वा अनेन पूर्वरूपे- रामम् । एवं द्वितीयाया द्विवचने औटि प्रथमाद्विवचनवत्- रामौ । बहुवचने शसि-

इत्संज्ञाविधायकं सूत्रम्-

**लशक्वतद्धिते: १ । ३ । ८**

**तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः । इति शसः शस्येत्संज्ञा ।**

तद्धितभिन्नप्रत्ययानामादौ स्थितानां लकार-शकार-कवर्गाणामित्संज्ञा भवति ।

नकारादेशविधायकं सूत्रम्-

**तस्माच्छसो नः पुंसि ६ । १ । १०३**

**कृतपूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात् पुंसि ।**

अत्र सूत्रे 'तस्मात्' इत्यनेन "प्रथमयोः पूर्वसवर्णः" इति पूर्वसूत्रकृतः संनिहितः पूर्वसवर्णदीर्घः परामृश्यते । दिक्शब्दयोगे पञ्चम्येषा । शस इत्यवयवषष्ठी । स चावयवः परत्वेन विशेष्यते । स चावयवोऽर्थात् सकार एव, अन्यस्याऽसम्भवात् । पूर्वसवर्णदीर्घादव्यवहितोत्तरो यः शसोऽवयवः सकारः, तस्य स्थाने नकारादेशो भवति, पुँलिङ्गे इति सूत्रार्थः ।

णत्वविधायकं सूत्रम्-

**अट्कुप्वाङ्नुम्व्यवायेऽपि ८ । ४ । २**

**अट्, कवर्गः, पवर्गः, आङ्, नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे । "पदव्यवायेऽपि" इति निषेधं बाधितुमाङ्ग्रहणम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । तच्चाकर्तुं शक्यम्, अयोगवाहानामट्सूपदेशस्योक्तत्वात् । इति णत्वे प्राप्ते–**

रेफात् षकाराच्च परस्य समानपदे स्थितस्य नकारस्य णकारादेशो भवति, अट्प्रत्यहारस्थवर्णानाम्, कवर्गीयवर्णानाम्, पवर्गीयवर्णानाम्, आङ् इत्युपसर्गस्य, अनुस्वारस्य च पृथक् पृथक्, यथासम्भवं मिलितैर्वा व्यवधाने सत्यपीति सूत्रार्थः । "रषाभ्यां नो णः समानपदे ८।४।१" इति सूत्रेण रेफषकाराभ्यां परस्याव्यवहितस्य नकारस्य णकारादेशो विधीयते । वर्तमानसूत्रेण अयं णकारादेशः अट्-कवर्ग-पवर्ग-आङ्-नुमां व्यवधानेऽपि भवति । समानपदत्वं नाम निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वम् ।

णत्वादेशनिषेधकं सूत्रम्-

**पदान्तस्य ८ । ४ । ३७**

**पदान्तस्य नस्य णत्वं न स्यात् ।**

बहुवचने शसि- राम + शस् - राम + अस् - रामास् (प्रथमयोः पूर्वसवर्णः) - रामान् (तस्माच्छसो नः पुंसि) इत्यवस्थायां पूर्वसूत्रेण नकारस्य णत्वे प्राप्ते, अनेन तन्निषेधे- रामान् ।

## प्रयोगसिद्धिप्रकारः

### रामौ

रामशब्दस्य व्युत्पत्तिपक्षे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'राम + औ' इत्यवस्थायां गुणवृद्धी बाधित्वा "प्रथमयोः पूर्वसवर्णः" इत्यनेन पूर्णसवर्णदीर्घे प्राप्ते "नादिचि" इत्यनेन तन्निषेधे पुनः "वृद्धिरेचि" इति सूत्रेण वृद्धिरेकादेशे 'रामौ' इति रूपं सिद्धम् ।

### रामान्

रामशब्दस्य व्युत्पत्तिपक्षे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-' इति सूत्रेण द्वितीयाया बहुवचने शस्-प्रत्यये 'राम + शस्' इत्यवस्थायां "विभक्तिश्च" इत्यनेन शसो विभक्तिसंज्ञायां "लशक्वतद्धिते" इत्यनेन शकारस्येत्संज्ञायां तस्य लोपे 'राम + अस्' इति जाते "हलन्त्यम्" इत्यनेन सकारस्येत्संज्ञायां प्राप्तायां "न विभक्तौ तुस्माः" इत्यनेन तन्निषेधे "प्रथमयोः पूर्वसवर्णः" इत्यनेन पूर्वसवर्णदीर्घे 'रामास्' इति जाते "तस्माच्छसो नः पुंसि" इति सूत्रेण सकारस्य नकारादेशे 'रामान्' इति स्थिते "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण नकारस्य णत्वे प्राप्ते "पदान्तस्य" इत्यनेन तन्निषेधे 'रामान्' इति रूपं सिद्धम् ।

# अभ्यासः

१. **अधस्तनसूत्राणामर्थं लिखत**

(क) सरूपाणामेकशेष एकविभक्तौ

(ख) न विभक्तौ तुस्माः

(ग) एङ्ह्रस्वात्सम्बुद्धेः

(घ) लशक्वतद्धिते

(ङ) अट्कुप्वाङ्नुम्व्यवायेऽपि

२. **निम्नप्रश्नानामुत्तराणि लिखत**

(क) 'रामान्' इत्यत्र पूर्वसवर्णदीर्घः केन सूत्रेण भवति ?

(ख) जस्-विभक्तौ सकारस्येत्संज्ञा केन सूत्रेण प्राप्ता ?

(ग) 'हे राम' इत्यत्र का विभक्तिर्विधीयते ? सकारस्य लोपश्च केन सूत्रेण भवति ?

(घ) 'एङ्ह्रस्वात्सम्बुद्धेः' इत्यत्र एङ्ग्रहरणस्य प्रयोजनं सोदाहरणं लिखत ।

(ङ) सम्बोधने का विभक्तिर्विधीयते ?

३. **परस्परं मेलयत**

| | |
|---|---|
| पररूपमेकादेशः | प फ ब भ म |
| पूर्वरूपमेकादेशः | एववचनं सम्बुद्धिः |
| कवर्गः | चुटू |
| पवर्गः | अतो गुणे |
| सम्बुद्धिसंज्ञा | अमि पूर्वः |
| चवर्गटवर्गयोरित्संज्ञा | क ख ग घ ङ |

४. **'पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्' इत्यस्याशयं सोदाहरणं लिखत ।**

५. **ससूत्रं रूपसिद्धिप्रकारं प्रदर्शयत**

हे राम !, रामाः, रामम् ।

विंशः पाठः

# अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया– २

अङ्गसंज्ञाविधायकं सूत्रम्-

**यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १ । २ । १३**

**यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात् । विधिः इति किम् ? स्त्री इयती । प्रत्यये किम् ? प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत् ।**

यस्मात् प्रत्ययो विधीयते (धातोर्वा प्रातिपदिकाद्वा) तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परतः सति अङ्गसंज्ञं भवति । अत्र तदादिपदेन प्रत्यये परे तदादिभूतं प्रकृतिविशिष्टं सर्वमपि शब्दस्वरूपं गृह्यते, तेन 'भवामि, भविष्यामि' इत्यादौ विकरणविशिष्टस्याङ्गसज्ञार्थं तदादिग्रहणं सार्थकमस्ति । अत्र सत्यां ह्यङ्गसंज्ञायां 'भव + मि, भविष्य + मि' इत्यवस्थायां यञादौ प्रत्यये परे अकारान्तस्याङ्गस्य "अतो दीर्घो यञि" इत्यनेन दीर्घः सिद्धयति ।

सूत्रे यस्माद् यः प्रत्ययः परत्वेन श्रूयते तदादिशब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञमित्येतावतैव सिद्धे विधिग्रहणं किमर्थमिति जिज्ञासायामाह- 'स्त्री इयती' इति । इदं परिमाणमित्यर्थे इदम्-शब्दात् "किमिदंभ्यां वो घः" इति वतुप्प्रत्यये, वस्य घादेशे च कृते घस्य इयादेशः । "इदंकिमोरीश्की" इति इदम ईशादेशः । 'ई + इयत्' इति स्थिते 'यस्येति च' इतीकारलोपे 'इयत्' इति प्रत्ययमात्रमवशिष्यते । स्त्रीत्वविवक्षायां "उगितश्च" इति ङीपि इयतीति रूपम् । अत्र विधिग्रहणाभावे 'स्त्री इयती' इत्यत्र "स्त्रियाः" इत्यनेनाङ्गसंज्ञानिमित्तमियङ् स्यात् । कृते तु विधिग्रहणे इयङ् अत्र न भवति वतुप इदम एवात्र विहितत्वेन तस्मिन् परे स्त्रीशब्दस्याङ्गत्वाभावात् ।

सूत्रेऽस्मिन् 'प्रत्यये' इति किमिति जिज्ञासायां प्रत्ययविशिष्टस्य ततोप्यधिकस्य वा अङ्गसंज्ञा मा भूदित्येतदर्थमिति बोध्यम् ।

अधिकारसूत्रम्-

**अङ्गस्य ६ । १ । ७२**

**इत्यधिकृत्य ।**

इनात्स्यादेशविधायकं विधिसूत्रम्-

**टाङसिङसामिनात्स्याः ७ । १ । ७२**

**अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः ।**

अकारान्ताद् अङ्गात् परे स्थितानां टा, ङसि, ङस् इत्येतेषां स्थाने क्रमेण इन, आत्, स्य एते आदेशा भवन्तीत्यर्थः ।

तृतीयैकवचने टा-प्रत्यये- राम + टा - राम + आ (चुटू) - राम + इन (टाङसिङसामिनात्स्याः) - रामेन (आद् गुणः) - रामेण (अट्कुप्वाङ्नुम्व्यवायेऽपि)।

दीर्घादेशविधायकं सूत्रम्-

**सुपि च ७। ३। १०२**

**यञादौ सुपि परे अतोऽङ्गस्य दीर्घः स्यात्।**

तृतीयाद्विवचने भ्याम्-प्रत्यये 'राम + भ्याम्' इत्यवस्थायां प्रकृतेरङ्गसंज्ञायामनेन सूत्रेण अकारस्य दीर्घे- रामाभ्याम्।

ऐसादेशविधायकं सूत्रम्-

**अतो भिस ऐस् ७। १। ९**

**अकारान्तादङ्गाद् भिस ऐस् स्यात्। अनेकाल्वात्सर्वादेशः।**

तृतीयाबहुवचने भिस्-प्रत्यये 'राम + भिस्' इत्यत्र भिसः स्थानेऽनेन "ऐस्" इत्यादेशे, अनेकाल्त्वात् "अनेकाल्शित्सर्वस्य" इति सर्वादेशे- राम + ऐस् - रामैस् (वृद्धिरेचि) - रामैर् - रामैः।

यादेशविधायकं सूत्रम्-

**ङेर्यः ७। १। ७३**

**अतोऽङ्गात्परस्य 'ङे' इस्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन यादेशस्य सुप्त्वात् "सुपि च" इति सूत्रेण दीर्घः। "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इत्येषा परिभाषात्र न प्रवर्तते "कष्टाय क्रमणे" इत्यादिनिर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्याम्।**

अनेन 'ङे' इत्यस्य स्थाने 'य' इत्यादेशे स्थानिवद्भावेन यादेशस्य सुप्त्वात् "सुपि च" इत्यनेन दीर्घो भवति। 'येन यो जन्यते स तस्य जनकस्य स्वरूपविघाताय निमित्तं न भवति' इत्यर्थिका 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येषा परिभाषाऽत्र न प्रवर्तते, पाणिनिना "कष्टाय क्रमणे" इत्यादिनिर्देशेन तस्याः परिभाषाया अनित्यत्वज्ञापनात्। 'कष्टाय' इति प्रयोगे 'कष्ट + य' इत्यवस्थायां "सुपि च" इत्यनेनैव दीर्घविधानात्।

चतुर्थ्येकवचने ङे-प्रत्यये- राम + ङे - राम + ए - राम + य (ङेर्यः) - रामाय (सुपि च)। चतुर्थीद्विवचने तृतीयाद्विवचनवत्- रामाभ्याम्।

एत्वविधायकं सूत्रम्-

**बहुवचने झल्येत् ७। ३। १०३**

**झलादौ बहुवचने सुपि परे अतोऽङ्गस्यैकारः स्यात्। रामेभ्यः। बहुवचने किम्? रामः। रामस्य। झलि किम्? रामाणाम्। सुपि किम्? पचध्वम्। जश्त्वम्।**

अत्र सूत्रे रामः, रामस्य इत्यादौ एत्वनिवारणाय 'बहुवचने' इति । 'रामाणाम्' इत्यादौ एत्वनिवारणाय 'झलि' इति । 'पचध्वम्' इत्यादौ एत्वनिवारणाय 'सुपि' इति बोध्यम् ।

चतुर्थीबहुवचने भ्यसि- राम + भ्यस् - रामे भ्यस् (बहुवचने झल्येत्) - रामेभ्यर् - रामेभ्यः ।

चर्त्वविधायकं सूत्रम्-

**वाऽवसाने ८ । ४ । ५६**

**अवसाने झलां चरो वा स्युः । रामात्-रामाद् । द्वित्वे रूपचतुष्टयम् । रामाभ्याम् । रामेभ्यः । रामस्य । सस्य द्वित्वपक्षे "खरि च" इति चर्त्वेऽप्यान्तरतम्यात् स एव, न तु तकारः । अल्पप्राणतया प्रयत्नभेदात् । अत एव "सः सि" इति तादेश आरभ्यते ।**

पञ्चम्येकवचने ङसि-प्रत्यये- राम + ङसि - राम + अस् - राम + आत् (टाङसिङसामिनात्स्याः) - रामात् (अकः सवर्णे दीर्घः) - रामाद् (झलां जशोऽन्ते) - रामात् (वाऽवसाने), पक्षे- रामाद् । तकार-दकारयोः "अनचि च" इति वैकल्पिकद्वित्वे चत्वारि रूपाणि जायन्ते । द्विवचने पूर्ववत्- रामाभ्याम् । बहुवचने भ्यसि चतुर्थीवत्- रामेभ्यः । षष्ठ्येकवचने ङस्-प्रत्यये- राम + ङस् - राम + अस् - राम + स्य (टाङसिङसामिनात्स्याः) - रामस्य । सस्य 'अनचि च' इति द्वित्वपक्षे 'खरि च' इति चर्त्वेऽप्यान्तरतम्यात्स एव भवति न तु तकारः, अल्पप्राणतया प्रयत्नभेदात् । अत एव "सः स्यार्धधातुके" इति सकारस्य तादेश आरभ्यते ।

एत्वविधायकं सूत्रम्-

**ओसि च ७ । ३ । १०४**

**ओसि परे अतोऽङ्गस्यैकारः स्यात् । रामयोः ।**

ओस्-प्रत्यये परे सति अकारान्तस्याङ्गस्यान्त्यस्याकारस्य स्थाने एकारादेशो भवति । राम + ओस् - रामे + ओस् (ओसि च) - राम् अय् + ओस् (एचोऽयवायावः) - रामयोस् - रामयोर् - रामयोः ।

नुडागमविधायकं विधिसूत्रम्-

**ह्रस्वनद्यापो नुट् ७ । १ । ५४**

**ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् ।**

ह्रस्वाः = एकमात्रिकाः अ, इ, उ, ऋ, लृ एते वर्णा अन्ते यस्य स ह्रस्वान्तः, तस्मात् ह्रस्वान्तादिति । अत्र 'नदी' इत्यनेन नदीसंज्ञकानाम्, 'आबन्त' इत्यनेन स्त्रियां विहितानां टाप्-डाप्-चाप्प्रत्ययान्तानां ग्रहणं बोध्यम् । 'नुट्' इत्यागमस्य उकार-टकारयोरनुबन्धलोपे 'न्' इत्येवावशिष्यते, टित्वादाद्यवयवत्वञ्च ।

दीर्घादेशविधायकं विधिसूत्रम्-

**नामि ६ । ४ । ३**

**नामि परेऽजन्ताङ्गस्य दीर्घः स्यात् । "सुपि च" इति दीर्घः यद्यपि परस्तथापीह न प्रवर्तते, सन्निपातपरिभाषाविरोधात् । 'नामि' इत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते । रामे । रामयोः । सुप्येत्वे कृते ।**

'नाम्' इति नुडागमेन सहितः षष्ठी-बहुवचन-प्रत्ययः, तस्मिन् परेऽजन्तस्य अङ्गस्यान्त्यवर्णस्य दीर्घो भवति । अकारान्त-प्रातिपदिकानां विषये 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा अनेन सूत्रेण दीर्घो विधीयते ।

राम + आम् - राम + न् आम् (ह्रस्वनद्यापो नुट्) - रामा + नाम् - रामानाम् (नामि) - रामाणाम् (अट्कुप्वाङ्नुम्व्यवायेऽपि) । राम + ङि - राम + इ - राम् ए (आद् गुणः) - रामे । राम + ओस्, षष्ठीद्विवचनवद्- रामयोः ।

अधिकारसूत्रम्-

**अपदान्तस्य मूर्धन्यः ८ । ३ । १५**

**आपादपरिसमाप्तेरधिकारोऽयम् ।**

अधिकारसूत्रम्-

**इण्कोः ८ । ३ । ५७**

**इत्यधिकृत्य ।**

षत्वादेशविधायकं विधिसूत्रम्-

**आदेशप्रत्यययोः ८ । ३ । ५९**

**"सहेः साडः सः" इति सूत्रात् 'सः' इति षष्ठ्यन्तं पदमनुवर्तते । इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात् । सस्य तादृश एव षः । रामेषु । "इण्कोः" किम् ? रामस्य । आदेशप्रत्यययोः किम् ? सुपीः । सुपिसौ । सुपिसः । अपदान्तस्य किम् ? हरिस्तत्र । एवं कृष्णमुकुन्दादयः ।**

इण्-कवर्गाभ्यामुत्तरस्य अपदान्तस्य आदेशरूपस्य, प्रत्ययस्यावयवरूपस्य च सकारस्य स्थाने मूर्धन्यः (षकारः) आदेशो भवति । 'रामस्य' इत्यादौ षत्वं न स्यादित्येददर्थं इण्कवर्गाभ्यां परस्येति वचनं सार्थकम् । सुपीः, सुपिसौ, सुपिसः, इत्यादौ षत्ववारणाय आदेशप्रत्यययोरिति वचनं युक्तिपूर्णम् । 'हरिस्तत्र' इत्यादौ षत्वं न स्यादिति अपदान्तस्येति ग्रहणमावश्यकम् ।

राम + सुप् - राम + सु - रामे + सु (बहुवचने झल्येत्) - रामे + षु (आदेशप्रत्यययोः) - रामेषु ।

एवमेव अकारान्तानां कृष्णमुकुन्दादिशब्दानां रूपसिद्धिप्रक्रिया ज्ञेया । कृष्णमुकुन्दादिप्रातिपदिकानां तृतीयाया एकवचने षष्ठ्या बहुवचने च नकारस्य स्थाने णकारो न भवति, अस्य कृते "अट्कुप्वाङ्-" इति सूत्रार्थो विवेक्तव्यः ।

| राम-शब्दस्य रूपावलिः | | | देव-शब्दस्य रूपावलिः | | |
|---|---|---|---|---|---|
| रामः | रामौ | रामाः | देवः | देवौ | देवाः |
| रामम् | रामौ | रामान् | देवम् | देवौ | देवान् |
| रामेण | रामाभ्याम् | रामैः | देवेन | देवाभ्याम् | देवैः |
| रामाय | रामाभ्याम् | रामेभ्यः | देवाय | देवाभ्याम् | देवेभ्यः |
| रामात्/रामाद् | रामाभ्याम् | रामेभ्यः | देवात्-द् | देवाभ्याम् | देवेभ्यः |
| रामस्य | रामयोः | रामाणाम् | देवस्य | देवयोः | देवानाम् |
| रामे | रामयोः | रामेषु | देवे | देवयोः | देवेषु |
| हे राम ! | हे रामौ | हे रामाः | हे देव ! | हे देवौ ! | हे देवाः ! |

## प्रयोगसिद्धिप्रकारः

### रामाय

रामशब्दस्य व्युत्पत्तिपक्षे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण 'स्वौजसमौट्-" इत्यादिना सूत्रेण चतुर्थ्या एकवचने ङेविभक्तौ 'राम + ङे' इति जाते 'लशक्वतद्धिते' इत्यनेन ङकारस्येत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे 'राम + ए' इत्यत्र "ङेर्यः" इति सूत्रेण 'ङे' इत्यस्य यादेशे 'राम + य' इति स्थिते "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" इत्यनेन प्रकृतेरङ्गसंज्ञायां "स्थानिवदादेशोऽनल्विधौ" इति सूत्रेण स्थानिवद्भावे "सुपि च" इति सूत्रेण अङ्गस्यान्त्यस्याकारस्य दीर्घे 'रामाय' इति रूपं सिद्धम् । अत्र "सुपि च" इति दीर्घविधौ "सन्निपातलक्षणोविधिरनिमित्तं तद्विघातस्य" इत्येषा परिभाषा न प्रवर्तते, 'रामाय' इतिवत् 'कष्टाय' इति पदस्य पाणिनिना निर्देशात् तस्याः परिभाषाया अनित्यत्वज्ञापकादिति ।

### रामाणाम्

रामशब्दस्य व्युत्पत्तिपक्षे "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ 'राम + आम्' इति जाते "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" इत्यनेन अङ्गसंज्ञायां "ह्रस्वनद्यापो नुट्" इत्यनेन आमो नुडागमेऽनुबन्धलोपे टित्वादाद्यवयवत्वे 'राम + नाम्' इति स्थिते "नामि" इत्यनेन अकारस्य दीर्घे 'रामानाम्' इत्यवस्थायाम् "अट् कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण नकारस्य णत्वे 'रामाणाम्' इति रूपं सिद्धम् । अत्र "सुपि च" इत्यनेन प्राप्तस्य दीर्घस्य सन्निपातपरिभाषया बाधेऽपि "नामि" इत्यस्यापि निषेधे तु सूत्रस्यैव व्यर्थत्वेन सूत्रसार्थक्याय "नामि" इति दीर्घविधौ सन्निपातपरिभाषा न प्रवर्तते इति निष्कर्षः ।

# अभ्यासः

## १. निम्नाङ्कितसूत्राणां संस्कृते सरलार्थं लिखत

(क) यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्

(ख) टाङसिङसामिनात्स्याः

(ग) बहुवचने झल्येत्

(घ) ह्रस्वनद्यापो नुट्

(ङ) आदेशप्रत्यययोः

## २. अधो लिखितानां प्रश्नानामुत्तरं दत्त

(क) यस्मात्प्रत्ययविधिरिति सूत्रे तदादिग्रहणस्य प्रयोजनं प्रदर्शयत ।

(ख) "अतो भिस ऐस्" इत्यनेन भिसः स्थाने क आदेशो विधीयते ?

(ग) 'रामाभ्यामि'त्यत्र केन सूत्रेण दीर्घो भवति ?

(घ) "आदेशप्रत्यययोः" इत्यनेन कुत्र षकारादेशः ?

(ङ) "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" अस्याशयं स्पष्टं कुरुत ।

## ३. परस्परं मेलयत

| | | |
|---|---|---|
| (क) | टा | य |
| | भिस् | आत् |
| | ङे | स्य |
| | ङसि | इन |
| | ङस् | ऐस् |
| (ख) | नुडागमः | रामेषु |
| | षत्वम् | रामाणाम् |
| | ऐसादेशः | रामस्य |
| | यादेशः | रामैः |
| | स्यादेशः | रामाय |

## ४. ध्रुव-मुकुन्द-कृष्ण-रमेश-ईश्वर-शब्दानां-रूपावलीर्लिखत ।

## ५. निम्नाङ्कितप्रयोगाणां रूपसिद्धिप्रक्रियां प्रदर्शयत

रामेण, मुकुन्दैः, रमेशस्य, ईश्वराणाम्, ध्रुवाय ।

## एकविंशः पाठः

# सर्वनामशब्दानां रूपसिद्धिप्रक्रिया

सर्वनामसंज्ञाविधायकं सूत्रम्-

**सर्वादीनि सर्वनामानि १। १। २७**

**सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। तदन्तस्यापीयं संज्ञा "द्वन्द्वे च" इति ज्ञापकात्। तेन परमसर्वत्र इति त्रल् परमभवकान् इत्यत्राकच्च सिद्ध्यति।**

सर्वादीनीति नपुंसकवशाच्छब्दरूपाणीति विशेष्यमध्याहार्यम्। सर्व आदिर्येषां तानि सर्वादीनीति तद्गुणसंविज्ञानो बहुव्रीहिः, तेन सर्वशब्दस्यापि सर्वनामसंज्ञा। अत्र च व्याख्याने "हलि सर्वेषाम्" इत्यादिनिर्देशाः प्रमाणम्। सर्वशब्दस्य सर्वनामत्वाभावे तु सर्वेषामित्यादौ सर्वनामकार्याणि सुडादीनि न स्युः। तथा च 'सर्वादीनी'ति तद्गुणसंविज्ञानो बहुव्रीहिः। तस्य अन्यपदार्थस्य, गुणा विशेषणानि वर्तिपदार्थरूपाणि, तेषां संविज्ञानं क्रियान्वयितया विज्ञानं यत्र स तद्गुणसंविज्ञान इति व्युत्पत्तिः। "द्वन्द्वे च" इति सूत्रेण द्वन्द्वसमासेन निष्पन्नानां सर्वनामान्तशब्दानां वर्णाश्रमेतराणामित्यादौ सर्वनामसंज्ञानिषेधात् तदन्तस्यापीयं संज्ञेति सिद्ध्यति। यदि केवलानां सर्वादिगणपठितानामेव सर्वनामसंज्ञा स्यात् तर्हि तदन्तानां सर्वनामसंज्ञायाः प्रतिषेधो व्यर्थः स्यात्। अतस्तदन्तस्यापीयं संज्ञेति विज्ञायत इत्यर्थः। तेन 'परमसर्वत्र' इत्यत्र 'सप्तम्यास्त्रल्' इति सप्तम्यन्तात् सर्वनाम्नो विधीयमानस्त्रल्, 'परमभवकान्' इत्यत्र 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यज्ञाताद्यर्थेषु विधीयमानोऽकच्च सिद्ध्यतीत्यर्थः।

शी इत्यादेशविधायकं विधिसूत्रम्-

**जसः शी ७। १। १७**

**अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। न च "अर्वणस्तृ-" इत्यादाविव नानुबन्धकृतमनेकाल्त्वमिति वाच्यम्। सर्वादेशात् प्रागित्संज्ञाया एवाभावात्। सर्वे।**

अदन्तात्सर्वनामसंज्ञकादङ्गात्परस्य जसः स्थाने शी इत्यादेशो भवतीति सूत्रार्थः। जसः स्थाने शी इत्यादेशं कृत्वा स्थानिवद्भावेन शी इत्यत्र प्रत्ययत्वमानीय शकारस्य "लशक्वतद्धिते" इति सूत्रेण शकारस्य इत्संज्ञाया अनन्तरमेव शी इत्यादेशे शित्वव्यवहारः। अत एवाह अनेकाल्त्वात्सर्वादेशः, न तु शित्वादिति शेषः। कुत इत्यत आह सर्वादेशादिति।

अनेन जसः स्थाने शी इत्यादेशे- सर्व + जस् - सर्व + अस् - सर्व + शी (जसः शी) - सर्व + ई - सर्वे (आद् गुणः)। सर्वम्, सर्वौ, सर्वान्, सर्वेण, सर्वाभ्याम्, सर्वैः इति रामवत्।

ङेः स्मै इत्यादेशविधायकं विधिसूत्रम्-

**सर्वनाम्नः स्मै ७ । १ । १४**

**अतः सर्वनाम्नो 'ङे' इत्यस्य 'स्मै' स्यात् । सर्वस्मै ।**

अकारान्तात् सर्वनामसंज्ञकादङ्गात् परस्य ङे-प्रत्ययस्य स्थाने 'स्मै' इत्यादेशो भवति । ङेर्यादेशं बाधित्वाऽनेन स्मै इत्यादेशः । सर्व + ङे - सर्व + ए, इत्यवस्थायां सर्वनामसंज्ञायामनेन 'ङे' इत्यस्य स्थाने 'स्मै' इत्यादेशे 'सर्वस्मै' इति । सर्वाभ्याम्, सर्वेभ्यः रामवत् ।

स्मात्-स्मिन्-विधायकं विधिसूत्रम्-

**ङसिङ्योः स्मात्स्मिनौ ७ । १ । १५**

**अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः । सर्वस्मात् ।**

अकारान्तात् सर्वनामसंज्ञकादङ्गात् परस्य ङसि-प्रत्ययस्य स्थाने 'स्मात्' इति, ङि-प्रत्ययस्य स्थाने च 'स्मिन्' इत्येतौ आदेशौ भवतः । ङसेर्विषये "टाङसिङसामिनात्स्याः" इत्यनेन प्राप्तं आदादेशं बाधित्वा अनेन स्मादादेशः । सर्वनामसंज्ञकात् सर्वप्रातिपदिकात् पञ्चम्येकवचने- सर्व + ङसि - सर्व + अस् - सर्व + स्मात् (ङसिङ्योः स्मात्स्मिनौ) - सर्वस्माद् (झलां जशोऽन्ते) - सर्वस्मात् (वाऽवसाने), चर्त्वाभावे- सर्वस्माद् । सर्वाभ्याम्, सर्वेभ्यः, सर्वस्य, सर्वयोः रामवत् ।

सुडागमविधायकं विधिसूत्रम्-

**आमि सर्वनाम्नः सुट् ७ । १ । ५२**

**अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः ।**

"आज्जसेरसुक्" इत्यतोऽनुवृत्तेन आदिति पञ्चम्यन्तेन अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतं विशेष्यते, तदन्तविधिः, परस्येत्यध्याहार्यम् । उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति न्यायेन तस्मादित्युत्तरस्येति परिभाषया आमीति सप्तम्यन्तं षष्ठ्यन्तमापद्यते । सर्वनाम्न इति तु विहितविशेषणम् । ततश्च 'अवर्णान्तादङ्गात् परस्य सर्वनामशब्दाद् विहितस्य षष्ठी-बहुवचनस्य आम्-प्रत्ययस्य 'सुट्' इति आगमो भवती'त्यर्थः सम्पद्यते । अवर्णान्तात्सर्वनाम्नो विहितस्याम इति व्याख्याने तु येषां तेषामित्यादौ सुडागमो न स्यात् । तत्र आमो दकारान्ताद्विहितत्वात् । सर्वनाम्नः परस्येति तु न व्याख्यातम्, तथा सति वर्णाश्रमेतराणामित्यसिद्धेः । विधिरयं नुडागमस्य अपवादः । सुट् इत्यस्य टकार इत्संज्ञकः, उकारश्च उच्चारणार्थः, स् इत्येवावशिष्यते । टित्वात् स्थानिनः (अम् इत्यस्य) आद्यवयवत्वे आम्-प्रत्ययः 'साम्' इति जायते, तस्मिन् च झलादि-बहुवचनवद् व्यवहारो भवति, अर्थात् कृते सुडागमे यदि अङ्गमकारान्तमस्ति चेत् तस्यान्त्यवर्णस्य "बहुवचने झल्येत्" इत्यनेन एत्वं भवति । एत्वे कृते च तस्य इण्-प्रत्याहारस्थत्वात् तस्मादव्यवहितोत्तरस्य प्रत्ययावयवभूतस्य सकारस्य "आदेशप्रत्यययोः" इत्यनेन षत्वं भवति । शब्दसाधुत्वप्रक्रियायामादेश-प्रत्ययाभ्यामवर्णान्तत्वप्राप्ताद् हलन्तात् त्यदादिशब्दात् परस्य आम्-प्रत्ययस्यापि अनेन सुडागमो भवतीति ज्ञेयम् ।

सर्व + आम् - सर्व + स् आम् (आमि सर्वनाम्नः सुट्) - सर्वे + साम् (बहुवचने झल्येत्) - सर्वे + षाम् (आदेशप्रत्यययोः) - सर्वेषाम् ।

सर्व + ङि - सर्व + इ - सर्व + स्मिन् (ङसिङ्योः स्मात्स्मिनौ) - सर्वस्मिन् । सर्वयोः, सर्वेषु रामवत् ।

**सर्वादयश्च पञ्चत्रिंशत् । सर्व, विश्व, उभ, उभय, कतर (डतर), कतम (डतम), अन्य, अन्यतर, इतर, त्व, त्वत्, नेम, सम, सिम । "पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायम्" (ग.सू.१) "स्वमज्ञातिधनाख्यायाम्" (ग.सू.२) "अन्तरं बहिर्योगोपसंव्यानयोः" (ग.सू.३) । त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् इति । तत्र उभशब्दो द्वित्वविशिष्टस्य वाचकः, अत एव नित्यं द्विवचनान्तः । तस्येह पाठस्तु "उभकौ" इत्यकजर्थः । न च कप्रत्ययेनेष्टसिद्धिः । द्विवचनपरत्वाभावेन 'उभयतः' 'उभयत्र" इत्यादाविवायच्प्रसङ्गात् । तदुक्तम्- "उभयोऽन्यत्र" (वा.) । अन्यत्र द्विवचनपरत्वाभावे । उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्तः । तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया "प्रथमचरम" इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव संज्ञा भवति । उभये । डतरडतमौ प्रत्ययौ । "प्रत्ययग्रहणे तदन्ता ग्राह्याः" (प.) । यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति, "सुप्तिङन्तम्-" इति ज्ञापकात् । तथापीह तदन्तग्रहणम् । केवलयोः संज्ञायाः प्रयोजनाऽभावात् । अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते । तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा । त्व त्व इति द्वावप्यदन्तावन्यपर्यायौ । एक उदात्तोऽपरोऽनुदात्त इत्येके । एकस्तान्त इत्यपरे । नेम इत्यर्थे । समः सर्वपर्यायः । तुल्यपर्यायस्तु नेह गृह्यते, "यथासङ्ख्यमनुदेशः समानाम्" इति ज्ञापकात् । "अन्तरं बहिर्योगोप-" इति गणसूत्रे "अपुरीति वक्तव्यम्" (वा.) । अन्तरायां पुरि ।**

अथ के सर्वादयः शब्दाः कति च ते इत्यत्राह- **सर्वादयश्च पञ्चत्रिंशदिति** । पूर्वपरावरेति सर्वादिगणान्तर्गतं सूत्रम् । व्यवस्थायामसंज्ञायां च पूर्वादीनि सप्त सर्वादिगणप्रविष्टानि वेदितव्यानीत्यर्थः । सर्वनामसंज्ञा तु सर्वादीनि सर्वनामानीत्येव सिद्ध्यति । स्वमज्ञातीति, अन्तरं बहिरिति च गणसूत्रद्वयमप्येवमेव योज्यम् । उभशब्दे विशेषमाह- **तत्रेति**, सर्वादिषु मध्य इत्यर्थः । अत एवेति, द्वित्वविशिष्टवाचकत्वादेवेत्यर्थः । **नित्यमिति**, सर्वदा द्विवचनान्त एव नत्वेकवचनबहुवचने इति यावत् । नन्वेवं सति "जसः शी", "सर्वनाम्नः स्मै", "ङसिङ्योः स्मात्स्मिनौ", "आमि सर्वनाम्नः सुट्" इत्युक्तानां सर्वनामकार्याणां द्विवचनेऽभावादुभशब्दस्य सर्वादिगणे पाठो व्यर्थ इत्यत आह-**तस्येहेति** । तस्य.= उभशब्दस्य, इह = सर्वादिगणे, पाठस्तु 'उभकौ' इत्यत्र "अव्ययसर्वनाम्नामकच्प्राक्टेः" इत्यकच्प्रत्ययार्थ इत्यर्थः । न च कप्रत्ययेन 'उभकौ' इतीष्टरूपसिद्धिः, द्विवचनपरत्वाऽभावे उभशब्दादयच् विहितः । अकचि सति तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति न्यायेन उभशब्देनोभकशब्दोऽपि गृह्यते । तस्य च 'उभक + औ' इत्यस्यां दशायां द्विवचनपरत्वादयच्प्रत्ययो न भवति । कप्रत्यये तु सति तस्य उभशब्दात्परतो विहितत्वेन तन्मध्यपतितन्यायाप्रवृत्त्या उभकशब्दस्योभशब्देन ग्रहणाऽभावादुभशब्दस्य कप्रत्ययव्यवधानेन द्विवचनपरकत्वाऽभावादयचि 'उभयकौ' इति स्यात् । 'उभयत', 'उभयत्र' इत्यत्र द्विवचनपरकत्वाऽभावादयच्प्रत्ययो यथास्ति तद्वदित्यर्थः । ततश्च सर्वनामतानिमित्तकाऽकजर्थ उभशब्दस्य सर्वादिषु पाठ इति स्थितम् ।

अथोभयशब्दे विशेषमाह- **उभयशब्दस्येति** । उभौ अवयवौ यस्यावयविनः स उभयो मणिः । "उभादुदात्तः" इत्ययच् । अवयववृत्तेः सङ्ख्यावाचिन उभशब्दादवयविन्यर्थेऽयच्प्रत्ययः स्यादिति तदर्थः । उभयः उभये । उभयम्, उभयान् । उभयेन, उभयैः । उभयस्मै, उभयेभ्यः । उभयस्मात्, उभयेभ्यः । उभयस्य, उभयेषाम् । उभयस्मिन् उभयेषु इत्येव रूपाणि । उभयशब्दाज्जसि सर्वादीनीति नित्यां सर्वनामसंज्ञां बाधित्वा परत्वात्

"प्रथमचरमतयाल्पार्धकतिपयनेमाश्च" इति सर्वनामसंज्ञाविकल्पप्राप्तिमाशङ्क्य परिहरति- **तस्मादित्यादिना**। तस्मात् = उभयशब्दाद् जसि सति प्रथमचरमेति विकल्पे प्राप्ते नित्यैव संज्ञा भवतीत्यर्थः। सर्वादीनीत्यनेनेति शेषः। ननु प्रथमचरमादिष्वनन्तर्भावात्कथमुभयशब्दस्य तयप्प्रत्ययान्तत्वमित्यत आह- अयजादेशस्य स्थानिवद्भावेनेति। ननु प्रथमचरमेति विकल्पस्य परत्वात् कथमिहसर्वादीनीति नित्यैव संज्ञेत्यत आह- अन्तरङ्गत्वादिति। तदेवोपपादति- **विभक्तिनिरपेक्षत्वेनेति**। प्रथमचरमेति जसि विकल्पविधिर्जसपेक्षत्वेन विभक्त्यपेक्षत्वाद् बहिरङ्गः। सर्वादीनीति नित्यसंज्ञाविधिस्तु तदनपेक्षत्वादन्तरङ्गः, अल्पापेक्षमन्तरङ्गमिति न्यायात्। अतोऽत्र परमपि प्रथमचरमेति विकल्पं बाधित्वा सर्वादीनीति नित्यैव संज्ञा भवति, परादन्तरङ्गस्य बलीयस्त्वादिति भावः। तथा च शीभावो नित्यः- उभये इति।

ननु डतरडतमशब्दयोः क्वापि प्रयोगादर्शनात् किमर्थस्तयोः पाठ इत्यत आह- डतरडतमौ प्रत्ययाविति। अतः प्रत्ययग्रहणपरिभाषया डतरग्रहणेन कतरादीनां (कतर, ततर, यतर, एकतर, कतम, ततम, यतम, एकतम) शब्दानां च ग्रहणमिति भावः। कुत इत्यत आह- **केवलयोरिति**। न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्यय इति न्यायेन केवलप्रत्यययोर्डतरडतमयोः प्रयोगानर्हत्वेन तयोः सर्वनामसंज्ञायां फलाऽभावादित्यर्थः। अन्यतरशब्दपाठो व्यर्थः। अन्यतमशब्दस्यापि डतमप्रत्ययान्तत्वात् सर्वनामत्वापत्तिश्चेत्यत आह- **अन्यतरान्यतमशब्दावव्युत्पन्नाविति**। डित्थादिशब्दवत्प्रकृतिप्रत्ययविभागविहीनावित्यर्थः। किंयत्तदेकेभ्य एव डतरडतमविधानादिति भावः। नन्वेवं सत्यन्यतरान्यतमशब्दाभ्यां द्विबहुनिर्धारणावगमः कथमित्यत आह- स्वभावादिति। एवं च अन्यतमशब्दस्य न सर्वनामत्वमित्याह- **तत्रेति**। एतयोर्मध्ये इत्यर्थः। अन्यतरशब्दस्य तु डतरडतमविधानादिति भावः। नन्वेवं सत्यन्यतरान्यतमशब्दाभ्यां द्विबहुनिर्धारणावगमः कथमित्यत आह- **स्वभावादिति**। अन्यतरशब्दस्य तु डतरप्रत्ययान्तत्वाऽभावेऽपि सर्वादिगणे पाठादेव सर्वनामत्वमित्युक्तप्रायम्।

त्व त्व इति द्वावप्यदन्तावन्यपर्यायाविति, अन्यशब्दसमानार्थकावित्यर्थः, द्वयोरप्यदन्तत्वे। अन्यतरपाठवैयर्थ्यं परिहरति- एकस्तान्त इति। नेम इत्यर्धे इति वर्तते। समः सर्वशब्दसमानार्थक एव समशब्दः सर्वादिगणे पठितः, न तु तुल्यपर्यायः। तुल्यशब्दसमानार्थक इत्यर्थः, अन्यथा "यथासंख्यमनुदेशसमेषामि"ति निर्दिशेदिति भावः।

जसि विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १।१।३४**

**एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे, पूर्वाः। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किम्? दक्षिणा गाथकाः, कुशला इत्यर्थः। असंज्ञायां किम्? उत्तराः कुरवः।**

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर एते शब्दाः संज्ञाभिन्नव्यवस्थायामर्थे जस्प्रत्यये परे विकल्पेन सर्वनामसंज्ञका भवन्तीति सूत्रार्थः। अपेक्ष्यत इत्यपेक्षः, स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियमः व्यवस्था उच्यते। ततश्च नियमेनावधिसापेक्षार्थे वर्तमानानां पूर्वादिशब्दानां जसि सर्वनामसंज्ञाविकल्प इति सूत्रार्थो फलति।

'दक्षिणा गाथकाः' इत्यत्र दक्षिणशब्दो नावध्यपेक्ष इति भावः। 'दक्षिणपार्श्ववर्तिनो गाथकाः' इत्यत्र कस्मादित्यवध्यपेक्षा अस्त्येवेत्यत आह- 'कुशलाः' इत्यर्थ इति। सूत्रेऽस्मिन् 'असंज्ञायाम्' इति निर्देशात् संज्ञाशब्दे

सर्वनामसंज्ञा नेति बोध्यम् । यथा- 'उत्तराः कुरवः' अत्र कुरुशब्दो देशविशेषे नित्यं बहुवचनान्तः । सुमेरुमवधीकृत्य तत्रोत्तरशब्दो वर्तत इत्यस्तीह व्यवस्था, किन्तु संज्ञाशब्दत्वान्नास्य सर्वनामता, तेन जसः शीभावो न, 'उत्तराः' इत्येव रूपम् ।

उत्तर + जस् - उत्तर + अस्, अनेन सर्वनामसंज्ञापक्षे- उत्तर + ई (जसः शी) - उत्तरे । सर्वनामसंज्ञाभावे- उत्तर + अस् - उत्तरास् - उत्तरार् - उत्तराः ('रामाः' इतिवत्) । एवं परादीनामपि ।

जसि विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**स्वमज्ञातिधनाख्यायाम् १ । १ । ३५**

**ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । स्वे, स्वाः । आत्मीया इत्यर्थः । आत्मन इति वा । ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा ।**

ज्ञातयः = बान्धवाः, धनन्तु प्रसिद्धमेव, ताभ्यामन्यार्थे विद्यमानस्य स्व-शब्दस्य जसि परे विभाषया सर्वनामसंज्ञा भवतीत्यर्थः ।

स्व + जस् - स्व + अस्, अनेन सर्वनामसंज्ञापक्षे सर्ववत्- स्व + शी - स्व + ई - स्वे । सर्वनामसंज्ञाभावे रामवत्- स्व + अस् - स्वास् - स्वार् - स्वाः ।

जसि विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**अन्तरं बहिर्योगोपसंव्यानयोः १ । १ । ३६**

**बाह्ये परिधानीये चार्थे अन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात् । अन्तरे अन्तरा वा गृहाः, बाह्या इत्यर्थः । अन्तरे अन्तरा वा शाटकाः, परिधानीया इत्यर्थः ।**

बहिः = अनावृतप्रदेशः, तेन योगः = सम्बन्धो यस्य स बहिर्योगः = बहिर्विद्यमानोऽर्थः । उपसंवीयते = परिधीयत इति उपसंव्यानम् = अन्तरीयं वस्त्रम्, तत्र वर्तमानोऽन्तरशब्दो जसि विभाषया सर्वनासंज्ञको भवतीति सरलार्थः ।

अन्तर + जस् - अन्तर + अस् - अन्तर + शी - अन्तर + ई - अन्तरे । पक्षान्तरे- अन्तर + जस् - अन्तर + अस् - अन्तरास् - अन्तरार् - अन्तराः ।

विभाषया स्मात्-स्मिन्-आदेशविधायकं विधिसूत्रम्-

**पूर्वादिभ्यो नवभ्यो वा ७ । १ । १६**

**एभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । एवं परादीनामपि । शेषं सर्ववत् । एकशब्दः संख्यायां नित्यैकवचनान्तः ।**

पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तरशब्दानां नियतेष्वर्थेषु ङसि-ङिविभक्त्योः स्थाने क्रमेण स्मात्, स्मिन् इत्येतौ आदेशौ विकल्पेन भवतः ।

अनेन सूत्रेण ङसेः स्थाने प्राप्तं नित्यं स्मादादेशं बाधित्वा विकल्पेन स्मादादेशपक्षे- पूर्व + ङसि - पूर्व + अस् - पूर्व + स्मात् - पूर्वस्मात् - पूर्वस्माद्/पूर्वस्मात् । अन्ये पक्षे ङसेरादादेशे रामवत्- पूर्व + ङसि - पूर्व + अस् - पूर्व + आत् (टाङसिङसामिनात्स्याः) - पूर्वात् - पूर्वाद्/पूर्वात् ।

एवमेव विकल्पेन स्मिन्पक्षे- पूर्व + ङि - पूर्व + इ - पूर्व + स्मिन् - पूर्वस्मिन् । स्मिनभावे रामवत्- पूर्व + ङि - पूर्व + इ - पूर्वे ।

एवं परादीनामन्तरान्तानामपि शब्दानां रूपाणि जायन्ते । शेषविभक्तिषु सर्ववदेव रूपाणि ज्ञेयानि ।

सङ्ख्यावाचकस्य एक-शब्दस्य एकवचने एव रूपाणि निष्पद्यन्ते, न तु द्विबहुवचनयोरित्यर्थः ।

सर्वनामसंज्ञाया निषेधविधायकं सूत्रम्-

**न बहुव्रीहौ** १।१।२९

**बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात् । त्वकं पिता यस्य स त्वत्कपितृकः । अहकं पिता यस्य स मत्कपितृकः । इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते । अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत । स च समासेऽपि श्रूयेत । अतिक्रान्तो भवकन्तम् अतिभवकान् इतिवत् । भाष्यकारस्तु त्वकत्पितृकः, मकत्पितृकः इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ । यथोत्तरं मुनीनां प्रामाण्यम् ।**

**'संज्ञोपसर्जनीभूतास्तु न सर्वादयः'** (वा.) । **महासंज्ञाकरणेन तदनुगुणानामेव गणे संनिवेशात् । अतः संज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति । सर्वो नाम कश्चित् तस्मै सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मा अतिसर्वाय देहि । अतिकतरं कुलम् । अतितत् ।**

अत्र सूत्रे सर्वादीनि सर्वनामानीत्यनुवर्तते । बहुव्रीहौ सर्वादीनि सर्वनामानि न स्युरिति सरलार्थः । एवं सति सूत्रमिदं व्यर्थम्, प्रियसर्वायेत्यादीनां बहुव्रीहिवर्तिनां सर्वादीनां संज्ञोपसर्जनीभूतास्तु न सर्वादयः इत्यनेन निषेधात् । अत आह- चिकीर्षित इति । तथा च बहुव्रीहौ प्रसक्ते सति ततः प्रागेव विग्रहवाक्येऽयं निषेधोऽर्थवान् भवति । एकार्थीभावात्मकसामर्थ्यस्य समासदशायामेव सत्त्वेन विग्रहवाक्ये तदभावेन तदानीमुक्तोपसर्जनत्वस्याऽभावादिति भावः ।

त्वकं पिता यस्य स त्वत्कपितृकः । अहकं पिता यस्य स मत्कपितृकः । इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते । अन्यथा भवत्-शब्दस्य सर्वादिगणे पाठात् सर्वनामत्वादलौकिकविग्रहदशायामकच् । ततश्च 'भवकत् अम् अति' इत्यलौकिकविग्रहे समासे सति सुपो धातुप्रातिपदिकयोरिति सुब्लुकि अतिभवकत्-शब्दात् प्रथमैकवचने 'अतिभवकान्' इति रूपम् । समासाऽभावपक्षे तु भवकन्तमतिक्रान्त इति लौकिकविग्रहवाक्यं भवति । तत्र समासदशायां भवच्छब्दार्थस्य उपसर्जनत्वेऽप्यलौकिकविग्रहदशायां भवच्छब्दस्यानुपसर्जनत्वात्सर्वनामत्वे सति प्रवृत्तोऽकच् अतिक्रान्तो भवकन्तमिति लौकिकविग्रहवाक्येऽतिभवकानिति समासे चानुवर्तते, लौकिकविग्रहदशायां भवच्छब्दस्योक्तरीत्याऽनुपसर्जनत्वात् । समासे तस्योपसर्जनत्वेऽपि कारणीभूताऽलौकिकविग्रहदशायां प्रवृत्तस्याऽकचो निवर्तकाऽभावात् । तथा च अतिक्रान्तो भवकन्तमतिभवकान् इत्यादौ लौकिकविग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत । स च समासेऽपि श्रूयेत ।

सर्वनामसंज्ञाया निषेधविधायकं सूत्रम्-

**तृतीयासमासे १ । १ । ३०**

**इह सर्वनामता न स्यात् । मासपूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय ।**

तृतीयासमासे विद्यमानानां सर्वादिशब्दानां सर्वनामसंज्ञा न भवतीति सरलार्थः । तेन 'मासेन पूर्वाय' इत्यस्मिन्नर्थे तृतीयासमासे जाते मासपूर्वशब्दस्य सर्वनामताया अभावात् 'स्मै' इत्यादेशाभावः । तृतीयासमासार्थवाक्येऽपि न सर्वनामसंज्ञा । तेन 'मासेन पूर्वाय' इत्यत्र 'पूर्वाय' इति रामवद्रूपम् ।

सर्वनामसंज्ञाया निषेधविधायकं सूत्रम्-

**द्वन्द्वे च १ । १ । ३१**

**द्वन्द्वे उक्तसंज्ञा न । वर्णाश्रमेतराणाम् । समुदायस्यैवायं निषेधः, नत्ववयवानाम् । न चैवं तदन्तविधिना सुट्प्रसङ्गः, सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात् ।**

द्वन्द्वसमासे सर्वनामसंज्ञा न भवतीति सरलार्थः । वर्णाश्चाश्रमाश्चेतरे चेति द्वन्द्वः । तेषां वर्णाश्रमेतराणाम् । अनेन सर्वनामत्वाऽभावाद् "आमि सर्वनाम्नः सुट्" इति न सुट् ।

विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**विभाषा जसि १ । १ । ३१**

**जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात् । वर्णाश्रमेतरे, वर्णाश्रमेतराः । शीभावं प्रत्येव विभाषेत्युक्तम्, अतो नाकच्, किन्तु कप्रत्यय एव । वर्णाश्रमेतरकाः ।**

सर्वनामग्रहणमनुवर्तते, द्वन्द्व इति च । जसि इत्यविभक्तिको निर्देशः । जस इः जसिः । आर्षः सप्तम्या लुक् । ततश्च जसादेशे शीभावे कर्तव्ये द्वन्द्वे सर्वनासंज्ञा वा भवतीति सूत्रार्थः । सर्वनामसंज्ञापक्षे जसः शीभावे- वर्णाश्रमेतरे, तदभावे- वर्णाश्रमेतराः ।

विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**प्रथमचरमतयाल्पार्धकतिपयनेमाश्च १ । १ । ३३**

**एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः । प्रथमे, प्रथमाः । शेषं रामवत् । तयः प्रत्ययस्ततस्तदन्ता ग्राह्याः ।**

**द्वितये, द्वितयाः । शेषं रामवत् । नेमे, नेमाः । शेषं सर्ववत् ।**

**"विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम्" (वा.) द्वितीयस्मै, द्वितीयाय । एवं तृतीयः । अर्थवद्ग्रहणान्नेह– पटुजातीयाय ।**

प्रथम, चरम, अल्प, अर्ध, कतिपय, नेम इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च जस्-प्रत्यये परे विकल्पेन सर्वनामसंज्ञका भवन्ति । 'अर्धम्' इत्यर्थको नेम-शब्दः सर्वादिगणे पठितोऽस्ति, अतस्तस्य सर्वत्र नित्यं सर्वनामसंज्ञायां सिद्धायां जस्विभक्तौ अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते । तदन्ये प्रथम, चरम, अल्प,

अर्ध, कतिपय इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च सर्वादिगणे न विद्यन्त इति जस्-विभक्तौ परतः सत्यामेव एते शब्दा अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञां लभन्ते, अन्यासु विभक्तिषु न । जस्विभक्तौ सर्वनामसंज्ञापक्षे सर्वशब्दवत्, पक्षान्तरे, अन्यासु विभक्तिषु च रामशब्दवद् एतेषां शब्दानां रूपाणि जायन्ते । प्रथमः = आदिमः, चरमः = अन्तिमः, अल्पः = किञ्चित्, अर्धः = अंशसामान्यः (अर्धम् = समांशः) ।

'तयप्' इति तद्धितप्रत्ययः 'सङ्ख्याया अवयवे तयप्' इति सूत्रेण सङ्ख्यावाचकेभ्यः शब्देभ्यः 'अवयवाः अस्य' इत्यर्थे विधीयते । द्वितयः/द्वय, तृतय/त्रय, पञ्चतय इत्यादयः शब्दास्तयप्-प्रत्ययान्ताः सन्ति । एतेषामपि अनेन सूत्रेण जस्-विभक्तौ विकल्पेन सर्वनामसंज्ञा भवति ।

**अनेन सर्वनामसंज्ञापक्षे–**

प्रथम जस् - प्रथम अस् - प्रथम शी - प्रथम ई - प्रथमे । पक्षान्तरे- प्रथम जस् - प्रथम अस् - प्रथमास् - प्रथमार् - प्रथमाः । एवं चरमादि-शब्दानामपि जस्-प्रत्यये प्रथम-शब्दवद् रूपाणि जायन्ते । यथा- चरम- चरमे/चरमाः । अल्प- अल्पे/अल्पाः । अर्ध- अर्धे/अर्धाः । कतिपय- कतिपये/कतिपयाः । नेम- नेमे/नेमाः । द्वितय- द्वितये/द्वितयाः । तृतय- तृतये/तृतयाः । शेषविभक्तिषु नेम-शब्दभिन्नानां प्रथमादीनां शब्दानां रामवत्, नेम-शब्दस्य च सर्ववत् रूपाणि जायन्ते ।

तीय-प्रत्ययान्तानां शब्दानां ङित्-विभक्तीनां विषये विकल्पेन सर्वनामसंज्ञा भवतीति वार्तिकार्थः । 'तीय' इति तद्धितप्रत्ययो द्वि-शब्दात्, त्रि-शब्दात् च पूरणार्थे विधीयते, तेन 'द्वितीय', 'तृतीय' इत्येतौ शब्दौ निष्पद्येते । एतौ शब्दौ ङे-ङसि-ङि-विभक्तिषु परेषु विकल्पेन सर्वनामसंज्ञकौ भवतः । वार्तिकेन 'ङित्सु' इत्युक्तेऽपि ङस्-विभक्तौ तु सर्वनामसंज्ञाप्रयुक्त-कार्यस्य अभावात् (फलाभावात्) संज्ञा अपि न भवतीति ज्ञेयम् ।

द्वितीय + ङे - द्वितीय + ए - द्वितीय + स्मै - द्वितीयस्मै । सर्वनामसंज्ञाभावे- द्वितीयाय । द्वितीय + ङसि - द्वितीय + अस् - द्वितीय + स्मात् - द्वितीयस्मात् - द्वितीयस्माद् - द्वितीयस्मात्-द् । सर्वनामसंज्ञाभावे- द्वितीयात्-द् । द्वितीय + ङि - द्वितीय + इ - द्वितीय + स्मिन् - द्वितीयस्मिन् । सर्वनामसंज्ञाभावे- द्वितीये ।

एवं तृतीय-शब्दस्यापि उक्तासु विभक्तिषु क्रमेण तृतीयस्मै/तृतीयाय, तृतीयस्मात्-द्/तृतीयात्-द्, तृतीयस्मिन्/तृतीये इति रूपाणि जायन्ते । शेषविभक्तिषु तु रामशब्दवदेव अनयो रूपाणि निष्पद्यन्ते ।

सर्वादिषु अदन्तशब्दानां रूपनिष्पत्तिप्रक्रियात्र पाठे निर्दिष्टा वर्तते । अन्येषां तत्तत्प्रकरणे निरूपणं भविष्यति । अदन्तसर्वनामशब्दानां रूपगतभेदेन रूपावलिरत्र प्रस्तूयते -

| सर्वशब्दस्य रूपावलिः | | | पूर्वशब्दस्य रूपावलिः | | |
|---|---|---|---|---|---|
| सर्वः | सर्वौ | सर्वे | पूर्वः | पूर्वौ | पूर्वे/पूर्वाः |
| सर्वम् | सर्वौ | सर्वान् | पूर्वम् | पूर्वौ | पूर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः | पूर्वेण | पूर्वाभ्याम् | पूर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः | पूर्वस्मै | पूर्वाभ्याम् | पूर्वेभ्यः |
| सर्वस्मात्-द् | सर्वाभ्याम् | सर्वेभ्यः | पूर्वस्मात्-द्<br>पूर्वात्-द् | पूर्वाभ्याम् | पूर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् | पूर्वस्य | पूर्वयोः | पूर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु | पूर्वस्मिन्<br>पूर्वे | पूर्वयोः | पूर्वेषु |
| हे सर्व | हे सर्वौ | हे सर्वे | हे पूर्व | हे पूर्वौ | हे पूर्वे/हे पूर्वाः |
| एवमेव विश्व-कतर-कतम-अन्य-अन्यतर-इतर-त्व-सम-सिमशब्दानां रूपावल्यो ज्ञेयाः । | | | एवमेव पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तरशब्दानां रूपावल्यो ज्ञेयाः । | | |

## प्रयोगसिद्धिप्रकारः

### सर्वस्मै

सर्वशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तौ ङकारस्य "लशक्वतद्धिते" इत्यनेनेत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे 'सर्व + ए' इति जाते "सर्वादीनि सर्वनामानि" इति सूत्रेण सर्वनामसंज्ञायां "ङेर्यः" इत्यनेन प्राप्तं यादेशं प्रबाध्य "सर्वनाम्नः स्मै" इत्यनेन 'ङे' इत्यस्य स्थाने 'स्मै' आदेशे 'सर्वस्मै' इति रूपं सिद्धम् ।

### पूर्वस्मिन्/पूर्वे

पूर्वशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण सप्तम्या एवचने ङिविभक्तौ ङकारस्य "लशक्वतद्धिते" इत्यनेनेत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे 'पूर्व + इ' इति जाते "सर्वादीनि सर्वनामानि" इति सूत्रेण सर्वनामसंज्ञायां "ङसिङ्योः स्मात्स्मिनौ" इत्यनेन नित्यमेव स्मिन्नादेशे प्राप्ते तं प्रबाध्य "पूर्वादिभ्यो नवभ्यो वा" इति सूत्रेण विकल्पेन स्मिन्नादेशे 'पूर्वस्मिन्' इति रूपम् । विकल्पतया स्मिन्नादेशस्याभावपक्षे 'पूर्व + इ' इत्यवस्थायाम् "आद् गुणः" इति सूत्रेण गुणे 'पूर्वे' इति रूपद्वयं सिद्धम् ।

# अभ्यासः

## १. निम्नाङ्कितसूत्राणां संस्कृते सरलार्थं लिखत

(क) सर्वादीनि सर्वनामानि

(ख) आमि सर्वनाम्नः सुट्

(ग) पूर्वादिभ्यो नवभ्यो वा

(घ) तृतीया समासे

(ङ) प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ।

## २. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत

(क) त्यदादिगणे ..................... शब्दाः सङ्गृहीताः सन्ति । (दश, द्वादश)

(ख) त्यदादिगणः ..................... अन्तर्गणो विद्यते । (सर्वादिगणस्य, शकन्ध्वादिगणस्य)

(ग) अन्तर-शब्दस्य ................ अर्थे सर्वनामसंज्ञा भवति । (मध्ये, परिधानीये)

(घ) सुडागमः ....................... इति सूत्रेण भवति । (ह्रस्वनद्यापो नुट्, आमि सर्वनाम्नः सुट्)

(ङ) चरम-शब्दस्य ..................... सर्वनामसंज्ञा भवति । (जस्, ङे)

(च) द्वितय-शब्दः ..................... वर्तते । (तीय-प्रत्ययान्तः, तयप्-प्रत्ययान्तः)

(छ) नेम-शब्दस्य जस्-विभक्तौ ..................... सर्वनामसंज्ञा भवति । (नित्यम्, विकल्पेन)

## ३. अधो लिखितानां प्रश्नानामुत्तराणि दत्त

(क) सर्वनामशब्दानां कासु विभक्तिषु रामशब्दाद् भिन्नप्रक्रियया रूपाणि निष्पद्यन्ते ?

(ख) सर्वनामशब्दाः के ?

(ग) पूर्वादिनवशब्दाः के ?

(घ) जसः स्थाने विकल्पेन 'शी' आदेशविधायकानि सूत्राणि कानि ?

(ङ) उभशब्दस्य द्विवचने एवमेकशब्दस्य एकवचने एव प्रयोगे कारणं किम् ?

## ४. परस्परं मेलयत

| | |
|---|---|
| सर्वे | ङसिङ्योः स्मात्स्मिनौ |
| सर्वस्मै | आमि सर्वनाम्नः सुट् |
| सर्वस्मात् | सर्वनाम्नः स्मै |
| सर्वेषाम् | पूर्वादिभ्यो नवभ्यो वा |
| पूर्वस्मिन्/पूर्वे | जसः शी |

## ५. निम्नाङ्कितानां रूपाणां विभक्तिवचने निर्दिशत

विश्वेषाम्, उभौ, अपरस्मिन्, कतमस्य, अन्यतरस्मात्, उभये, पूर्वैः, सर्वेभ्यः, विश्वम्, परयोः, एकस्मै ।

## ६. निम्नाङ्कितशब्दानां रूपावलीः लिखत

विश्व, एक, अपर, सम, कतम, अन्यतर ।

## ७. अधो लिखितानां रूपाणां सिद्धिं कुरुत

सर्वेषाम्, विश्वस्मिन्, इतरे, पूर्वस्मै, प्रथमाः, द्वितीयस्मै ।

## द्वाविंशः पाठः

# मासनिर्जरविश्वपादिशब्दानां रूपसिद्धिप्रक्रिया

**निर्जरः ।**

'निष्क्रान्तो जरायाः' इति विग्रहे 'निरादयः क्रान्ताद्यर्थे-' इति समासेन निष्पन्नस्य निर्जरशब्दस्य रूपाणि रामशब्दापेक्षया भिन्नरूपेणापि निष्पद्यन्ते, सुविभक्तौ रुत्वे विसर्गे निर्जरः ।

विभाषया जरसादेशविधायकं विधिसूत्रम्-

**जराया जरसन्यतरस्याम् ७ । २ । १०१**

**जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ ।**

षष्ठाऽध्यायस्य चतुर्थपादादारभ्य "अङ्गस्य" इत्यस्याधिकारोऽस्ति । अजादिषु विभक्तिषु परेषु जरा-शब्दस्य स्थाने विकल्पेन 'जरस्' इत्यादेशो भवति । अनेकाल्त्वात् 'अनेकाल्शित्सर्वस्य' इति सूत्रेण सम्पूर्णस्य स्थानिनः स्थाने जरसादेशो भवति । तस्य च स्थानिवद्भावेन विभक्तित्वात् 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्संज्ञा निषिध्यते ।

**"पदाङ्गाधिकारे तस्य च तदन्तस्य च"** (प.) **अनेकाल्त्वात्सर्वादेशे प्राप्ते–**

"पदस्य", "अङ्गस्य" इत्यनयोरधिकारे विहिता आदेशा निर्दिष्टशब्दस्य तदन्तशब्दस्य च स्थाने भवन्तीति परिभाषार्थः । तेन सूत्रनिर्दिष्टस्य जरान्तस्य निर्जरशब्दस्य अजादौ विभक्तौ जरसादेशं प्राप्नोति । अत्र प्रसङ्गेऽनेकाल्त्वात्सर्वादेशे प्राप्ते-

**"निर्दिश्यमानस्यादेशा भवन्ति"** (प.) **। एकदेशविकृतस्यानन्यत्वाद् जरशब्दस्य जरस् । निर्जरसौ । निर्जरसः । इनादीन् बाधित्वा परत्वाज्जरस् । निर्जरसा । निर्जरसे । निर्जरसः । पक्षे हलादौ च रामवत् ।**

आदेशाः सूत्रे निर्दिष्टस्य शब्दस्वरूपमात्रस्य स्थाने भवन्ति । एकदेशविकृतः शब्दोऽन्यवन्न भवतीत्यर्थकेन "एकदेशविकृतमनन्यवत्" इति न्यायेन निर्जर-शब्दस्थितस्य जरशब्दस्य 'जरा' इति धिया जरसादेशो भवति ।

निर्जर + औ - निर्जरस् + औ - निर्जरसौ । पक्षान्तरे रामवत्- निर्जरौ ।

निर्जर + जस् - निर्जर + अस् - निर्जरस् + अस् - निर्जरसस् - निर्जरसर् - निर्जरसः । पक्षान्तरे- निर्जराः ।

एवंप्रकारेण अमादिष्वप्यजादिषु विभक्तिषु जरसादेशानन्तरं वर्णसम्मेलनमेव कार्यम्, जरसादेशाभावपक्षे, हलादिविभक्तौ च रामवत्प्रक्रिया अवलम्बनीया ।

**"वृत्तिकृता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन, निर्जरसात् इति रुपे, न तु निर्जरसा, निर्जरसः इति केचित्" इत्युक्तम् । तथा भिसि निर्जरसैः इति रुपान्तरमुक्तम् । तदनुसारिभिश्च षष्ठ्येकवचने निर्जरस्य इत्येव रुपमिति स्वीकृतम् । एतच्च भाष्यविरुद्धम् ।**

पदाद्यादेशविधायकं विधिसूत्रम्-

**पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु** ६ । १ । ६३

**पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा । यत्तु 'आसनशब्दस्यासन्नादेशः' इति काशिकायामुक्तं तत्प्रामादिकम् । पादः । पादौ । पादाः । पादम् । पादौ । पदः, पादान् । पदा, पादेनेत्यादि ।**

पाद-दन्त-नासिका-मास-हृदय-निशा-असृज्-यूष-दोष-यकृत्-शकृत्-उदक-आस्य-शब्दानां क्रमेण पद्-दत्-नस्-मास्-हृद्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन्नादेशाः स्युः शसादौ वा ।

पाद + शस् - पाद + अस् - पद् + अस् - पदस् - पदर् - पदः, पदादेशाभावे रामवत्- पादान् । एवं पाद + टा - पाद + आ - पद् + आ - पदा/पादेन । पाद + भ्याम् - पद् + भ्याम् - पद्भ्याम्/पादाभ्याम् । एवं क्रमेण शसादौ विभक्तौ विकल्पेन पदादेशे जाते पादशब्दस्य रूपाणि जायन्ते । पक्षे रामशब्दस्येव ।

सर्वनामस्थानसंज्ञाविधायकं सूत्रम्-

**सुडनपुंसकस्य** १ । १ । ४३

**सुडिति प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ।**

पुंसि स्त्रीलिङ्गे च सु, औ, जस्, अम्, औट् इत्येतेषां पञ्चानां प्रत्ययानां सर्वनामस्थानसंज्ञा भवतीति सूत्रार्थः ।

पदसंज्ञाविधायकं सूत्रम्-

**स्वादिष्वसर्वनामस्थाने** १ । ४ । १७

**कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् ।**

सर्वनामस्थानभिन्नेषु स्वादिविभक्तिभ्यः कप्पार्यन्तिकेषु प्रत्ययेषु परतः पूर्वं पदसंज्ञं भवतीति सरलार्थः । सुप्-प्रत्ययानां सङ्ग्रहकम् 'स्वौजसमौट्... ।४।१।२।' इति सूत्रम् अष्टाध्यायीग्रन्थस्य चतुर्थाध्यायस्य प्रथमपादस्य द्वितीयं सूत्रं वर्तते । तस्मादारभ्य पञ्चमाध्यायस्य चतुर्थपादस्य 'शेषाद्विभाषा ।५।४।१५४।' इति कप्-प्रत्ययविधायकसूत्रपर्यन्तं ये केऽपि प्रत्यया विधीयन्ते, तेषां सर्वेषां ग्रहणमस्मिन् सूत्रे 'स्वादि' इति शब्देन क्रियते । एतेषु स्वादि-प्रत्ययेषु सर्वनामस्थानसंज्ञकान् प्रत्ययान् विहाय अन्येषु प्रत्ययेषु परेषु प्रकृतेः पद-संज्ञा भवति ।

भसंज्ञाविधायकं सूत्रम्-

**यचि भम्** १ । ४ । १८

**यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् ।**

सर्वनामस्थानभिन्नेषु स्वादिविभक्तिभ्यः कप्पार्यन्तिकेषु अजादिषु यकारादिषु च प्रत्ययेषु परतः पूर्वं भसंज्ञं भवतीति सरलार्थः । तथा हि अजादौ विभक्तौ पूर्वस्य युगपद् भपदसंज्ञयोः प्राप्तयोः तद्व्यवस्थापकं सूत्रमाह-

एकस्य एकाया एव संज्ञाया नियामकं सूत्रम्-

**आकडारादेकासंज्ञा १ । ४ । १**

**इत ऊर्ध्वं "कडाराः कर्मधारये २ । २ । ३८" इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या परानवकाशा च ।**

तेन शसादावचि भसंज्ञैव, न पदसंज्ञा । अतः पदान्तत्वनिमित्तं जश्त्वं न । दतः । दता । जश्त्वम्, दद्भ्यामित्यादि । मासः । मासा । भ्यामि रुत्वे यत्वे च यलोपः, माभ्याम् । माभिरित्यादि ।

सूत्रमिदं प्रथमाध्यायस्य चतुर्थपादस्य प्रथमं सूत्रं वर्तते । अस्मात् परं 'कडाराः कर्मधारये ।२।२।३८।' इति सूत्रात् पूर्वमुक्तासु संज्ञासु एकस्य शब्दस्य यदि अनेकाः संज्ञाः प्राप्नुवन्ति चेद् एका एव संज्ञा भवति ।

अधिकारेऽस्मिन् यदि द्वाभ्यां सूत्राभ्याम् एकस्य एव शब्दस्य द्वे संज्ञे उच्येते, तदा या संज्ञा सूत्रसङ्ख्यया परा भवति, या च अवकाशरहिता भवति, सा एव संज्ञा विधातव्या इत्यर्थः । यथा- भ-पदयोः संज्ञयोः एकत्र प्रप्तौ भ-संज्ञा एव विधेया, यतः पदसंज्ञां प्रति भसंज्ञा अनवकाशा वर्तते । अनवकाशत्वं च प्राप्तिस्थलस्य अभावत्वम्, एतद्विपरीतावस्था सावकाश-पदेन व्यवह्रियते । कप्-प्रत्ययावधिषु सर्वनामस्थानभिन्नेषु सर्वेषु अपि स्वादिप्रत्ययेषु परेषु 'स्वादिष्वसर्वनामस्थाने' इत्यनेन प्रकृतेः पदसंज्ञां प्राप्नोति । तत्रैव यकारादिषु, अजादिषु च प्रत्ययेषु परेषु 'यचि भम्' इति भ-संज्ञां प्राप्नोति । यदि यकारादिषु, अजादिषु च प्रत्ययेषु परेषु अपि पदसंज्ञा विधीयते चेद् भ-संज्ञायाः प्राप्तिस्थलम् (अवकाशः) कुत्रापि न भवति । अनेन ज्ञायते यत्- भ-पदयोः भ-संज्ञा अनवकाशा वर्तते । अतः अनयोरेकत्र प्राप्तौ अनवकाशत्वात्, एकसंज्ञाधिकारात् च भ-संज्ञा एव विधेया । कृतायां भ-संज्ञायामपि असर्वनामस्थानेषु यकारभिन्नेषु हलादिषु स्वादिप्रत्ययेषु परेषु पद-संज्ञाया अवकाशो विद्यते एव, अतः अत्र पद-संज्ञा सावकाशो वर्तते । यत्र च द्वयोः सावकाशयोः संज्ञयोर्मध्ये विरोधो भवति, तत्र सूत्रसङ्ख्यया परा संज्ञा वलबती भवतीति स्मर्तव्यम् ।

### पुंनपुंसकलिङ्गयोः प्रकृतेर्भपदसंज्ञानिर्देशिका सारिणी

| भसंज्ञा | | पदसंज्ञा |
|---|---|---|
| शस् (अस्), | टा (आ), ङे (ए), | भ्याम्, भिस्, भ्यस्, सुप् |
| ङसि (अस्), | ङस् (अस्), ओस्, आम्, ङि (इ), ओस् | |

दन्तः । दन्तौ । दन्ताः । दन्तम् । दन्तौ । दन्त + शस् - दन्त + अस् - दत् + अस् (पदन्नो-) - दतस् - दतर् - दतः/दन्तान् । दन्त + टा - दन्त + आ - दत् + आ - दता/दन्तेन । दन्त + भ्याम् - दत् + भ्याम् (पदन्नो-) - दद् + भ्याम् (झलां जशोऽने) - दद्भ्याम्/दन्ताभ्याम् । हलादौ विभक्तौ "स्वादिष्वसर्वनामस्थाने" इति पदत्वेन "झलां जशोऽन्ते" इति तकारस्य जश्त्वेन दकारादेशः । एवंप्रकारेण दन्तशब्दस्य ददादेशपक्षेऽभावपक्षे च रूपाणां सिद्धिप्रक्रिया ज्ञेया ।

मासः । मासौ । मासाः । मासम् । मासौ । मास + शस् - मास + अस् - मास् + अस् (पदन्नो-) - मासस् - मासर् मासः/मासान् । मास + टा - मास + आ - मास् + आ - मासा/मासेन । मास + भ्याम् - मास् + भ्याम् - मार् + भ्याम् (ससजुषो रुः) - माय् + भ्याम् (भोभगोअघोअपूर्वस्या योऽशि) - माभ्याम् (हलि सर्वेषाम्)/मासाभ्याम् । मास + भिस् - मास् + भिस् - मार् + भिस् - माय् + भिस् - माभिस् - माभिः/मासैः । एवं रीत्यान्यासु विभक्तिष्वपि रूपाणि ऊह्यानि ।

यूषः । यूषौ । यूषाः । यूषम् । यूषौ ।

अधिकारसूत्रम्-

**भस्य ६ । ४ । १२९**

**इत्यधिकृत्य ।**

अकारलोपविधायकं विधिसूत्रम्-

**अल्लोपोऽनः ६ । ४ । १३४**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात् ।**

सर्वनामस्थानभिन्ने यकारादौ, अजादौ च स्वादिप्रत्यये परे सति भसंज्ञकस्याङ्गस्यान्ते स्थितस्य 'अन्' इत्यस्य अकारस्य लोपो भवति ।

णत्वविधायकं विधिसूत्रम्-

**रषाभ्यां नो णः समानपदे ८ । ४ । १**

**एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् । यूष्णः । यूष्णा ।**

यूष + शस् - यूष + अस् - यूषन् + अस् (पदन्नो-) - यूष्न् + अस् (अल्लोपोऽनः) - यूष्नस् - यूष्णस् (रषाभ्यां नो णः समानपदे) - यूष्णर् - यूष्णः/यूषान् । यूष + टा - यूष + आ - यूषन् + आ - यूष्न् + आ - यूष्ना - यूष्णा/यूषेण ।

**पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अड्व्यवाय इत्येवात्र णत्वम् । "पूर्वत्रासिद्धे न स्थानिवत्" (वा.) इति तु इह नास्ति । ''तस्य दोषः संयोगादिलोपलत्वणत्वेषु" इति निषेधात् ।**

यूष्णः, यूष्णेत्यादावल्लोपस्य "अचः परस्मिन् पूर्वविधौ" इति सूत्रेण स्थानिवद्भावान्नकारस्य षात्परत्वं नेति न शङ्क्यम्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्यैव विधौ तत्प्रवृत्तेः । इह चाल्लोपस्थानिभूतादकारात्परस्यैव णत्वविधानादिति भावः । नन्वचः परस्मिन्निति सूत्रे स्थानिभूतादचः पूर्वस्मात्परस्य विधावजादेशः स्थानिवदिति पक्षोऽपि भाष्ये स्थितः । एवञ्चात्र लोपादेशस्थानिभूतादकारात्पूर्वो यः षकारस्तस्मात्परस्य नकारस्य णत्वविधौ लोपस्य स्थानिवद्भावे सत्यकारेण व्यवधानात्षात्परत्वाऽभावात्कथं णत्वमित्यत आह- पूर्वस्मादिति । "अचः परस्मिन् पूर्वविधौ" इत्यत्र पञ्चमीसमासपक्षे तु यूष्णः, युष्णा इत्यादिषु प्रयोगेषु अड्व्यवाये इत्येव णत्वं भवतीति बोध्यम् । पक्षे त्वित्यादिनाऽस्य पक्षस्याऽनित्यत्वं सूचितम् ।

नकारलोपविधायकं विधिसूत्रम्-

**न लोपः प्रातिपदिकान्तस्य ८ । २ । ७**

**नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे ।**

**प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात् । पूर्वत्रासिद्धमिति नलोपस्यासिद्धत्वाद्दीर्घ ऐस्त्वमेत्वं च न । यूषभ्याम् । यूषभिः । यूषभ्य इत्यादि ।**

यूष-शब्दाद् भ्यामि "पदन्नो-" इति यूषन् इत्यादेशे 'यूषन् + भ्याम्', "स्वादिष्वसर्वनामस्थाने" इति पदसंज्ञायामनेन सूत्रेण नकारस्य लोपे 'यूष + भ्याम्' इत्यत्र "पूर्वत्रासिद्धम्" इति नलोपस्यासिद्धत्वात् "सुपि च" इति अकारस्य दीर्घो न भवति, तेन 'यूषभ्याम्' इति रूपम् । एवं नलोपस्यासिद्धत्वाद् भिस ऐसादेशाभावे 'यूषभिः' इति । एवमेव भ्यसादावपि नलोपस्यासिद्धत्वेन "बहुवचने झल्येत्" इति एत्वस्याप्राप्तिर्बोध्या ।

विभाषया अनोऽकारस्य लोपविधायकं विधिसूत्रम्-

**विभाषा ङिश्योः ६ । ४ । १३६**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरोयोऽन् तस्याकारस्य लोपो वा स्याद् ङिश्योः परयोः । यूष्णि, यूषणि । पक्षे रामवत् । "पद्दन्नो-" इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम् । तथा च औङः श्यामपि दोषन्नादेशः । अत एव भाष्ये 'ककुद्दोषणी' इत्युदाहृतः । तेन 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' 'स्वान्तं हृन्मानसं मनः' इत्यादि च संगच्छते । 'आसन्यं प्राणमूचुः' इति च । आस्ये भवः आसन्यः । दोष्शब्दस्य नपुंसकत्वमप्यत एव भाष्यात् । तेन 'दक्षिणं दोर्निशाचरः' इति संगच्छते । 'भुजबाहू प्रवेष्टो दोः' इति साहचर्यात्पुंस्त्वमपि । 'दोषं तस्य तथाविधस्य भजतः' इति । द्वयोरन्होर्भवो, द्व्यन्हः ।**

अनेन सूत्रेण ङौ "अल्लोपोऽनः" इति नित्यं बाधित्वा विकल्पेनाकारस्य लोपेन यूषन्नादेशपक्षेऽपि रूपद्वयम् । यूष + ङि - यूष + इ - यूषन् + इ (पदन्नो-) - यूष्न् + इ (विभाषा ङिश्योः) - यूष्नि - यूष्णि (रषाभ्यां नो णः समानपदे), अलोपाभावे- यूषणि, यूषनादेशाभावे- यूषे ।

विभाषया अहनादेशविधायकं विधिसूत्रम्-

**संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ६ । ३ । ११०**

**संख्यादिपूर्वस्याह्नस्याहन्नादेशो वा स्यान् ङौ । द्व्यह्नि, द्व्यहनि, द्व्यह्ने । विगतमहर्व्यह्नः । व्यह्नि, व्यहनि, व्यह्ने । अह्नः सायः सायाह्नः । सायाह्नि, सायाहनि, सायाह्ने । इत्यदन्ताः ।**

संख्यावाचकशब्दपूर्वकस्य विशब्दपूर्वकस्य सायशब्दपूर्वकस्य च अह्न-शब्दस्य स्थानेऽहनादेशो विभाषया भवति ङौ परे सति ।

'द्वयोरह्नोर्भवः' इत्यर्थे निष्पन्नाद् द्व्यह्न-प्रातिपदिकाद् ङौ विभक्तौ 'द्व्यह्न + इ' इत्यवस्थायामनेन सूत्रेण विकल्पेन 'अहन्' इत्यादेशे 'द्व्यहन् + इ' इति जाते भसंज्ञायां "विभाषा ङिश्योः" इति वैकल्पिकेऽकारलोपे- द्व्यह्नि, अकारलोपाभावे- द्व्यहनि, अहन्नादेशाभावे रामवद्- द्व्यह्ने इति त्रीणि रूपाणि । एवमेव प्रक्रिया व्यह्न-शब्दे, सायाह्न-शब्दे च ज्ञेया । ङावेव विशेषः, शेषरूपाणि रामवत् ।

अदन्तपुँल्लिङ्गशब्दानां रूपसिद्धिप्रक्रिया समाप्ता । अथ आकारान्तपुँल्लिङ्गशब्दानां रूपसिद्धिरारभ्यते-

## विश्वपाः

विश्वं पातीति विग्रहे कृत्प्रत्ययेन निष्पन्नो विश्वपाशब्दः, तस्य "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञायां सौ, सकारस्य रुत्वे विसर्गे- विश्वपाः । औविभक्तौ-

पूर्वसवर्णदीर्घनिषेधकं विधिसूत्रम्-

**दीर्घाज्जसि च ६ । १ । १०५**

**दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात् । वृद्धिः । विश्वपौ । सवर्णदीर्घः । विश्वपाः । यद्यपीह औङि "नादिचि" इत्येव सिद्धम् । जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि 'गौर्यौ' 'गौर्यः' इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् ।**

दीर्घवर्णात् प्रथमा-द्वितीयाविभक्तिसम्बन्धिनि इच्-प्रत्याहारस्थे वर्णे परे, जस्-प्रत्यये परे च पूर्वसवर्णदीर्घो न भवति ।

'विश्वपा + औ' इत्यवस्थायां "प्रथमयोः पूर्वसवर्णः" इति प्राप्तस्य पूर्वसवर्णदीर्घस्य प्रकृतसूत्रेण निषेधे "वृद्धिरेचि" इति पूर्वपरयोर्वृद्धिरेकादेशो विधीयते, तेन 'विश्वपौ' इति सिद्ध्यति । जस्-प्रत्यये चानेन पूर्वसवर्णदीर्घ-निषेधे सवर्णदीर्घो भवति । सम्बोधनेऽपि प्रथमावत् प्रक्रिया प्रवर्तते । अम्-प्रत्यये "अमि पूर्वः" इति पूर्वरूपे- विश्वपाम् । शसि 'विश्वपा + अस्' इत्यवस्थायां प्रकृतेर्भसंज्ञायाम्-

आकारलोपविधायकं विधिसूत्रम्-

**आतो धातोः ६ । ४ । १४०**

**आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात् । "अलोऽन्त्यस्य" । विश्वपः । विश्वपा । विश्वपाभ्यामित्यादि । एवं शङ्खध्मादयः । धातोः किम् ? हाहान् । टा सवर्णदीर्घः, हाहा । ङे वृद्धिः, हाहै । ङसिङसोर्दीर्घः, हाहाः । ओसि वृद्धिः, हाहौः । ङौ "आद् गुणः" हाहे । शेषं विश्वपावत् । 'आतः' इति योगविभागादधातोरप्याकारलोपः क्वचित् । क्त्वः । श्नः । इत्यादन्ताः ।**

अनेन सूत्रेण अलोऽन्त्यपरिभाषया भ-संज्ञकस्याङ्गस्य 'विश्वपा' इत्यस्यान्त्यस्य आकारस्य लोपे 'विश्वप् + अस्' इति जाते, वर्णयोगे, सकारस्य रुत्वे विसर्गे च 'विश्वपः' इति सिद्ध्यति । एवमेव टादिष्वपि अजादिविभक्तिषु भत्वेन आकारलोप एव विशेषं कार्यम्, तेन प्राप्तस्य 'विश्वप्' इति स्वरूपस्य प्रत्ययेन सह मेलनम्, सान्तप्रत्ययेषु रुत्वविसर्गौ चेत्येव सिद्धिप्रक्रिया ज्ञेया । हलादिविभक्तिषु प्राप्तायामपि पदसंज्ञायां फलाभावात् संज्ञा न करणीया, विभक्तियोजनेनैव रूपाणि सिद्ध्यन्ति । यथा- विश्वपा + भ्याम् - विश्वपाभ्याम् । विश्वपा + भिस् - विश्वपाभिः । विश्वपा + भ्यस् - विश्वपाभ्यः । विश्वपा + सुप् - विश्वपासु । एवमेव आकारान्तधात्वन्तानां शङ्खध्मा-सोमपा-कीलालपा-मधुपादिशब्दानां रूपाणि जायन्ते । हाहा-शब्दस्य तु आकारान्तत्वेऽपि धातोरभावादनेन आकारलोपाभावे पृथक् प्रक्रिया-

हाहाः । हाहौ । हाहाः (सवर्णदीर्घः) । हाहाम् (पूर्वरूपम्) । हाहौ । हाहान् (पूर्वसवर्णदीर्घः, नत्वम्) । हाहा (सवर्णदीर्घः) । हाहाभ्याम् । हाहाभिः । हाहै (वृद्धिः) । हाहाभ्यः । हाहाः (ङसिङसोः सवर्णदीर्घः) । हाहौः (ओसि वृद्धिः) । हाहाम् (आमि सवर्णदीर्घः) । हाहे (ङौ गुणः) ।

सूत्रेऽस्मिन् 'आतः' इति योगं विभज्य क्वचिदधातोरप्याकारलोपः क्रियते । तेन "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति सूत्रे क्त्वा-शब्दस्य 'क्त्वः' इति "हलः श्नः शानज्झौ" इति सूत्रे श्ना-शब्दस्य 'श्नः' इति च षष्ठ्येकवचनरूपस्य निर्देशनं संगच्छते ।

क्त्वा + ङस् - क्त्वा + अस् - क्त्व् + अस् (आतो धातोः) - क्त्वस् - क्त्वर् - क्त्वः । श्ना + ङस् - श्ना + अस् - श्न् + अस् - श्नस् - श्नर् - श्नः ।

| निर्जरशब्दस्य रूपावलिः | | |
|---|---|---|
| निर्जरः | निर्जरसौ / निर्जरौ | निर्जरसः / निर्जराः |
| निर्जरसम् / निर्जरम् | निर्जरसौ / निर्जरौ | निर्जरसः / निर्जरान् |
| निर्जरसा / निर्जरेण | निर्जराभ्याम् | निर्जरैः |
| निर्जरसे / निर्जराय | निर्जराभ्याम् | निर्जरेभ्यः |
| निर्जरसः / निर्जरात्-द् | निर्जराभ्याम् | निर्जरेभ्यः |
| निर्जरसः / निर्जरस्य | निर्जरसोः / निर्जरयोः | निर्जरसाम् / निर्जराणाम् |
| निर्जरसि / निर्जरे | निर्जरसोः / निर्जरयोः | निर्जरेषु |
| हे निर्जर ! | हे निर्जरसौ / हे निर्जरौ | हे निर्जरसः / हे निर्जराः |

| पादशब्दस्य रूपावलिः | | |
|---|---|---|
| पादः | पादौ | पादाः |
| पादम् | पादौ | पदः / पादान् |
| पदा / पादेन | पद्भ्याम् / पादाभ्याम् | पद्भिः / पादैः |
| पदे / पादाय | पद्भ्याम् / पादाभ्याम् | पद्भ्यः / पादेभ्यः |
| पदः / पादात्-द् | पद्भ्याम् / पादाभ्याम् | पद्भ्यः / पादेभ्यः |
| पदः / पादस्य | पदोः / पादयोः | पदाम् / पादानाम् |
| पदि / पादे | पदोः / पादयोः | पत्सु / पादेषु |
| हे पाद ! | हे पादौ ! | हे पादाः ! |

| विश्वपाशब्दस्य रूपावलिः | | |
|---|---|---|
| विश्वपाः | विश्वपौ | विश्वपाः |
| विश्वपाम् | विश्वपौ | विश्वपः |
| विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| विश्वपे | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपोः | विश्वपाम् |
| विश्वपि | विश्वपोः | विश्वपासु |
| हे विश्वपाः ! | हे विश्वपौ ! | हे विश्वपाः ! |

| मासशब्दस्य रूपावलिः | | |
|---|---|---|
| मासः | मासौ | मासाः |
| मासम् | मासौ | मासः/मासान् |
| मासा/मासेन | माभ्याम्/मासाभ्याम् | माभिः/मासैः |
| मासे/मासाय | माभ्याम्/मासाभ्याम् | माभ्यः/मासेभ्यः |
| मासः/मासात्-द् | माभ्याम्/मासाभ्याम् | माभ्यः/मासेभ्यः |
| मासः/मासस्य | मासोः/मासयोः | मासाम्/मासानाम् |
| मासि/मासे | मासोः/मासयोः | मास्सु/मासेषु |
| हे मास ! | हे मासौ ! | हे मासाः ! |

## प्रयोगसिद्धिप्रकारः

### निर्जरसौ

निर्जर-शब्दस्य व्युत्पन्नतया "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायाम् "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'निर्जर + औ' इति जाते "जराया जरसन्यतरस्याम्" इति सूत्रेण निर्जर-शब्दस्य 'जर'भागस्य स्थाने विकल्पेन जरसादेशे 'निर्जरस् + औ' इति जाते, वर्णसम्मेलने 'निर्जरसौ' इति रूपं सिद्धम् । जरसादेशाभावपक्षे, 'निर्जर + औ' इत्यवस्थायां वृद्धिं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, तस्य च "नादिचि" इत्यनेन निषेधे, बाधकाभावे पुनर्वृद्धौ, वर्णयोगे 'निर्जरौ' इत्यपि सिद्ध्यति ।

## निर्जरसः/निर्जरान्

निर्जरशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ शकारस्य "लशक्वतद्धिते" इति सूत्रेण इत्संज्ञायां "तस्य लोपः" इति सूत्रेण लोपे 'निर्जर + अस्' इत्यत्र "जराया जरसन्यतरस्याम्" इति सूत्रेण विकल्पेन जरसादेशे वर्णसम्मेलने 'निर्जरसस्' इति जाते सकारस्य "ससजुषो रुः" इत्यनेन रुत्वेऽनुबन्धलोपे "खरवसानयोर्विसर्जनीयः" इत्यनेन रेफस्य विसर्गे 'निर्जरसः' इति रूपम्, विकल्पेन जरसादेशाभावपक्षे 'निर्जर + अस्' इत्यवस्थायां "प्रथमयोः पूर्वसवर्णः" इति सूत्रेण पूर्वसवर्णदीर्घे 'निर्जरास्' इति जाते "तस्माच्छसो नः पुंसि" इत्यनेन सकारस्य नकारादेशे 'निर्जरान्' इति रूपद्वयं सिद्धम् ।

## माभ्याम्/मासाभ्याम्

मासशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया द्विवचने भ्याम्विभक्तौ 'मास + भ्याम्' इत्यत्र "पद्दन्नोमास्-" इति सूत्रेण विकल्पेन मासशब्दस्य 'मास्' इत्यादेशे 'मास् + भ्याम्' इति जाते "स्वादिष्वसर्वनामस्थाने" इत्यनेन प्रकृतेः पदसंज्ञायां "ससजुषो रुः" इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'मार् + भ्याम्' इति जाते "भो-भगो-अघो-अपूर्वस्य योऽशि" इत्यनेन रेफस्य यकारादेशे 'माय् + भ्याम्' इति जाते "हलि सर्वेषाम्" इति सूत्रेण यकारस्य लोपे 'माभ्याम्' इति रूपम्, 'मास्' इत्यादेशाभावपक्षे 'मास + भ्याम्' इत्यवस्थायां "सुपि च" इत्यनेन दीर्घे 'मासाभ्याम्' इति रूपद्वयं सिद्धम् ।

## विश्वपः

विश्वपाशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तौ शकारस्य "लशक्वतद्धिते" इति सूत्रेण इत्संज्ञायां "तस्य लोपः" इति सूत्रेण लोपे 'विश्वपा + अस्' इत्यत्र "यचि भम्" इत्यनेन विश्वपाशब्दस्य भसंज्ञायाम् "आतो धातोः" इति सूत्रेण आकारस्य लोपे वर्णयोगे 'विश्वपस्' इत्यवस्थायां सकारस्य "ससजुषो रुः" इत्यनेन रुत्वेऽनुबन्धलोपे "खरवसानयोर्विसर्जनीयः" इत्यनेन रेफस्य विसर्गे 'विश्वपः' इति रूपं सिद्धम् ।

# अभ्यासः

## १. निम्नाङ्कितसूत्राणां संस्कृते सरलार्थं लिखत

(क) जराया जरसन्यतरस्याम्

(ख) स्वादिष्वसर्वनामस्थाने

(ग) यचि भम्

(घ) अल्लोपोऽनः

(ङ) न लोपः प्रातिपदिकान्तस्य ।

## २. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत

(क) 'सुट्' इत्यस्मिन् ..................... प्रत्ययाः समायान्ति । (त्रयः, पञ्च)

(ख) भ-पदसंज्ञयोरेकत्रप्राप्तौ ..................... विधीयते । (भसंज्ञा, पदसंज्ञा)

(ग) नपुंसकलिङ्गे स्वादि-पञ्चप्रत्ययाः सर्वनामस्थानसंज्ञकाः ..................... । (भवन्ति, न भवन्ति)

(घ) एकसंज्ञाधिकारे ....................., अनवकाशा च संज्ञा विधीयते । (पूर्वा, परा)

(ङ) जरा-शब्दस्य जरसादेशो ..................... विभक्तौ भवति । (अजादौ, हलादौ)

## ३. अर्थं लिखत

(क) पदाङ्गाधिकारे तस्य च तदन्तस्य च ।

(ख) निर्दिश्यमानस्यादेशा भवन्ति ।

(ग) एकदेशविकृतमनन्यवत् ।

(घ) या पराऽनवकाशा च सा एव संज्ञा ।

## ४. एकवाक्येन उत्तरं लिखत

(क) भ-संज्ञा केन सूत्रेण विधीयते ?

(ख) विश्वपा-शब्दस्य चतुर्थ्येकवचने किं रूपम् ?

(ग) 'विश्वपाम्' इत्यत्र आकारलोपविधायकं सूत्रं किम् ?

(घ) 'आ कडारादेका संज्ञा' इति सूत्रं किं करोति ?

(ङ) 'निर्जरसि' इत्यत्र का विभक्तिरस्ति ?

## ५. प्रश्नानामुत्तरं लिखत

(क) 'सर्वनामस्थानम्' इति पदेन कुत्र कुत्र केषां बोधो भवति ?

(ख) पुंलिङ्गे भसंज्ञाया निमित्तविभक्तयः काः ?

(ग) कासु विभक्तिषु प्रकृतेः पदसंज्ञां भवति ?

(घ) भ-पदयोः संज्ञयोरेकत्र प्राप्तौ कुत्र का संज्ञा विधीयते ?

(ङ) निर्जर-शब्दस्य कासु विभक्तिषु वैकल्पिकरूपाणि जायन्ते ?

(च) निर्जरशब्दे 'जरा' इत्यस्याभावात् "जराया जरसन्यतरस्याम्" इत्यनेन जरसादेशः कथम् ?

(छ) कासु विभक्तिषु परासु प्रकृतेः पदसंज्ञा, कासु च भसंज्ञेति सारिण्यां दर्शयत ।

(ज) 'विश्वपा + आ' इत्यत्र भपदसंज्ञयोरेकत्र प्राप्तौ भसंज्ञानियामकं सूत्रं किम् ?

(झ) कुत आरभ्य पादादीनां विकल्पेन पदादय आदेशाः प्रवर्तन्ते ?

## ३. परस्परं मेलयत

| | |
|---|---|
| माभिः | जरसादेशः |
| विश्वपोः | नलोपः |
| निर्जरसि | आलोपः |
| यूषभ्याम् | सु, औ, जस्, अम्, औट् |
| सुट् | यलोपः |

## ४. निम्नाङ्कितानां रूपावलीर्निर्दिशत

सोमपा, हाहा, दन्त, हृदय ।

## ५. अधो लिखितानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां लिखत

निर्जरसा/निर्जरेण । माभ्यः/मासेभ्यः । विश्वपे । हाहौ ।

त्रयोविंशः पाठः

# इकारान्तशब्दस्य रूपसिद्धिप्रक्रिया

अथ इकारान्तपुँल्लिङ्गप्रातिपदिकानां निरूपणमारभ्यते-

**हरिः । “प्रथमयोः पूर्वसवर्णः” । हरी ।**

इकारान्त-पुंलिङ्गस्य हरि-शब्दस्य ‘हरति इति हरिः’ इत्यर्थे स्वीकरणे व्युत्पत्तिपक्षे, कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुक्ते च अव्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । हरि-प्रातिपदिकात् सु-प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वे विसर्गे ‘हरिः’ इति रूपं जायते । औ-प्रत्यये ‘हरि + औ’ इत्यवस्थायां यणं बाधित्वा “प्रथमयोः पूर्वसवर्णः” इत्यनेन पूर्वसवर्णदीर्घे, इकार-औकारयोः स्थाने ईकार एकादेशे ‘हर् + ई’ इति जाते, वर्णयोगे ‘हरी’ इति रूपं सिद्ध्यति । जसि तु विशेषमाह-

गुणविधायकं विधिसूत्रम्-

**जसि च** ७ । ३ । १०७

**ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे । हरयः ।**

जस्-प्रत्यये परे सति ह्रस्व-वर्णान्तस्य अङ्गस्यान्त्यवर्णस्य स्थाने गुणसंज्ञको वर्ण आदिश्यते । पूर्वसवर्णदीर्घं बाधित्वा अनेन गुणादेशो विधीयते । “आद् गुणः” इत्यनेन विहितो गुणः पूर्वपरयोः स्थाने एकादेशः, परन्तु अनेन विहितः केवलमेकस्य स्थानिनः स्थाने गुणादेश इति स्मर्तव्यम् । आन्तरतम्याद् इकारस्य एकारः, उकारस्य च ओकारः । ह्रस्ववर्णेषु अकार-ऋकार-लृकारान्तेषु अङ्गेषु तु अस्य सूत्रस्य प्रसक्तिर्नास्ति ।

हरि + जस् - हरि + अस्, इत्यवस्थायां पूर्वसवर्णदीर्घं बाधित्वाऽनेन सूत्रेण अङ्गान्त्यस्य इकारस्य गुणे, आन्तरतम्याद् एकारे ‘हरे + अस्’ इति जाते, एकारस्य अयादेशे- हर् अय् + अस् - हरयस् - हरयर् - हरयः । सम्बोधनैकवचने ‘हरि + स्’ इत्यवस्थायां प्रकृतेरङ्गसंज्ञायाम्, प्रत्ययस्य च सम्बुद्धिसंज्ञायाम्-

गुणविधायकं विधिसूत्रम्-

**ह्रस्वस्य गुणः** ७ । ३ । १०८

**ह्रस्वस्य गुणः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः ।**

सम्बुद्धिसंज्ञके प्रत्यये परे सति ह्रस्ववर्णान्तस्य अङ्गस्यान्त्यवर्णस्य स्थाने गुणादेशो भवति । सम्बोधनस्य एकवचने अनेन गुणे कृते इकारान्ता अङ्गा एकारान्तत्वं प्राप्नुवन्ति, उकारान्ताश्च ओकारान्तत्वम् । ततः ‘एङ्ह्रस्वात् सम्बुद्धेः’ इत्यनेन सम्बुद्धिसंज्ञकस्य सकारस्य लुक् ।

हरि + सु - हरि + स् - हरे + स् (ह्रस्वस्य गुणः) - हरे (एङ्ह्रस्वात् सम्बुद्धेः) - हे हरे । हरि + अम् - हरिम् (अमि पूर्वः) । शस्-प्रत्यये पूर्वसवर्णदीर्घः, सकारस्य नत्वमित्यादि रामशब्दवदेव प्रक्रिया- हरि + शस् - हरि + अस् - हरीस् (प्रथमयोः-) - हरीन् (तस्माच्छसो नः पुंसि) ।

तृतीयैकवचने 'हरि + आ' इति स्थिते घिकार्यं वक्ष्यन् घिसंज्ञामाह-

घिसंज्ञाविधायकं सूत्रम्-

**शेषो घ्यसखि १ । ४ । ७**

**अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् । शेषः किम् ? मत्यै । एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थम् । ह्रस्वौ किम् ? वातप्रम्ये । यू किम् ? मात्रे ।**

"यूस्त्र्याख्यौ-" इत्यतो यू इत्यनुवर्तते । इश्च उश्च यूः, इवर्णश्च उवर्णश्चेत्यर्थः । "ङिति ह्रस्वश्च" इत्यतो ह्रस्व इत्यनुवर्तते । तच्च यूभ्यां प्रत्येकमन्वेति । उक्तान्नदीसंज्ञकादन्यः शेषः, स च यूभ्यां प्रत्येकमन्वेति । शब्दस्वरूपमित्यध्याहार्यं यूभ्यां विशेष्यते । तदन्तविधिः । तथा च- सखि-शब्दं विहाय नदीसंज्ञकभिन्नानामिकारान्तानाम्, उकारान्तानां च शब्दानां घि-संज्ञा भवतीति सूत्रार्थः । केवलं 'सखि'शब्दस्य एव घिसंज्ञा न भवति, सुसखि, राजसखि, प्रियसखि इत्यादीनां सखि-शब्दान्तशब्दानां त्वनेन सूत्रेण घिसंज्ञा भवत्येव इति स्मर्तव्यम् ।

नादेशविधायकं विधिसूत्रम्-

**आङो नाऽस्त्रियाम् ७ । ३ । १२०**

**घेः परस्य आङो ना स्यादस्त्रियाम् । आङिति टासंज्ञा प्राचाम् । हरिणा । अस्त्रियां किम् ? मत्या ।**

स्त्रीलिङ्गभिन्नाद् घिसंज्ञकादङ्गात् परस्य टा-प्रत्ययस्य स्थाने 'ना' इति आदेशो भवति । सूत्रेऽस्मिन् आगतः 'आङ्' इति शब्दस्तृतीयैकवचनस्य 'टा' इत्यस्य एव अपरं नाम वर्तते । पाणिनिपूर्वाचार्यैस्तृतीयैकवचने 'आङ्' इति प्रत्ययस्य उल्लेखः कृतः ।सूत्रेऽस्मिन् 'अस्त्रियाम्' इति निर्देशात् स्त्रीलिङ्गेऽस्य विधेः प्रसक्तिर्नास्ति, तेन 'मत्या' इत्यत्र सत्यामपि घिसंज्ञायां नादेशो न, मतिशब्दस्य स्त्रीलिङ्गे वर्तमानत्वात् । हरि + टा - हरि + आ - हरि + ना (आङो नाऽस्त्रियाम्) - हरिना - हरिणा (अट्कुप्वाङ्नुम्व्यवायेऽपि) ।

भ्यामादिषु हलादिप्रत्ययेषु हरि + भ्याम् - हरिभ्याम् । हरि + भिस् - हरिभिस् - हरिभिर् - हरिभिः । चतुर्थ्येकवचने 'हरि + ए' इत्यवस्थायामङ्गस्य घिसंज्ञायाम्-

गुणादेशविधायकं विधिसूत्रम्-

**घेर्ङिति ७ । ३ । १११**

**घिसंज्ञकस्य ङिति सुपि गुणः स्यात् । हरये ।**

घेः किम् ? सख्ये । ङिति किम् ? हरिभ्याम् । सुपि किम् ? पट्वी । "घेर्ङिति" इति गुणे कृते-

सुप्-सम्बन्धिनि ङित्-प्रत्यये परे घि-संज्ञकस्याङ्गस्य अन्त्यवर्णस्य स्थाने गुणसंज्ञक आदेशो भवति ।

अनेन सूत्रेण इकारस्य गुणे एकारे, तस्य च "एचोऽयवायावः" इति अयादेशः । हरि + ङे - हरि + ए - हरे + ए - हर् अय् + ए - हरये । हरिभ्याम् । हरिभ्यः ।

पञ्चम्येकवचने- हरि + ङसि - हरि + अस्, इत्यत्र घिसंज्ञायां "घेर्ङिति' इति गुणे 'हरे + अस्' इत्यवस्थायाम्-

पूर्वरूपैकादेशविधायकं विधिसूत्रम्-

**ङसिङसोश्च ६ । १ । ११०**

**एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् । हरेः । हर्योः । हरीणाम् ।**

एकाराद् ओकाराच्च ङसिप्रत्ययस्य, ङस्प्रत्ययस्य च अकारे परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । हरि + ङसि/ङस् - हरि + अस् - हरे + अस् (घेर्ङिति) - हरेस् (ङसिङसोश्च) - हरेर् - हरेः ।

षष्ठी-सप्तम्योर्द्विवचने ओस्-प्रत्यये तु सन्धिकार्यमेव- हरि + ओस् - हर् य् + ओस् (इको यणचि) - हर्योस् - हर्योर् - हर्योः । षष्ठीबहुवचने रामवदेव प्रक्रिया- हरि + आम् - हरि + नाम् (ह्रस्वनद्यापो नुट्) - हरीनाम् (नामि) - हरीणाम् (अट्कुप्वाङ्-) ।

सप्तम्येकवचने ङौ 'हरि + इ' इत्यवस्थायां घिसंज्ञायां "घेर्ङिति" इति गुणे प्राप्ते-

ङेरौद् घेरच्चेत्यादेशयोर्विधायकं विधिसूत्रम्-

**अच्च घेः ७ । ३ । ११९**

**इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः । वृद्धिः । हरौ । हर्योः । हरिषु । एवं श्रीपत्यग्निरविकव्यादयः ।**

इकारान्तादुकारान्ताच्चाङ्गात् परस्य ङि-प्रत्ययस्य स्थाने औकारादेशो भवति, घि-संज्ञकस्याङ्गस्य अन्तिमवर्णस्य स्थानेऽकारादेशश्च भवतीति सूत्रार्थः । गुणं बाधित्वाऽनेन प्रत्ययस्य स्थाने औकारे, प्रकृतेरकारान्तादेशे च कृते "वृद्धिरेचि" इति वृद्धौ 'हरौ' इति रूपम् । हरि + ङि - हरि + इ - हर + औ (अच्च घेः) - हर् + औ (वृद्धिरेचि) - हरौ ।

सप्तमीबहुवचने सुपि "आदेशप्रत्यययोः" इति सकारस्य षत्वे- हरिषु । एवं प्रकारेण सखि-पति-कति-द्वि-त्रि-शब्दभिन्नानां श्रीपति, अग्नि, रवि, कवि इत्यादीनामिकारान्तपुंलिङ्गप्रातिपदिकानां रूपाणि निष्पद्यन्ते ।

| हरि-शब्दस्य रूपावलिः | | |
|---|---|---|
| हरिः | हरी | हरयः |
| हरिम् | हरी | हरीन् |
| हरिणा | हरिभ्याम् | हरिभिः |
| हरये | हरिभ्याम् | हरिभ्यः |
| हरेः | हरिभ्याम् | हरिभ्यः |
| हरेः | हर्योः | हरीणाम् |
| हरौ | हर्योः | हरिषु |
| हे हरे | हे हरी | हे हरयः |

## प्रयोगसिद्धिप्रकारः

### हरयः

हरि-शब्दस्य अव्युत्पत्तिपक्षे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तौ "चुटू" इत्यनेन जकारस्य इत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे 'हरि + अस्' इति जातेऽङ्गसंज्ञायां "जसि च" इत्यनेन गुणे 'हरे + अस्' इति जाते "एचोऽयवायावः" इत्यनेन अयादेशे वर्णयोगे 'हरयस्' इति जाते सकारस्य "ससजुषो रुः" इत्यनेन रुत्वेऽनुबन्धलोपे रेफस्य "खरवसानयोर्विसर्जनीयः" इत्यनेन विसर्गे 'हरयः' इति रूपं सिद्धम् ।

### हरेः

हरि-शब्दस्य अव्युत्पत्तिपक्षे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण पञ्चम्या एकवचने ङसिविभक्तौ ङकारस्य "लशक्वतद्धिते" इति सूत्रेणेत्सञ्ज्ञायाम्, इकारस्य "उपदेशेऽजनुनासिक इत्" इतीत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे 'हरि + अस्' इत्यवस्थायां "शेषो घ्यसखि" इत्यनेन प्रकृतेर्घिसंज्ञायां "घेर्ङिति" इति सूत्रेण गुणे 'हरे + अस्' इति जाते "ङसिङसोश्च" इति सूत्रेण पूर्वरूपैकादेशे 'हरेस्' इति जाते "ससजुषो रुः" इति सकारस्य रुत्वेऽनुबन्धलोपे रेफस्य "खरवसानयोर्विसर्जनीयः" इति सूत्रेण विसर्गे 'हरेः' इति रूपं सिद्धम् ।

### हरौ

हरि-शब्दस्य अव्युत्पन्नपक्षे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इत्यादिना सूत्रेण सप्तम्या एकवचने ङि-प्रत्ययेऽनुबन्धलोपे 'हरि + इ' इति जाते "शेषो घ्यसखि" इति सूत्रेण प्रकृतेर्घिसंज्ञायां "घेर्ङिति" इत्यनेन अङ्गस्य गुणे प्राप्ते तं बाधित्वा "अच्च घेः" इति सूत्रेण प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्याङ्गस्य च अकारान्तादेशे कृते 'हर + औ' इति जाते "वृद्धिरेचि" इति सूत्रेण वृद्धौ, औकार एकादेशे, वर्णयोगे 'हरौ' इति रूपं साधु ।

# अभ्यासः

१. **अधस्तनसूत्राणां संस्कृतेन सरलार्थं लिखत**

(क) जसि च । (ख) ह्रस्वस्य गुणः (ग) शेषो घ्यसखि

(घ) आङो नाऽस्त्रियाम् (ङ) अच्च घेः

२. **अधोऽङ्कितप्रश्नानामुत्तराणि लिखत**

(क) सम्बुद्धिरित्यनेन किं ज्ञायते ?

(ख) ङिद्विभक्तयः काः ?

(ग) 'हरि + औ = हरी' इत्यत्र केन विधिना औकारोऽनन्तर्धीयते ?

(घ) सखिशब्दस्य घिसंज्ञा भवति न वा ? तच्च कुत्र निर्दिष्टम् ?

(ङ) हरीणामित्यत्र नुडागमो दीर्घश्च केन केन सूत्रेण ?

३. **परस्परं मेलयत**

| | |
|---|---|
| हरी | पूर्वरूपम् |
| हरिम् | पूर्वसवर्णदीर्घः |
| हरिणा | यण् |
| हरेः | गुणः |
| हर्योः | नादेशः |

४. **अग्नि-सन्धि-कपि-विधि-रविशब्दानां रूपावलीर्लिखत ।**

५. **निम्नाङ्कितरूपाणां ससूत्रं साधनप्रकारं लिखत**

हरीन्, हरौ, हे हरे, हरेः, हरये, हरिणा ।

६. **हरि-शब्दस्य रूपाणि कण्ठस्थानि श्रावयत ।**

# सखिशब्दस्य रूपसिद्धिप्रक्रिया

अनङादेशविधायकं विधिसूत्रम्-

**अनङ् सौ ७ । १ । ९३**

**सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ सौ परे । 'ङिच्च' इत्यन्तादेशः ।**

सम्बुद्धिभिन्ने सु-प्रत्यये परे सखि-शब्दरूपस्य अङ्गस्यान्त्यवर्णस्य स्थाने 'अनङ्' इत्यादेशो भवति । अनङ् इत्यस्य ङकार इत्संज्ञकः, नकारोत्तरवर्ती अकारश्च उच्चारणार्थः, अतः 'अन्' इत्येवावशिष्यते । ङित्वाद् "ङिच्च" इति सूत्रेण अन्त्यस्य इकारस्य स्थाने अन् विधीयते ।

अनेन अनङादेशेऽनुबन्धलोपे 'सखन् + स्' इत्यवस्थायाम्-

उपधासंज्ञाविधायकं सूत्रम्-

**अलोऽन्त्यात्पूर्व उपधा १ । १ । ६५**

**अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् ।**

कस्यापि शब्दस्वरूपस्य अन्त्यवर्णादव्यवहितस्य पूर्ववर्त्तिवर्ण उपधासंज्ञको भवति । व्याकरणशास्त्रे उपधा-पदेन उपान्त्यवर्णो बोध्यते ।

अनेन सूत्रेण 'सखन्' इत्यस्य उपान्त्यस्य खकारोत्तरवर्तिनोऽकारस्य उपधा-संज्ञायाम्, प्रत्ययस्य च "सुडनपुंसकस्य" इत्यनेन सर्वनामस्थानसंज्ञायाम्-

नान्तस्योपधाया दीर्घादेशविधायकं विधिसूत्रम्-

**सर्वनामस्थाने चासम्बुद्धौ ६ । ४ । ८**
**नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे ।**

सम्बुद्धिभिन्ने सर्वनामस्थानसंज्ञकप्रत्यये परे सति नकारान्तस्याङ्गस्य उपधायाः स्थाने दीर्घ आदेशो भवति ।

अनेन 'सखन्' इत्यस्य नकारान्तस्योपधाभूतस्य अकारस्य दीर्घे 'सखान् स्' इति जाते-

**अपृक्त एकाल्प्रत्ययः १ । २ । ४२ ।**

**एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ।**

प्रत्ययः प्रत्ययानुबन्धविनिर्मुक्तस्वरूपञ्च एकाल् भवति चेद् सोऽपृक्तसंज्ञको भवतीत्यर्थः ।

अनेन सकारस्यापृक्तसंज्ञायाम्-

हल्ङ्यादिलोपविधायकं विधिसूत्रम्-

**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ६ । १ । ६८**

**हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सी इत्येतदपृक्तं हल् लुप्यते । हल्ङ्याब्भ्यः किम् ? ग्रामणीः । दीर्घात् किम् ? निष्कौशाम्बिः । अतिखट्वः । 'सुतिसि' इति किम् ? अभैत्सीत् । तिपा सहचरितस्य सिपो ग्रहणात्सिचो ग्रहणं नास्ति । 'अपृक्तम्' इति किम् ? बिभर्ति । 'हल्' किम् ? बिभेद । 'प्रथमहल्' किम् ? राजा । नलोपादिर्न स्यात्, संयोगान्तलोपस्यासिद्धत्वात् । सखा । हे सखे ।**

हल् च ङी च आप्चेति द्वन्द्वः । दिग्योगे पञ्चमी । परमित्यध्याहार्यम् । समासैकदेशयोरपि ङ्यापोरेव दीर्घादिति विशेषणं न तु हलः, असम्भवात् । हल्ङ्याब्भ्य इत्यस्य सुतिस्याक्षिप्तप्रकृतिविशेषणतया, प्रत्ययग्रहणपरिभाषया च तदन्तविधिः । ततश्च हलन्ताच्च दीर्घङ्याबन्ताच्च परमिति लब्धम् । सुतिसि इति समाहारद्वन्द्वः । अपृक्तमिति हलिति च सामानाधिकरण्येनान्वेति । उकारे इकारे च लुप्ते परिशिष्टः सकारस्तकारश्च सुतिसि इत्यनेन विवक्षितः । ततश्च हलित्यनेन सामानाधिकरण्यं न विरुध्यते । लोपो: व्योः इत्यतो लोप इत्यनुवर्तते । लुप्यते इति लोपः । तथा च सूत्रार्थः-

हल्वर्णान्तात्, दीर्घरूपाद् ङ्यन्तात्, दीर्घरूपादाबन्ताच्चोत्तरस्य सु, तिप्, सिप् इति प्रत्ययत्रयादवशिष्टस्य अपृक्तसंज्ञकस्य हल्-वर्णस्य लोपो भवति । अनेन हलन्तादुत्तरस्य, अजन्तेषु टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन् इति षड्भिः स्त्रीप्रत्ययैर्निष्पन्नेषु तत्प्रत्ययकृतदीर्घस्वरूपान्तादेव शब्दस्वरूपादुत्तरस्य तथाविधस्य हल्वर्णस्य लोपो विधीयते ।

'हल्ङ्याब्भ्यः' इति वचनाद् 'ग्रामणीः' इत्यत्र सकारलोपो न भवति । अत्र ग्रामं नयतीति विग्रहे, णीञ् प्रापणे इत्यस्मात् क्विप्प्रत्ययेन निष्पन्नस्य ग्रामणीशब्दस्य हल्ङ्याबन्तत्वाभावान्न सुलोपः । ङ्यापोः स्वतः दीर्घत्वेन किमर्थं दीर्घत्वविशेषणमिति प्रश्नस्योत्तरे 'निष्कौशाम्बिः' 'अतिखट्वः' इत्युदाहरणे । अत्र हि 'निष्क्रान्तः कौशाम्ब्याः' इति विग्रहे "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इत्यनेन समासे "गोस्त्रियोः-" इति ह्रस्वत्वम् । तथैव 'खट्वामतिक्रान्तः' इति विग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन समासे "गोस्त्रियोः-" इति ह्रस्वत्वम् । उभयत्र ङ्यापोर्ह्रस्वत्वान्न सुलोपः ।

अनेन सलोपे 'सखान्' इत्यवस्थायां पदसंज्ञायां "न लोपः प्रातिपदिकान्तस्य" इति नलोपे 'सखा' इति ।

सखि + सु - सखि + स् - सखन् + स् (अनङ् सौ) - सखान् + स् (सर्वनामस्थाने चासम्बुद्धौ) - सखान् (हल्ङ्याब्भ्यः-) - सखा (न लोपः-) ।

णिद्वद्भावविधायकमतिदेशसूत्रम्-

**सख्युरसम्बुद्धौ ७ । १ । ९२**

**सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ।**

सखि-शब्दरूपादङ्गाद् विहिताः सम्बुद्धिसंज्ञकभिन्नाः सर्वनामस्थानसंज्ञकाः प्रत्यया णित्सदृशा भवन्ति । यद्यपि सु, औ, जस्, अम्, औट् इत्येतेषु सर्वनामस्थानसंज्ञकप्रत्ययेषु कस्मिन्नपि णकार इत् नैव वर्तते, तथापि सूत्रमिदं णित्प्रयुक्तकार्याणामतिदेशाय सखि-शब्दाद् विहितेषु एतेषु णित्वधर्ममारोपयति ।

'सखि + औ' इत्यवस्थायां सखि-शब्दरूपादङ्गात् परस्य सर्वनामस्थानसंज्ञकस्य औ-प्रत्ययस्यानेन सूत्रेण णिद्वद्भावे, पूर्वसवर्णदीर्घं बाधित्वा-

वृद्धिविधायकं विधिसूत्रम्-

**अचो ञ्णिति ७ । २ । ११५**

**ञिति णिति च परेऽजन्ताङ्गस्य वृद्धिः स्यात् ।**

ञित्-प्रत्यये, णित्-प्रत्यये च परे सति अज्वर्णान्तस्याङ्गस्य अन्त्यस्वरवर्णस्य स्थाने वृद्धिसंज्ञकादेशो भवति । पूर्वसूत्रेण णित्वधर्मस्यातिदेशादनेन सखि-शब्दस्य इकारस्यानेन वृद्धौ, आन्तरतम्यादैकारादेशो भवति ।

सखि + औ - सखै + औ (अचो ञ्णिति) - सख् आय् + औ (एचोऽयवायावः) - सखायौ । एवं जसि- सखि + जस् - सखि + अस् - सखै + अस् - सख् आय् + अस् - सखायस् - सखायर् - सखायः । सम्बुद्धौ तु णिद्वद्भावाभावाद् वृद्धेरप्यप्राप्तौ हरिशब्दवत् 'हे सखे' इति रूपं बोध्यम् । अमि णिद्वद्भावे- सखि + अम् - सखै + अम् - सख् आय् + अम् - सखायम् । औटि पूर्ववत्- सखायौ । शस्-प्रत्यये तस्य सर्वनामस्थानभिन्नतया णित्वस्याप्रसङ्गे हरिवदेव 'सखीन्' इति रूपं निष्पद्यते । तृतीयैकवचने सखि + टा - सखि + आ, इत्यवस्थायां घिसंज्ञाया अभावाद् नाभावस्याप्यभावे इकारस्य यणि- सख्या । भ्यामादिहलादौ विभक्तौ, आमि च सखि-शब्दस्य हरिवदेव रूपाणि जायन्ते । ङिद्विभक्तिषु घिप्रयुक्तस्य गुणस्य, अत्वौत्वस्य चाप्राप्तिर्बोध्या । सखि + ङे - सखि + ए - सख् य् + ए (इको यणचि) - सख्ये ।

उत्वादेशविधायकं विधिसूत्रम्-

**ख्यत्यात्परस्य ६ । १ । ११२**

**खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात् । सख्युः ।**

खि, खी इत्यनयोः, ति, ती इत्यनयोश्च कृतयणादेशयोः ख्य, त्य इति निर्देशः । यकारादकार उच्चारणार्थः । एङः पदान्तादित्यतोऽतीत्यनुवर्तते, तच्च परस्येति सामानाधिकरण्यात्षष्ठन्ततया विपरिणम्यते । ङसिङसोश्चेत्यतो ङसिङसोरित्यनुवर्तते । अवयवषष्ठ्येषा । ततश्च ङसिङसोरवयवस्य अत इति लभ्यते । ऋत उदित्यत उदित्यनुवर्तते । तथा च सूत्रार्थः-

खि, खी, ति, ती इति शब्दस्वरूपाणां यणादेशेन निर्मिताभ्यां 'ख्य्', 'त्य्' इति शब्दस्वरूपाभ्यामुत्तरस्य ङसि-ङस्प्रत्यययोरवयवस्य अकारस्य स्थाने उकारादेशो भवति । अत्र खि-ति-खी-तीशब्दानां यणादेशेन विकृतरूपयोः 'ख्य्', 'त्य्' इति शब्दस्वरूपयोरेव ग्रहणं करणीयम्, न तु अन्येषाम् । उदाहरणार्थम्- मुख्य, अपत्य इत्येतयोः शब्दयोरपि अन्ते 'ख्य', 'त्य' इत्येते शब्दस्वरूपे दृश्येते, परं ते खि-ति-खी-तीशब्दानां यणादेशेन

विकृतरूपे न स्तः, अतः ताभ्यां परस्य ङसि-ङस्प्रत्यययोरकारस्य अनेन सूत्रेण उत्वं न भवतीति बोद्धव्यम् ।

सखि + ङसि/ङस् - सखि + अस् - सख् य् + अस् (इको यणचि) - सख् य् + उस् (ख्यत्यात्परस्य) - सख्युस् - सख्युर् - सख्युः ।

ङेरौदादेशविधायकं विधिसूत्रम्-

**औत् ७ । ३ । ११८**

**इदुद्भ्यां परस्य ङेरौत् स्यात् । उकारानुवृत्तिरुत्तरार्था । सख्यौ । शेषं हरिवत् । शोभनः सखा सुसखा । सुसखायौ । सुसखायः । अनङ्णिद्वद्भावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्तिः । समुदायस्य सखिरूपत्वाभावाद् 'असखि' इति निषेधाप्रवृत्तेर्घिसंज्ञा । सुसखिना । सुसखये । ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् "ख्यत्यात्-" इत्युत्वं न । सुसखेः । सुसखावित्यादि । एवमतिशयितः सखा अतिसखा । 'परमः सखा यस्य' इति विग्रहे परमसखा परमसखायावित्यादि । गौणत्वेऽप्यनङ्णित्त्वे प्रवर्तेते । सखीमतिक्रान्तोऽतिसखिः । लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच् । हरिवत् । इहानङ्णित्त्वे न भवतः । "गोस्त्रियोः-" इति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात् । "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात्"** (प.) **।**

इकारात्, उकाराच्च परस्य ङि इत्यस्य स्थाने औत् आदेशो भवति । घिसंज्ञकेषु हरिकव्यादिषु "अच्च घेः" इत्यनेन ङेरौदादेशः । नदीसंज्ञकेषु मत्यादिषु "इदुद्भ्याम्" इत्यनेन आमादेशः । अतः सूत्रद्वयविषयादन्यौ सखि-पतिशब्दौ एवास्य सूत्रस्य विषयौ, एतयोरुकाराभावादुकारानुवृत्तिर्व्यर्थेत्यत आह- 'उकारानुवृत्तिः "अच्च घेः" इत्युत्तरसूत्रेऽनुवृत्त्यर्था' इति ।

सखि + ङि - सखि + इ - सखि + औ (औत्) - सखि + औ - सख् य् + औ - सख्यौ ।

सखिशब्दस्य सौ अनङ्ङादेशस्य, सम्बुद्धिभिन्ने सर्वनामस्थाने णिद्वद्भावस्य चाङ्गत्वात् सखिशब्दान्तशब्देऽपि प्रवृत्तिर्भवति । यथा- 'शोभनः सखा' इति विग्रहे प्रादिसमासे सुसखि-शब्दो निष्पद्यते, तस्मात् सौ- सुसखा । सुसखायौ । सुसखायः । परं सखिशब्दान्तशब्दे समुदायस्य सखिरूपत्वाभावाद् "असखि" इति निषेधाप्रवृत्तेर्घिसंज्ञा तु भवत्येव । तेन टा इत्यस्य नाभावे हरिवत्- सुसखिना । सुसखिभ्याम् । सुसखिभिः । ङिद्विभक्तिष्वपि हरिवद् घिप्रयुक्तगुणादिकं बोध्यम्- सुसखये । सुसखिभ्याम् । सुसखिभ्यः । ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् "ख्यत्यात्-" इत्युत्वं न । सुसखेः । सुसख्योः । सुसखीनाम् । सुसखौ । सुसख्योः । सुसखिषु । हे सुसखे, हे सुसखायौ, हे सुसखायः । एवमतिशयितः सखा अतिसखा । 'परमः सखा यस्य' इति विग्रहे परमसखा । परमसखायौ इत्यादि । गौणत्वेऽप्यनङ्णित्वे प्रवर्तेते । स्त्रियां प्रयुक्तं सखीशब्दमादाय सखीमतिक्रान्तोऽतिसखिः इति व्युत्पादने सति अस्य हरिवद्रूपाणि जायन्ते । इहानङ्णित्वे न भवतः । "गोस्त्रियो-" इति ह्रस्वत्वेन अतिसखिशब्दस्य लाक्षणिकत्वात् "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात्", लक्षणेन = सूत्रेण निष्पादितं लाक्षणिकम् । अतिसखिशब्दस्य सामान्यतश्शास्त्रव्युत्पादितत्वात् । प्रत्यक्षोपदिष्टं प्रतिपदोक्तमित्युच्यते ।

| सखिशब्दस्य रूपावलिः | | |
|---|---|---|
| सखा | सखायौ | सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सख्योः | सखीनाम् |
| सख्यौ | सख्योः | सखिषु |
| हे सखे | हे सखायौ | हे सखायः |

## प्रयोगसिद्धिप्रकारः

### सखा

सखि-शब्दस्य अव्युत्पत्तिपक्षे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ अनुबन्धलोपे 'सखि + स्' इति जाते "अनङ् सौ" इति सूत्रेण अनङादेशेऽनुबन्धलोपे 'सखन् + स्' इति जाते "अलोऽन्त्यात् पूर्व उपधा" इत्यनेन उपधासंज्ञायां "सर्वनामस्थाने चासम्बुद्धौ" इति सूत्रेण उपधाया दीर्घे 'सखान् + स्' इति जाते "अपृक्त एकाल्प्रत्ययः" इति सूत्रेण अपृक्तसंज्ञायां "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण सलोपे 'सखान्' इति जाते "न लोपः प्रातिपदिकान्तस्य" इत्यनेन नकारस्य लोपे 'सखा' इति रूपं सिद्धम् ।

### सख्युः

सखि-शब्दस्य अव्युत्पत्तिपक्षे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण पञ्चम्या एकवचने ङसिविभक्तौ अनुबन्धलोपे 'सखि + अस्' इति जाते "इको यणचि" इत्यनेन यणि 'सख्य् + अस्' इति जाते "ख्यत्यात्परस्य" इति सूत्रेण अकारस्य उत्वे, वर्णयोगे 'सख्युस्' इति जाते सकारस्य "ससजुषो रुः" इत्यनेन रूत्वेऽनुबन्धलोपे रेफस्य "खरवसानयोर्विसर्जनीयः" इति सूत्रेण विसर्गे 'सख्युः' इति रूपं सिद्धम् ।

# अभ्यासः

१. **निम्नाङ्कितानां सूत्राणां सरलार्थं लिखत**

(क) अलोऽन्त्यात्पूर्व उपधा
(ख) सर्वनामस्थाने चासम्बुद्धौ
(ग) सख्युरसम्बुद्धौ
(घ) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्
(ङ) ख्यत्यात्परस्य

२. **अधो लिखितप्रश्नानामुत्तराणि दत्त**

(क) "हल्ङ्याब्भ्यः-" इत्यनेन कस्य लोपो भवति ?
(ख) "अचो ञ्णिति" इत्यनेन कस्यामवस्थायां वृद्धिर्भवति ?
(ग) "ख्यत्यात्परस्य" इत्यनेन कस्य स्थाने उकारादेशो भवति ?
(घ) अपृक्तसंज्ञा कीदृशस्य प्रत्ययस्य भवति ?
(ङ) ङ्यापोर्दीर्घविशेषणेन संयोजनस्य किं प्रयोजनम् ?
(च) 'सख्या' इत्यत्र नादेशाभावे कारणं किम् ?

३. **परस्परं मेलयत**

| | |
|---|---|
| सखा | णिद्वद्भावो वृद्धिश्च |
| सखीन् | 'औत्' आदेशः |
| सखायम् | सम्बुद्धिलोपः |
| सख्यौ | उपधादीर्घः |
| हे सखे | पूर्वसवर्णदीर्घः |

४. **सुसखिशब्दस्य रूपावलिं लिखत ।**

५. **ससूत्रं सिद्धिप्रक्रियां प्रदर्शयत**

सखा, सखायौ, सख्या, सख्युः, सखीनाम्, हे सखे, सख्यौ, सुसखिना, सुसखेः ।

६. **'औत्' इति सूत्रे उकारानुवृत्तेः प्रयोजनं स्पष्टं कुरुत ।**

पञ्चविंशःपाठः

# पतिद्वित्रिवातप्रम्यादिशब्दानां रूपसिद्धिप्रक्रिया

पति-शब्दस्य कृदन्ततया व्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । टा-विभक्तौ ङिद्विभक्तिषु चास्य शब्दस्य रूपाणि सखिशब्दवत्, शेषविभक्तिषु च हरिशब्दवज्जायन्ते । कारणं च यथा-

घिसंज्ञाया नियामकं सूत्रम्-

**पतिः समास एव १ । ४ । ८**

**पतिशब्दः समास एव घिसंज्ञः स्यात् । पत्या । पत्ये । पत्युः । पत्युः । पतीनाम् । पत्यौ । शेषं हरिवत् ।**

**समासे तु भूपतये ।**

पति-शब्दः समासे एव घि-संज्ञको भवति । पति-शब्दस्य इकारान्ततया, नदीसंज्ञकभिन्नतया, सखिशब्दभिन्नतया च "शेषो घ्यसखि" इत्यनेन घिसंज्ञायां प्राप्तायामनेन सूत्रेण तां निषिद्ध्य समासप्रक्रियया निर्मितानां पति-शब्दान्तानां शब्दानामेव घि-संज्ञा विधीयते । समासेन निष्पन्नानां भूपति, प्रजापति, नरपति इत्यादीनां पतिशब्दान्तानां शब्दानां घिसंज्ञायां हरि-शब्दवदेव तेषां रूपाणि जायन्ते ।

अनेन सूत्रेण घिसंज्ञाया निषेधे टा, ङे, ङसि, ङस्, ङि इत्येतेषु विभक्तिषु सखि-शब्दसदृशप्रक्रियया पत्या, पत्ये, पत्युः, पत्युः, पत्यौ इत्येतानि रूपाणि निष्पद्यन्ते । शेषविभक्तिषु हरिवत्- पतिः, पती, पतयः, पतिम्, पती, पतीन्, पतिभ्याम्, पतिभिः इत्यादीनि रूपाणि बोध्यानि ।

**कतिशब्दो नित्यं बहुवचनान्तः ।**

किम्-शब्दाद् डति-प्रत्यये निष्पन्नः कति-शब्दो बहुवचने एव प्रयुज्यते । तद्धितप्रत्ययान्ततया व्युत्पन्नपक्षे तस्य प्रातिपदिकसंज्ञा भवति ।

संख्यासंज्ञाविधायकं सूत्रम्-

**बहुगणवतुडति संख्या १ । १ । २३**

**एते संख्यासंज्ञाः स्युः ।**

बहु = सङ्ख्यावाचको बहु-शब्दः । गण = सङ्ख्यावाचको गण-शब्दः । वतु = वतुप् इति तद्धितप्रत्ययः, तदन्तशब्दा इत्यर्थः । डति = तद्धितप्रत्ययः, तदन्तशब्द इत्यर्थः । बहु-शब्दस्य, गण-शब्दस्य, वतुप्-प्रत्ययान्तशब्दस्य, डति-प्रत्ययान्तशब्दस्य च 'संख्या' इति संज्ञा भवति, तथा च लोके प्रसिद्धानाम् एक, द्वि, त्रि इत्यादीनां सङ्ख्यावाचकशब्दानामपि संख्यासंज्ञा भवति ।

अस्मिन् सूत्रे सङ्ख्यावाचिनौ एव बहु-गणशब्दौ गृह्येते, न तु वैपुल्य-सङ्घवाचिनौ इति स्मर्तव्यम् । यथा- यदा बहु-शब्दो द्वाभ्यामधिकसङ्ख्याया वाचकत्वेन प्रयुज्यते, तदा एव स सङ्ख्यासंज्ञको भवति, परन्तु विपुलार्थे प्रयुक्ते तस्य सङ्ख्यासंज्ञा न भवति । एवमेव सङ्घार्थको गण-शब्दोऽपि एतत्संज्ञां न लभते । वतुप्, डति इत्येतौ चात्र तद्धितप्रत्ययौ एव ग्राह्यौ, तदन्तविधिना चैतत्प्रत्ययान्तशब्दानां ग्रहणं भवति । वतुप्-प्रत्ययान्तशब्दा यावत्, तावत्, एतावत् इति त्रयः सन्ति । डति-प्रत्ययान्तस्तु 'कति' इति एक एव शब्दो वर्तते । उक्तानां षण्णां शब्दानाम्, लोकप्रसिद्धानामेकादिशब्दानां च सङ्ख्यासंज्ञा ज्ञेया ।

षट्संज्ञाविधायकं सूत्रम्-

**डति च १ । १ । २५**

**डत्यन्ता संख्या षट्संज्ञा स्यात् ।**

सङ्ख्यासंज्ञकस्य डतिप्रत्ययान्तस्य कति-शब्दस्य 'षट्' इति संज्ञा भवति । कति-शब्दस्य षट्संज्ञार्थमेव सूत्रमिदम्, नान्यत्रास्य प्रसक्तिः ।

लुक्श्लुलुप्संज्ञाविधायकं सूत्रम्-

**प्रत्ययस्य लुक्श्लुलुपः १ । १ । ६१**

**लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञकं स्यात् ।**

लुक्-शब्दं प्रयुज्य विहितस्य प्रत्ययस्यादर्शनस्य लुक्-संज्ञा, श्लु-शब्देन विहितस्य प्रत्ययस्यादर्शनस्य श्लु-संज्ञा, लुप्-शब्देन विहितस्य प्रत्ययस्य अदर्शनस्य च लुप्-संज्ञा भवतीत्यर्थः । लुक्, श्लु, लुप् एते त्रयः प्रत्यया 'लुमन्तः' कथ्यन्ते, त्रिषु एव 'लु' इति शब्दस्वरूपं समानं वर्तते । लु यस्यास्ति इत्यर्थे मतुप्-प्रत्यये निष्पन्नस्य लुमत्-शब्दस्य पुंलिङ्गे लुमान्, लुमन्तौ, लुमन्तः इत्यादीनि रूपाणि ।

जश्शसोर्लुगादेशविधायकं विधिसूत्रम्-

**षड्भ्यो लुक् ७ । १ । २२**

**षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् ।**

षट्संज्ञकशब्दादुत्तरयोर्जस्-शस्प्रत्यययोर्लुग् भवति ।

प्रत्ययलक्षणपरिभाषासूत्रम्-

**प्रत्ययलोपे प्रत्ययलक्षणम् १ । १ । ६२**

**प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात् । इति "जसि च" इति गुणे प्राप्ते ।**

यद्यपि प्रत्ययस्य लोपः क्रियते, तथापि तदाश्रितम् = प्रत्ययनिमित्तकं कार्यं भवति । येन केनापि शब्देन प्रत्ययस्य लोपे कृतेऽपि तं प्रत्ययं निमित्तं कृत्वा क्रियमाणानि कार्याणि भवन्तीत्याशयः ।

**न लुमताङ्गस्य १ । १ । ६३**

**लुक् श्लु लुप् एते लुमन्तः । लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु । अस्मद्युष्मत्षट्संज्ञकास्त्रिषु सरूपाः ।**

यत्र लुक्-श्लु-लुप्शब्दैः प्रत्ययस्य लोपः क्रियते, तत्र प्रत्ययनिमित्तमङ्गकार्यं न भवति । प्रत्ययस्य लोपे कृतेऽपि पूर्वसूत्रेण प्रत्ययलक्षणमाश्रित्य विधीयमानमङ्गकार्यं लुमत्शब्दैर्लुप्तायामवस्थायामनेन सूत्रेण निषिध्यते । निषेधोऽयमङ्गकार्यस्यैवेति स्मर्तव्यम् ।

'का संख्या येषामि'ति विग्रहे "किमः संख्यापरिमाणे डति च" इत्यनेन किम्-शब्दाद् बहुत्वसंख्यावच्छिन्नसंख्येयविषयप्रश्ने एव डतिप्रत्ययः । अतः कतिशब्दो नित्यं बहुवचनान्तः । कतिप्रातिपदिकात् प्रथमाविभक्तौ जसि- कति + जस् - कति + अस्, इत्यवस्थायां संख्याषट्संज्ञयोः "षड्भ्यो लुक्" इत्यनेन विभक्तेर्लुकि 'कति' इति जाते पूर्वसूत्रेण प्रत्यलक्षणमाश्रित्य "जसि च" इति गुणे प्राप्तेऽनेन सूत्रेण तन्निषेधे 'कति' इति रूपम् । एवं शस्विभक्तावपि । भिसादिविभक्तिषु हरिसदृशा प्रक्रियाऽत्राप्यवलम्बनीया ।

अस्मद्-शब्दस्य, युष्मद्-शब्दस्य, षट्संज्ञक-शब्दानां च रूपाणि त्रिषु लिङ्गेषु समानानि भवन्तीत्यर्थः ।

**त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः ।**

सङ्ख्यावाचकः त्रि-शब्दो बहुवचने एव प्रयुज्यते । त्रि + जस् - त्रि + अस् - त्रे + अस् (जसि च) - त्र् अय् + अस् (एचोऽयवायावः) - त्रयः । शस्, भिस्, भ्यस्, सुप् इत्येतासु विभक्तिष्वपि हरिवदेव प्रक्रिया ज्ञेया । आमि तु विशेषमाह-

त्रयादेशविधायकं विधिसूत्रम्-

**त्रेस्त्रयः ७ । १ । ५३**

**त्रिशब्दस्य त्रयादेशः स्यादामि । त्रयाणाम् । परमत्रयाणाम् । गौणत्वे तु नेति केचित् । प्रियत्रीणाम् । वस्तुतस्तु प्रियत्रयाणाम् । त्रिषु ।**

आम्-प्रत्यये परे सति त्रि-शब्दस्य स्थाने 'त्रय' इत्यादेशो भवति । अनेकाल्त्वात् सर्वादेशः ।

त्रि + आम् - त्रय + आम् (त्रेस्त्रयः) - त्रय + नाम् (ह्रस्वनद्यापो नुट्) - त्रयानाम् (नामि) - त्रयाणाम् (अट् कुप्वाङ्-) ।

त्रयादेशोऽयं त्रि-शब्दस्य गौणत्वेन प्रयोगेऽपि विधीयते । समासे उपसर्जनसंज्ञकः शब्द गौणत्वेन स्वीक्रियते (इतरविशेषणतया स्वार्थोपस्थापकत्वमुपसर्जनत्वं गौणत्वम् वा) । अतः परमत्रि-शब्दादामि त्रेस्त्रयादेशे, नुटि, नस्य णत्वे- परमत्रयाणाम् । 'प्रियाः त्रयो यस्याः' इति विग्रहे बहुव्रीहिसमासेन निष्पन्नस्य प्रियत्रि-शब्दस्यापि आम्-प्रत्यये परे अनेन 'त्रि' इत्यस्य त्रयादेशे 'प्रियत्रयाणाम्' इति रूपं जायते । गौणत्वे तु त्रेस्त्रयादेशो नेति केषाञ्चिन्मतं विद्यते, तन्मते हरिवत्- प्रियत्रीणाम् । शेषरूपाणि हरिवदेव बोध्यानि ।

**द्विशब्दो नित्यं द्विवचनान्तः ।**

सङ्ख्यावाचको द्वि-शब्दो नित्यं द्विवचने एव प्रयुज्यते। प्रथमाया द्विवचने औ-प्रत्यये 'द्वि + औ', त्यदादिगणे पठितत्वात्-

अकारान्तादेशविधायकं विधिसूत्रम्-

**त्यदादीनामः** ७। २। १०२

**एषामकारोऽन्तादेशः स्याद्विभक्तौ। द्विपर्यन्तानामेवेष्टिः (वा.)। द्वौ २। द्वाभ्याम् ३। द्वयोः २। 'द्विपर्यन्तानाम्' इति किम्? भवान्। भवन्तौ। भवन्तः। संज्ञायामुपसर्जनत्वे च नात्वम्, सर्वाद्यन्तर्गणकार्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वी। द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्राधान्ये तु परमद्वावित्यादि।**

विभक्तौ परतः त्यदादिगणे पठितानां शब्दानामकारान्तादेशो भवति। अकारान्तादेशः = अन्त्यस्य वर्णस्य स्थाने अकार आदेशः, अत्वपदेनापि व्यवह्रियते। अयमकारान्तादेशः त्यदादिगणपठितशब्देषु द्वि-शब्दपर्यन्तानां शब्दानामेव भवतीति वार्तिकार्थः। (त्यदादीनामङ्गस्य विभक्तौ अः द्विपर्यन्तानामेव इष्टिः।)

सर्वादिगणे अन्तर्गणरूपेण द्वादशशब्दात्मकस्त्यदादिगणो वर्तते। त्यद्-शब्दादेः किम्-शब्दान्तस्यास्य गणस्य अष्टमः शब्दः 'द्वि' वर्तते। अनेन विधीयमानमत्वं द्वि-शब्दपर्यन्तानामष्टानां त्यदादिशब्दानामेव इष्टं वर्तते, तेन अन्त्यानां युष्मद्, अस्मद्, भवत्, किम् इत्येतेषां चतुर्णामनेन अत्वं न भवतीति बोध्यम्।

अनेन सूत्रेण अकारान्तादेशे कृते इकारान्तो द्वि-शब्दो विभक्तौ परतः सत्यामकारान्तत्वं प्रप्नोति, तेन रामशब्दाद् द्विवचनवत् प्रक्रियया द्वि-शब्दस्य रूपाणि निष्पद्यन्ते।

द्वि + औ - द्व + औ (त्यदादीनामः) - द्वौ (वृद्धिरेचि)। द्वि + भ्याम् - द्व + भ्याम् (त्यदादीनामः) - द्वा + भ्याम् (सुपि च) - द्वाभ्याम्। द्वि + ओस् - द्व + ओस् (त्यदादीनामः) - द्वे + ओस् (ओसि च) - द्व् अय् + ओस् - द्वयोस् - द्वयोर् - द्वयोः।

द्विशब्दस्य संज्ञायामुपसर्जनत्वे च अकारान्तादेशो न, सर्वाद्यन्तर्गणकार्यत्वात्। तेन द्विर्नाम कश्चित्, तस्य तु- द्विः। द्वी। द्वयः इत्यादीनि हरिवद्रूपाणि। एवं द्वावतिक्रान्तोऽतिद्विः। प्राधान्ये तु 'परमद्वौ' इत्यादि।

**औडुलोमिः। औडुलोमी। बहुवचने तु उडुलोमाः। लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः (वा.)। बाह्वादीञोऽपवादः। औडुलोमिम्। औडुलोमी। उडुलोमान्। इति इदन्ताः।**

अथ ईकारान्तपुंलिङ्गाः।

**"वातप्रमीः" इत्युणादिसूत्रेण माङ ईप्रत्ययः, स च कित्। वातं प्रमिमीते इति वातप्रमीः। "दीर्घाज्जसि च"। वातप्रम्यौ। वातप्रम्यः। हे वातप्रमीः। "अमि पूर्वः"। वातप्रमीम्। वातप्रम्यौ। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्याम् ३। वातप्रम्ये। वातप्रम्यः २। वातप्रम्योः २। वातप्रम्याम्। दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः। वातप्रमी। वातप्रमीषु। एवं ययीपप्यादयः। यान्त्यनेनेति ययीर्मार्गः। पाति लोकमिति पपीः सूर्यः। "यापोः किद्वे च" (उ.सू.) इति ईप्रत्ययः। क्विबन्तवातप्रमीशब्दस्य तु अमि शसि ङौ च विशेषः। वातप्रम्यम्। वातप्रम्यः। वातप्रम्यि। "एरनेकाचः-" इति वक्ष्यमाणो यण् प्रधीवत्।**

वातं प्रमिमीते इति विग्रहे वातमित्युपपदे माङ्धातोः कर्तरि ईप्रत्ययेन निष्पन्नो वातप्रमीशब्दः । वातप्रमी + सु - वातप्रमी + स् - वातप्रमीर् - वातप्रमीः । वातप्रमी + औ, पूर्वसवर्णदीर्घस्य "दीर्घाज्जसि च" इति निषेधाद् यणि कृते- वातप्रम्यौ । वातप्रम्यः । वातप्रमी + अम्, पूर्वरूपे- वातप्रमीम् । वातप्रम्यौ । शसि पूर्वसवर्णदीर्घे- वातप्रमीन् । वातप्रम्या । वातप्रमीभ्याम् । वातप्रमीभिः । वातप्रम्ये । वातप्रमीभ्यः । वातप्रम्यः । वातप्रम्योः । वातप्रम्याम्, आमि ह्रस्वान्ताभावान्न नुट् । ङौ सवर्णदीर्घः, वातप्रमी । वातप्रमीषु । हे वातप्रमीः । एवं यान्त्यनेनेति ययीः = मार्गः । पाति लोकमिति पपीः = सूर्यः । "यापो किद्द्वे च" इति ईप्रत्ययः । क्विबन्तवातप्रमीशब्दस्य त्वमि शसि ङौ च विशेषः, "एरनेकाचोऽसंयोगपूर्वस्य" इति वक्ष्यमाणसूत्रेण यणि प्रधीशब्दवद् वातप्रम्यम्, वातप्रम्यः, वातप्रम्यि इति सिद्धचन्ति ।

| **पतिशब्दस्य रूपावलिः** | | | **कतिशब्दस्य रूपावलिः** | **त्रिशब्दस्य रूपावलिः** |
|---|---|---|---|---|
| पतिः | पती | पतयः | कति | त्रयः |
| पतिम् | पती | पतीन् | कति | त्रीन् |
| पत्या | पतिभ्याम् | पतिभिः | कतिभिः | त्रिभिः |
| पत्ये | पतिभ्याम् | पतिभ्यः | कतिभ्यः | त्रिभ्यः |
| पत्युः | पतिभ्याम् | पतिभ्यः | कतिभ्यः | त्रिभ्यः |
| पत्युः | पत्योः | पतीनाम् | कतीनाम् | त्रयाणाम् |
| पत्यौ | पत्योः | पतिषु | कतिषु | त्रिषु |
| हे पते | हे पती | हे पतयः | हे कति | हे त्रयः |

| **द्विशब्दस्य रूपाणि** | **कृति ईप्रत्ययान्तस्य वातप्रमीशब्दस्य रूपावलिः** | | |
|---|---|---|---|
| द्वौ | वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| द्वौ | वातप्रमीम् | वातप्रम्यौ | वातप्रमीन् |
| द्वाभ्याम् | वातप्रम्या | वातप्रमीभ्याम् | वातप्रमीभिः |
| द्वाभ्याम् | वातप्रम्ये | वातप्रमीभ्याम् | वातप्रमीभ्यः |
| द्वाभ्याम् | वातप्रम्यः | वातप्रमीभ्याम् | वातप्रमीभ्यः |
| द्वयोः | वातप्रम्यः | वातप्रम्योः | वातप्रम्याम् |
| द्वयोः | वातप्रमी | वातप्रम्योः | वातप्रमीषु |
| | हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |

# प्रयोगसिद्धिप्रकारः

### द्वौ

द्विशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया द्विवचने औविभक्तौ 'द्वि + औ' इति स्थिते "त्यदादीनामः" इति सूत्रेण अकारान्तादेशे 'द्व + औ' इत्यत्र "वृद्धिरेचि" इति सूत्रेण वृद्धौ 'द्वौ' इति रूपं सिद्धम् ।

### कति

कतिशब्दस्य "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तौ अनुबन्धलोपे 'कति + अस्' इति जाते "बहुगणवतुडति संख्या" इत्यनेन संख्यासंज्ञायां "डति च" इति सूत्रेण षट्संज्ञायां "षड्भ्यो लुक्" इति सूत्रेण जसो लुकि कति इत्यत्र "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यनेन प्रत्ययलक्षणे कृते "जसि च" इत्यनेन गुणे प्राप्ते "न लुमताङ्गस्य" इत्यनेन तन्निषेधे 'कति' इति रूपं सिद्धम् ।

### त्रयाणाम्

त्रिशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इत्यनेन षष्ठ्या एकवचने आम्विभक्तौ 'त्रि + आम्' इत्यवस्थायां "त्रेस्त्रयः" इति सूत्रेण त्रिशब्दस्य त्रयादेशे 'त्रय + आम्' इति जाते "ह्रस्वनद्यापो नुट्" इति सूत्रेण नुडागमेऽनुबन्धलोपे "नामि" इति सूत्रेण दीर्घे 'त्रयानाम्' इति जाते "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण नस्य णत्वे 'त्रयाणाम्' इति रूपं सिद्धम् ।

# अभ्यासः

१. **निम्नलिखितसूत्राणामर्थं लिखत**

(क) पतिः समास एव (ख) बहुगणवतुडति संख्या

(ग) प्रत्ययलोपे प्रत्ययलक्षणम् (घ) त्यदादीनामः

(ङ) षड्भ्यो लुक्

२. **अधोऽङ्कितप्रश्नानामुत्तराणि लिखत**

(क) पतिशब्दस्य कस्यामवस्थायां घिसंज्ञा भवितुमर्हति ?

(ख) कतिशब्दो बहुवचने प्रयुज्यते, तत्र कारणं किम् ?

(ग) द्विशब्दः कस्मिन् वचने प्रयुज्यते ?

(घ) "वातप्रम्यः" इत्यत्र पूर्वसवर्णदीर्घः केन निषिध्यते ?

(ङ) 'त्रयः' इत्यत्र गुणः केन सूत्रेण भवति ?

३. **परस्परं मेलयत**

| | |
|---|---|
| पत्ये | सम्बोधनम् |
| हे पते | आम् |
| त्रयाणाम् | ङे |
| वातप्रमी | शस् |
| कति | ङि |

४. **पपीशब्दस्य रूपावलिं लिखत ।**

५. **निम्नाङ्कितानां ससूत्रं रूपसाधनप्रकारं लिखत**

कति + आम् - कति + न् आम् - कति + नाम् - कतीनाम् ।

द्वि + ओस् - द्व + ओस् - द्वे + ओस् - द्वय् + ओस् - द्वयोस् - द्वयोर् - द्वयोः ।

पति + ङस् - पति + अस् - पत्यस् - पत्युस् - पत्युर् - पत्युः ।

वातप्रमी + शस् - वातप्रमी + अस् - वातप्रमीस् - वातप्रमीन् ।

# बहुश्रेयसीकुमार्यादिशब्दानां रूपसिद्धिप्रक्रिया

**बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी । दीर्घङ्यन्तत्वात् "हल्ङ्याब्भ्यः-" इति सुलोपः ।**

बह्व्यः श्रेयस्यो यस्येति विग्रहे बहुव्रीहिसमासेन निष्पन्नः पुम्बोधको बहुश्रेयसीशब्दो दीर्घङ्यन्तो वर्तते तेन सुविभक्तौ "हल्ङ्याप्-" इति सुलोपः । श्रेयसी-शब्दस्य स्त्रीलिङ्गत्वेऽपि समासेन बहुश्रेयसी-शब्दः पुंलिङ्गो जातोऽस्ति । प्रथमा-द्वितीया-तृतीयाविभक्तिषु बहुश्रेयसी-शब्दस्य रूपाणि पपीवद् जायन्ते । सम्बुद्धौ तु-

नदीसंज्ञाविधायकं सूत्रम्-

**यू स्त्र्याख्यौ नदी १ । ४ ।**
**ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः । "प्रथमलिङ्गग्रहणं च" (वा.) पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः ।**

ईश्च ऊश्चेति यू, पूर्वसवर्णदीर्घः । दीर्घाज्जसि चेति निषेधाभावश्छान्दसः । व्याख्यानाद्दीर्घयोरेव ग्रहणम् । स्त्रियमाचक्षाते स्त्र्याख्यौ । यू इति तद्विशेषणं, ततस्तदन्तविधिः । स्त्रियामित्येव सिद्धे आख्याग्रहणं नित्यस्त्रीलिङ्गलाभार्थम् । द्वित्वे नदीत्येकवचनं छान्दसम् । तथा च सूत्रार्थः-

ईकारान्तानाम्, ऊकारान्तानां च नित्यस्त्रीलिङ्गवाचिनां शब्दानां नदी-संज्ञा भवति । ये शब्दा ईकारान्ताः, ऊकारान्ता वा सन्तः केवलं स्त्रीलिङ्गे एव प्रयुज्यन्ते, तेषामेवानेन नदीसंज्ञा भवति । कश्चित् शब्द ईकारन्तः/ऊकारान्तः, स्त्रीलिङ्गश्च सन्नपि लिङ्गान्तरेऽपि प्रयुज्यते चेत् तस्य स्त्रीलिङ्गेऽपि नदीसंज्ञा न भवति, तस्य नित्यस्त्रीलिङ्गत्वाभावात् । यथा- 'स्वयम्भू' इति शब्द ऊकारान्तो वर्तते, स्त्रीलिङ्गश्च, परन्तु तस्य पुंलिङ्गेऽपि प्रयोगात् स्त्रीलिङ्गप्रयोगावस्थायामपि नदीसंज्ञा न भवति । एवमीकारान्तस्य ग्रामणी-शब्दस्यापि लिङ्गद्वये विद्यमानत्वात् (स्त्रीलिङ्गेऽनित्यत्वात्) नदीसंज्ञा न जायते ।

'यदि कश्चन नदीसंज्ञकशब्दः समासे उपसर्जनरूपेणागच्छति तर्हि तस्य समस्तपदस्यापि नदीसंज्ञा भवति' इत्यर्थकेन 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन बहुश्रेयसी-शब्दस्य नदीसंज्ञा सिद्ध्यति । तेन बहुश्रेयसीशब्दो नदीसंज्ञको वर्तते ।

ह्रस्वादेशविधायकं सूत्रम्-

**अम्बार्थनद्योर्ह्रस्वः ७ । ३ । १०७**
**अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ ।**

सम्बुद्धिसंज्ञके प्रत्यये परे अम्बा-शब्दस्य पर्यायरूपेण प्रयुज्यमानानां शब्दानाम्, नदीसंज्ञकानां शब्दानां चाङ्गस्यान्त्यवर्णस्य ह्रस्व आदेशो भवति। 'अम्बा' इति शब्दः 'माता' इत्यर्थे प्रयुज्यते। अम्बा, अक्का, अल्ला इत्यादयोऽम्बार्थकशब्दाः। एतेषां शब्दानाम्, नदीसंज्ञकानां शब्दानाम्, तदन्तशब्दानां चानेन सूत्रेण सम्बोधनस्य एकवचने ह्रस्वान्तत्वं विधीयते।

बहुश्रेयसी सु (सम्बोधनम्) - बहुश्रेयसी स् - पूर्वसूत्रेण नदीसंज्ञायाम्, अनेनाङ्गस्य ह्रस्वे- बहुश्रेयसि स् - बहुश्रेयसि (एङ्ह्रस्वात् सम्बुद्धेः) - हे बहुश्रेयसि। चतुर्थ्येकवचने ङेप्रत्यये-

आडागमविधायकं विधिसूत्रम्-

**आण्नद्याः ७। ३। ११२**

**नद्यन्तात्परेषां ङितामाडागमः स्यात्।**

नदीसंज्ञकादङ्गात् परस्य ङित्-प्रत्ययस्य 'आट्' इत्यागमो भवति। आटष्टकार इत्, टित्वादाद्यवयवत्वे प्रत्ययस्य आदौ 'आ' इति संयोज्यते।

वृद्ध्यादेशविधायकं विधिसूत्रम्-

**आटश्च ६। १। ९**

**आटोऽचि परे वृद्धिरेकादेशः स्यात्।**

आडागमाद् अचि परे सति पूर्वपरयोः स्थाने वृद्धिसंज्ञक एकादेशो भवति।

बहुश्रेयसी ङे - बहुश्रेयसी ए - बहुश्रेयसी आ ए (आण्नद्याः) - बहुश्रेयसी ऐ (आटश्च) - बहुश्रेयस् य् ऐ (इको यणचि) - बहुश्रेयस्यै। बहुश्रेयसी ङसि/ङस् - बहुश्रेयसी अस् - बहुश्रेयसी आ अस् (आण्नद्याः) - बहुश्रेयसी आस् (आटश्च) - बहुश्रेयस् य् आस् (इको यणचि) - बहुश्रेयस्यास् - बहुश्रेयस्यार् - बहुश्रेयस्याः। आम्-प्रत्यये ङ्यन्तत्वाद् नुडागमे- बहुश्रेयसीनाम् इति। ङौ तु-

आमादेशविधायकं विधिसूत्रम्-

**ङेराम् नद्याम्नीभ्यः ७। ३। ११६**

**नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्। इह परत्वादाटा नुड् बाध्यते। बहुश्रेयस्याम्। शेषमीप्रत्ययान्तवातप्रमीवत्।**

नदीसंज्ञकादङ्गात् परस्य, आबन्तादङ्गात् परस्य, 'नी' इति शब्दस्वरूपान्ताच्चाङ्गात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' इत्यादेशो भवति। आमादेशस्य स्थानिवत्वान् ङित्वे तत्प्रयुक्तकार्याण्यपि जायन्ते। सेनानी, राजनी, ग्रामणी इत्यादयो नी-शब्दान्तशब्दाः सन्ति। नी-शब्दात्, नीशब्दान्तशब्दाच्च विहितस्य 'ङि' इत्यस्यानेन आमादेशो विधीयते।

बहुश्रेयसी ङि - बहुश्रेयसी इ - बहुश्रेयसी आम् (ङेराम्नद्याम्नीभ्यः) - बहुश्रेयसी आ आम् (आण्नद्याः) - बहुश्रेयसी आम् (आटश्च) - बहुश्रेयस् य् आम् (इको यणचि) - बहुश्रेयस्याम्।

**अङ्यन्तत्वान्न सुलोपः, अतिलक्ष्मीः । शेषं बहुश्रेयसीवत् । कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी, क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप् ।**

लक्ष्मीशब्द औणादिक ईप्रत्ययान्तः, 'लक्ष्मीमतिक्रान्तः' इति विग्रहे समासेन निष्पन्न अतिलक्ष्मी-शब्दो ङ्यन्तो नास्ति, अतस्तस्मात् परस्य हल्ङ्यादिलोपो न भवति । यथा-

अतिलक्ष्मी सु - अतिलक्ष्मी स् - अतिलक्ष्मीस् - अतिलक्ष्मीर् - अतिलक्ष्मीः । पूर्वं स्त्रियां प्रयुक्तत्वस्य सम्प्रत्युपसर्जनत्वेऽपि नदीसंज्ञा भवति । शेषरूपाणि बहुश्रेयसीवज्ज्ञेयानि ।

कुमारीमिच्छन्कुमारीवाचरन् वा ब्राह्मणः कुमारी, ङ्यन्तत्वे सति कृत्प्रत्ययव्युत्पन्नोऽयं पुंबोधको ब्राह्मणवाचिशब्दो पूर्वं स्त्र्याख्यो नदीसंज्ञको भवति । सौ हल्ङ्यादिलोपे- कुमारी ।

इयङुवङादेशविधायकं विधिसूत्रम्-

**अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ६ । ४ । ७७**

**श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे । "ङिच्च" इत्यन्तादेशः । आन्तरतम्यादेरियङ्, ओरुवङ् । इति इयङि प्राप्ते ।**

इश्च उश्चेति यू, तयोः - य्वोः, इवर्णोवर्णयोरित्यर्थः । श्नुश्च धातुश्च भ्रूश्चेति द्वन्द्वः । प्रत्ययग्रहणपरिभाषया श्नुप्रत्ययान्तं विवक्षितम् । य्वोरिति धातोरेव विशेषणं, ततस्तदन्तविधिः । श्नुभ्रूवोस्तु नित्यमुवर्णान्तत्वान्न तद्विशेषणम् । इवर्णान्तत्वं तु असंभवान्न तद्विशेषणम्, संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवदिति न्यायात् । अङ्गस्येत्यधिकृतम्, ततश्च प्रत्यये परत इति लभ्यते । अचीति तद्विशेषणं । तदादिविधिः । तथा च- अजादिप्रत्यये परे सति श्नु-प्रत्ययान्तस्याङ्गस्य, इवर्णान्तस्य उवर्णान्तस्य च धातोरङ्गस्य, 'भ्रू' इति शब्दरूपाङ्गस्य च स्थाने 'इयङ्', 'उवङ्' इत्येतौ आदेशौ भवत इति सूत्रार्थः । उभयोरेव आदेशयोर्ङकार इत्संज्ञकः, अकारश्च उच्चारणार्थः, 'इय्', 'उव्' इत्येतौ अवशिष्येते । ङित्वात् "ङिच्च" इत्यनेन स्थानिनः अन्त्यस्य वर्णस्य (इवर्ण-उवर्णयोः) स्थाने एतौ आदेशौ विधीयेते । आन्तरतम्यात् तालुस्थानकस्य इवर्णस्य स्थाने तादृश एव 'इय्' आदेशो भवति, ओष्ठस्थानकस्य उवर्णस्य च स्थाने तादृश एव 'उव्' आदेशो भवति । अतः श्नुप्रत्ययान्तस्य, भ्रूशब्दस्य च विषये उवर्णान्तत्वाद् उवङादेशः, तथैव उवर्णान्तधातूनां विषयेऽपि उवङादेश एव । इयङादेशस्तु इवर्णान्तधातूनामेव । विधिरयं यण्-गुण-वृद्धिविधिभिर्बाध्यते, अतस्तेषां निषेधानन्तरमेवास्य प्रसक्तिर्बोध्या । कुमारी + औ, इत्यत्रानेन इयङि प्राप्ते-

यणादेशविधायकं विधिसूत्रम्-

**एरनेकाचोऽसंयोगपूर्वस्य ६ । ४ । ८२**

**धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे । इति यण्– कुमार्यौ । कुमार्यः । हे कुमारि । अमि शसि च । कुमार्यम् । कुमार्यः । कुमार्यै । कुमार्याः २ । कुमारीणाम् । कुमार्याम् । प्रधीः । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यः । उन्नयतीत्युन्नीः । धातुना संयोगस्य विशेषणादिह स्यादेव यण् । उन्न्यौ । उन्न्यः । हे उन्नीः । उन्न्यम् । ङेराम् । उन्न्याम् । एवं ग्रामणीः ।**

**अनेकाचः किम्। नीः। नियौ। नियः। अमि शसि च परत्वादियङ्। नियम्। नियः। ङेराम्। नियाम्। असंयोगपूर्वस्य किम्। सुश्रियौ। यवक्रियौ। गतिकारकेतरपूर्वपदस्य यण्नेष्यते (वा.)। शुद्धधियौ। परमधियौ। कथं तर्हि दुर्धियो वृश्चिकभियेत्यादि। उच्यते। दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। वृश्चिकसंबन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा।**

अनेकाचः = एकः अच् यस्मिन् स एकाच्, न एकाच् अनेकाच्, तस्य = एकाज्भिन्नस्य। असंयोगपूर्वस्य = पूर्वस्मिन् संयोगो यस्य स संयोगपूर्वः, न संयोगपूर्वः असंयोगपूर्वः, तस्य = यस्य पूर्वस्मिन् भागे संयोगो न भवति तस्य। एः = 'इ' इत्यस्य षष्ठ्येकवचनम् = इवर्णान्तस्य इत्यर्थः। धातोः = धातु-शब्दस्य षष्ठ्येकवचनम्। अचि = अच्-शब्दस्य सप्तम्येकवचनम् = अच्-वर्णे परे इत्यर्थः। यण् = यण्-शब्दस्य प्रथमैकवचनम् = यण् आदेशो भवतीत्यर्थः। यण्, अच् इत्येतौ प्रत्याहारौ।

यदि अङ्गमनेकाज् वर्तते, तस्याङ्गस्यान्ते धातुरस्ति, तस्य च धातोरन्ते धातोरवयव इवर्णो विद्यते, तस्य च इवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्याङ्गस्यान्त्यवर्णस्य स्थाने यणादेशो भवति, अजादि-प्रत्यये परे सति इति सूत्रार्थः।

कुमारी + औ - कुमार्यौ (अनेन यण्)। जसि- कुमार्यः। सम्बुद्धौ- हे कुमारि। अमि शसि च- कुमार्यम्, कुमार्यः। यण्विधिस्तु सर्वत्रैव "एरनेकाच-' इति सूत्रेण बोध्यम्। कुमार्या। कुमार्यै। कुमार्याः। कुमार्याः। कुमार्योः। कुमारीणाम्। कुमार्याम्।

प्रकृष्टेन ध्यायतीति विग्रहे प्रोपसर्गपूर्वकाद् ध्यैधातोः "ध्यायतेः संप्रसारणं च" इति क्विपि सर्वापहारलोपे यकारस्य संप्रसारणमिकारः, 'संप्रसारणाच्च' इति पूर्वरूपम्, 'हलः' इति दीर्घः, कृदन्तत्वेन प्रातिपदिकत्वात् सुबुत्पत्तिः। अङ्यन्तत्वान्न सुलोपः। अजादौ सर्वत्र "एरनेकाचः-" इति यणेव। अस्त्रीत्वान्नदीकार्यं न। प्रधीः। प्रध्यौ। प्रध्यः। प्रध्यम्। प्रध्यौ। प्रध्यः। इत्यादि।

एवमेव ग्रामं नयतीति विग्रहे ग्रामणीशब्दः प्रधीवत्, केवलं सप्तम्यां "ङेराम्-" इत्यत्र नीशब्दग्रहणान् ङेरामि 'ग्रामण्याम्' इति। एवमेव उन्नीशब्दस्यापि ग्रामणीवत्। नीशब्दस्य तु "अचिश्नु-" इति इयङादेशे- नीः। नियौ। नियः। नियम्। नियौ। नियः। इत्यादीनि रूपाणि जायन्ते।

सुष्ठु ध्यायतीति, सु = शोभना धीर्यस्येति वा विग्रहे सु इत्युपसर्गपूर्वकाद् ध्यैधातोः क्विप्प्रत्ययेन सुधीशब्दो निष्पद्यते। सुप्रत्यये- सुधीः। अजादौ विभक्तौ-

यणादेशनिषेधविधायकं विधिसूत्रम्-

**न भूसुधियोः ६।४।८५**

**एतयोर्यण् न स्यादचि सुपि। सुधियौ। सुधियः इत्यादि। सखायमिच्छति सखीयति। ततः क्विप्।**

**अल्लोपयलोपौ।अल्लोपस्य स्थानिवत्त्वाद्यणि प्राप्ते।क्वौ लुप्तं न स्थानिवत् (वा.)।एकदेशविकृतस्यानन्यतयाऽनङ्णित्वे। सखा। सखायौ। सखायः। हे सखीः। अमि पूर्वरूपात्परत्वाद्यणि प्राप्ते ततोऽपि परत्वात्सख्युरसंबुद्धाविति प्रवर्त्तते। सखायम्। सखायौ। शसि यण्। सख्यः। सह खेन वर्तत इति सखः। तमिच्छतीति सखीः। सुखमिच्छतीति**

**सुखीः । सुतमिच्छतीति सुतीः । सख्यौ । सुख्यौ । सुत्यौ । ख्यत्यादिति दीर्घस्यापि ग्रहणादुकारः । सख्युः । सुख्युः । सुत्युः । लूनमिच्छतीति लूनीः । क्षाममिच्छतीति क्षामीः । प्रस्तीममिच्छतीति प्रस्तीमीः । एषां ङसिङसोर्यण् । नत्वमत्वयोरसिद्धत्वात्ख्यत्यादित्युत्वम् । लून्युः । क्षाम्युः । प्रस्तीम्युः । शुष्कीयतेः क्विप् । शुष्कीः । इयङ् । शुष्कियौ । शुष्कियः । ङसिङसोः । शुष्किय इत्यादि । इतीदन्ताः । शम्भुर्हरिवत् । एवं विष्णुवायुभान्वादयः ।**

अजादि-सुप्प्रत्यये परे सति भू-शब्दस्य, सुधी-शब्दस्य चाङ्गस्य यणादेशो न भवति । भू-सुधीशब्दयोः अजादि-सुप्प्रत्ययेषु "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" इत्यनेन प्राप्तौ उवङ्-इयङादेशौ बाधित्वा "एरनेकाचोऽसंयोगपूर्वस्य" इत्यनेन यणादेशे प्राप्तेऽनेन तस्य निषेधः क्रियते, ततः 'बाधकाभावे पुनरुत्सर्गशास्त्रस्य प्रवृत्तिः' इति न्यायेन पुनः उवङ्-इयङौ आदिश्येते ।

सुधी औ, इत्यवस्थायाम् इयङादेशं बाधित्वा यणि प्राप्तेऽनेन सूत्रेण तस्य निषेधे च पुनरियङादेशे- सुध् इय् औ, सुधियौ । जसादौ अपि अजादिविभक्तिषु इयङादेशो बोध्यः ।

सुखमिच्छति, इत्यर्थे क्यच्प्रत्यये सुखी-शब्दो निष्पद्यते, तथैव सुतमिच्छतीति सुती । एतयोः सिद्धिप्रक्रियायामियङादेशं बाधित्वा यणादेशो विधीयते, परन्तु खी-तीशब्दान्तत्वान् ङसि-ङस्विभक्त्योः यणादेशात् पश्चात् "ख्यत्यात्परस्य" इत्यनेन उत्वमपि भवतीति विशेषप्रक्रिया । शेषविभक्तिषु एतयो रूपाणि प्रधीवन्निष्पद्यन्ते ।

| **समासेन निष्पन्नस्य नदीसंज्ञकस्य बहुश्रेयसीशब्दस्य रूपावलिः** | | | **कृत्प्रत्ययेन निष्पन्नस्य नदीसंज्ञकस्य कुमारीशब्दस्य रूपावलिः** | | |
|---|---|---|---|---|---|
| बहुश्रेयसी | बहुश्रेयस्यौ | बहुश्रेयस्यः | कुमारी | कुमार्यौ | कुमार्यः |
| बहुश्रेयसीम् | बहुश्रेयस्यौ | बहुश्रेयसीन् | कुमार्यम् | कुमार्यौ | कुमार्यः |
| बहुश्रेयस्या | बहुश्रेयसीभ्याम् | बहुश्रेयसीभिः | कुमार्या | कुमारीभ्याम् | कुमारीभिः |
| बहुश्रेयस्यै | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः | कुमार्यै | कुमारीभ्याम् | कुमारीभ्यः |
| बहुश्रेयस्याः | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः | कुमार्याः | कुमारीभ्याम् | कुमारीभ्यः |
| बहुश्रेयस्याः | बहुश्रेयस्योः | बहुश्रेयसीनाम् | कुमार्याः | कुमार्योः | कुमारीणाम् |
| बहुश्रेयस्याम् | बहुश्रेयस्योः | बहुश्रेयसीषु | कुमार्याम् | कुमार्योः | कुमारीषु |
| हे बहुश्रेयसि | हे बहुश्रेयस्यौ | हे बहुश्रेयस्यः | हे कुमारि | हे कुमार्यौ | हे कुमार्यः |

| कृत्प्रत्ययेन निष्पन्नस्य प्रधीशब्दस्य रूपावलिः | | | कृत्प्रत्ययेन निष्पन्नस्य सुधीशब्दस्य रूपावलिः | | |
|---|---|---|---|---|---|
| प्रधीः | प्रध्यौ | प्रध्यः | सुधीः | सुधियौ | सुधियः |
| प्रध्यम् | प्रध्यौ | प्रध्यः | सुधियम् | सुधियौ | सुधियः |
| प्रध्या | प्रधीभ्याम् | प्रधीभिः | सुधिया | सुधीभ्याम् | सुधीभिः |
| प्रध्ये | प्रधीभ्याम् | प्रधीभ्यः | सुधिये | सुधीभ्याम् | सुधीभ्यः |
| प्रध्यः | प्रधीभ्याम् | प्रधीभ्यः | सुधियः | सुधीभ्याम् | सुधीभ्यः |
| प्रध्यः | प्रध्योः | प्रध्याम् | सुधियः | सुधियोः | सुधियाम् |
| प्रध्यि | प्रध्योः | प्रधीषु | सुधियि | सुधियोः | सुधीषु |
| हे प्रधीः | हे प्रध्यौ | हे प्रध्यः | हे सुधीः | हे सुधियौ | हे सुधियः |

## प्रयोगसिद्धिप्रकारः

### बहुश्रेयस्यै

बहुश्रेयसीशब्दस्य “कृत्तद्धितसमासाश्च” इति सूत्रेण प्रातिपदिकसंज्ञायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तौ अनुबन्धलोपे “यू स्त्र्याख्यौ नदी” इत्यनेन “प्रथमलिङ्गग्रहणञ्च” इति सहकारेण नदीसंज्ञायाम् “आण्नद्याः” इत्यनेन आडागमेऽनुबन्धलोपे ‘बहुश्रेयसी + आ ए’ इति जाते “आटश्च” इत्यनेन वृद्धौ ‘बहुश्रेयसी + ऐ’ इति जाते “इको यणचि” इति सूत्रेण यणि वर्णयोगे ‘बहुश्रेयस्यै’ इति रूपं सिद्धम् ।

### प्रध्याम्

प्रधीशब्दस्य “कृत्तद्धितसमासाश्च” इति सूत्रेण प्रातिपदिकसंज्ञायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ ‘प्रधी + आम्’ इत्यवस्थायाम् “अचि श्नुधातुभ्रुवां य्वोरियङुवङौ” इत्यनेन प्राप्तमियङादेशं प्रबाध्य “एरनेकाचोऽसंयोगपूर्वस्य” इति सूत्रेण यणि वर्णयोगे ‘प्रध्याम्’ इति रूपं सिद्धम् ।

### सुधियि

सुधीशब्दस्य “कृत्तद्धितसमासाश्च” इति सूत्रेण प्रातिपदिकसंज्ञायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इत्यनेन सप्तम्या एकवचने ङिविभक्तौ अनुबन्धलोपे ‘सुधी + इ’ इति जाते “अचि श्नुधातुभ्रुवां य्वोरियङुवङौ” इत्यनेन प्राप्तमियङादेशं प्रबाध्य “एरनेकाचोऽसंयोगपूर्वस्य” इत्यनेन यणि प्राप्ते “न भूसुधियोः” इति सूत्रेण तन्निषेधे बाधकाभावे पूर्वोक्तसूत्रेणैव ईकारस्य स्थाने इयङादेशेऽनुबन्धलोपे ‘सुधिय् + इ’ इति जाते वर्णयोगे ‘सुधियि’ इति रूपं सिद्धम् ।

# अभ्यासः

## १. निम्नसूत्राणां सरलार्थं लिखत

(क) यू स्त्र्याख्यौ नदी

(ख) अम्बार्थनद्योर्ह्रस्वः

(ग) आण्नद्याः

(घ) ङेराम्नद्याम्नीभ्यः

(ङ) एरनेकाचोऽसंयोगपूर्वस्य

## २. निम्नाङ्कितप्रश्नानामुत्तराणि दत्त

(क) 'यू स्त्र्याख्यौ नदी' इत्यनेन स्त्रियां प्रयुक्तस्य शब्दस्य नदीसंज्ञाविधानात्, बहुश्रेयसीशब्दस्य पुंवाचितया कथं नदीत्वमिति स्पष्टं कुरुत ।

(ख) 'अतिलक्ष्मीः' इत्यत्र सुलोपाभावे कारणं लिखत ।

(ग) अस्मिन् पाठे प्रयुक्तस्य कुमारीशब्दस्यार्थः कः ?

(घ) सुधीशब्दस्य निष्पत्तिः कथं भवति ?

(ङ) ग्रामणीशब्दस्य नदीसंज्ञाभावेऽपि 'ङि' इत्यस्य स्थाने आमादेशे कारणं लिखत ।

## ३. परस्परं मेलयत

| | |
|---|---|
| ङिद्विभक्तौ | आमादेशः |
| ङिविभक्तौ | आडागमः |
| सम्बुद्धौ | वृद्धिः |
| आटोऽचि परे | ह्रस्वः |
| इकारोकारयोः | इयङुवङादेशौ |

## ४. शब्दरूपावलिं पूरयत

| | | |
|---|---|---|
| अतिलक्ष्मीः | अतिलक्ष्म्यौ | अतिलक्ष्म्यः |
| ... | अतिलक्ष्म्यौ | ... |
| अतिलक्ष्म्या | ... | अतिलक्ष्मीभिः |

| | | |
|---|---|---|
| ... | अतिलक्ष्मीभ्याम् | अतिलक्ष्मीभ्यः |
| अतिलक्ष्म्याः | अतिलक्ष्मीभ्याम् | अतिलक्ष्मीभ्यः |
| ... | अतिलक्ष्म्योः | ... |
| ... | अतिलक्ष्म्योः | अतिलक्ष्मीषु |
| ... | हे अतिलक्ष्म्यौ | हे अतिलक्ष्म्यः |

## ५. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत

(क) 'आण्नद्याः' इति सूत्रेण ..................... विधीयते । (आण्, आट्)

(ख) प्रधी-शब्दस्य सम्बुद्धौ ..................... इति रूपं भवति । (प्रधीः, प्रधि)

(ग) 'ग्रामण्यौ' इत्यत्र ..................... इत्यनेन यण् भवति । (इको यणचि, एरनेकाचोऽसंयोगपूर्वस्य)

(घ) 'नियाम्' इत्यत्र ..................... भवति । (आडागमः, नुडागमः)

(ङ) 'सुश्रियौ' इत्यत्र ..................... यण् न भवति । (संयोगपूर्वत्वात्, एकाच्त्वात्)

## ६. निम्नाङ्कितानां ससूत्रं सिद्धिप्रकारं लिखत

प्रध्यम्, सुधियाम्, कुमार्यः ।

सप्तविंशः पाठः

# उवर्णान्तशब्दस्य रूपसिद्धिप्रक्रिया

पुँल्लिङ्गे प्रयुक्ता उकारान्ताः शब्दा नित्यं घिसंज्ञका भवन्ति । अतस्तेषां रूपाण्यपि हरिशब्दस्येव प्रक्रियया निष्पद्यन्ते । शम्भुशब्दस्य रूपनिष्पत्तिप्रकारो यथा-

शम्भु + सु - शम्भु + स् - शम्भुर् - शम्भुः । शम्भु + औ - शम्भू (पूर्वसवर्णदीर्घः) । शम्भु + जस् - शम्भु + अस् - शम्भो + अस् (जसि च) - शम्भव् + अस् - शम्भवस् - शम्भवर् -शम्भवः । सम्बोधने- शम्भु + सु - शम्भु + स् - शम्भो + स् (ह्रस्वस्य गुणः) - शम्भो (एङ्ह्रस्वात् सम्बुद्धेः) - हे शम्भो, इत्यादि । हरिशम्भुशब्दयोर्गुणे उकारस्थाने ओकारादेशः, यणि उकारस्थाने वकारादेशः, ओकारस्य अवादेशमात्रमेव विशेषः, न तु प्रक्रियायां भिन्नत्वमिति बोध्यम् । एवमेव विष्णुवायुभानुगुर्वादयः ।

तृज्वद्भावविधायकमतिदेशसूत्रम्-

**तृज्वत्क्रोष्टुः ७ । १ । ९५**

**क्रोष्टुस्तृजन्तेन तुल्यं वर्ततेऽसम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ।**

प्रत्ययग्रहणपरिभाषया तृच् इत्यनेन तृजन्तं गृह्यते । तेन तुल्यमिति तृतीयान्ताद्वतिः । इतोऽत्सर्वनामस्थाने इत्यतः सर्वनामस्थाने इति सख्युरसंबुद्धौ इत्यतोऽसंबुद्धाविति चानुवर्तेते । तदाह- क्रोष्टुस्तृजन्तेनेत्यादिना । **कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः । व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते ।** इति व्यतिदेशाः सप्त, तत्र प्राधान्यादिह तृजन्तरूपमेव अतिदिश्यते, तच्च न कर्तृ, भर्तृ इत्यादि तृजन्तं रूपं, किन्तु क्रोष्टृ इत्येव तृजन्तरूपमतिदिश्यते । क्रुश्धातोरुपस्थिततत्वाद् अर्थत आन्तर्याच्चेत्यभिप्रेत्य फलितमाह- क्रोष्टुशब्दस्य स्थाने....इत्यादिः । सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति 'क्रोष्टु' इति शब्दस्य तृज्वद्भावो भवति अर्थात् क्रोष्टु-शब्दस्य स्थाने क्रोष्टृ-शब्दः प्रयोगे आगच्छतीति सूत्रार्थः ।

शृगालवाचकात् क्रोष्टुशब्दात् सौ, अनेन क्रोष्टृ इत्यादेशे 'क्रोष्टृ स्' इति स्थिते-

गुणादेशविधायकं विधिसूत्रम्-

**ऋतो ङिसर्वनामस्थानयोः ७ । ३ । ११०**

**ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात् । इति प्राप्ते ।**

ङि-प्रत्यये, सर्वनामस्थानसंज्ञकप्रत्यये च परे सति ऋकारान्तस्याङ्गस्यान्त्यवर्णस्य गुणो भवति । "उरण् रपरः" इति रपरत्वम् । अनेन गुणादेशे प्राप्ते-

अनङादेविधायकं विधिसूत्रम्-

**ऋदुशनस्पुरुदंसोऽनेहसां च ७।१।९४**

**ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।**

सम्बुद्धिभिन्ने सर्वनामस्थाने परे ऋकारान्तानां शब्दानाम्, उशनस्-शब्दस्य, पुरुदंसस्-शब्दस्य, अनेहस्-शब्दस्य च अन्त्यवर्णस्य स्थाने 'अनङ्' इत्यादेशो भवति। ङित्वादन्त्यवर्णस्य स्थाने विधीयते। उशनस् = दैत्यगुरोः शुक्राचार्यस्य वाचकः शब्दः। पुरुदंसस् = मार्जारस्य वाचकः शब्दः। अनेहस् = समयस्य वाचकः शब्दः।

दीर्घादेशविधायकं विधिसूत्रम्-

**अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६।४।११**

**अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्। उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्भवति तर्हि नप्त्रादीनामेव। तेन पितृभ्रातृप्रभृतीनां न। उद्गातृशब्दस्य तु भवत्येव "समर्थ-" सूत्रे 'उद्गातारः' इति भाष्यप्रयोगात्। क्रोष्टा, क्रोष्टारौ, क्रोष्टारः। क्रोष्टारम्, क्रोष्टारौ, क्रोष्टून्।**

सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति तृन्-तृच्प्रत्ययान्तशब्दानाम्, अप्, स्वसृ, तप्तृ, नेष्टृ, त्वष्टृ, क्षतृ, होतृ, पोतृ, प्रशास्तृ इत्येतेषां शब्दानां च अङ्गस्य उपधाया दीर्घो भवति। अप् = जलवाचकः शब्दः। स्वसृ = भगिनीवाचकः शब्दः। नप्तृ = पौत्रवाचकः, दौहित्रवाचकश्च शब्दः। नेष्टृ = ऋत्विग्विशेषवाचकः शब्दः। त्वष्टृ = प्रजापतिवाचकः शब्दः। क्षतृ = सारथिवाचकः शब्दः। होतृ = ऋत्विग्वाचकः शब्दः। पोतृ = ऋत्विग्विशेषवाचकः शब्दः। प्रशास्तृ = राजवाचकः शब्दः। अत्र नप्त्रादिशब्दानाम् उणादितृन्तृजन्तत्वेन व्युत्पादितत्वात् तृजन्तत्वेनैव दीर्घे सिद्धे किमर्थं नप्त्रादीनां पृथग्ग्रहणमिति जिज्ञासायामाह- नप्त्रादिग्रहणमिति।

क्रोष्टु सु - क्रोष्टु स् - क्रोष्टृ स् (तृज्वत्क्रोष्टुः) - कोष्टन् स् (ऋदुशनस्पुरुदंसोऽनेहसां च) - कोष्टान् स् (अप् तृन्तृच्.........) - कोष्टान् (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्) - कोष्टा (नलोपः प्रातिपदिकान्तस्य)। क्रोष्टु औ - क्रोष्टृ औ (तृज्वत्क्रोष्टुः) - कोष्टर् औ (ऋतो ङिसर्वनामस्थानयोः) - कोष्टार् औ (अप्तृन्तृच्.........) - कोष्टारौ। एवमेव जसि- क्रोष्टारः, अमि- क्रोष्टारम्, औटि- क्रोष्टारौ। सम्बोधनैकवचने तु सर्वनामस्थाने सत्यपि तृज्वद्भावस्य अविधानाद् विष्णुवदेव 'हे क्रोष्टो' इति।

शस्विभक्तौ तृज्वद्भावाभावे विष्णुवत्- क्रोष्टून्।

विभाषया तृज्वद्भावविधायकमतिदेशसूत्रम्-

**विभाषा तृतीयादिष्वचि ७।१।९७**

**अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा, क्रोष्ट्रे।**

तृतीयाविभक्तः सप्तमीविभक्तिषु (टा इत्यारभ्य सुप्-पर्यन्तेषु) आजादिषु प्रत्ययेषु परेषु क्रोष्टु-शब्दस्य विकल्पेन तृज्वद्भावो भवति। अनेन सूत्रेण तृज्वद्भावपक्षे क्रोष्टु-शब्दस्य स्थाने क्रोष्टृ-शब्दादेशे विशेषप्रक्रिया वर्तते, पक्षान्तरे तु विष्णुशब्दवद् रूपाणि ज्ञेयानि।

क्रोष्टु टा - क्रोष्टु आ - क्रोष्टृ आ (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् आ (इको यणचि) - क्रोष्ट्रा । पक्षे- क्रोष्टुना । क्रोष्टु ङे - क्रोष्टु ए - क्रोष्टृ ए (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ए (इको यणचि) - क्रोष्ट्रे । पक्षे- क्रोष्टवे ।

उकारैकादेशविधायकं विधिसूत्रम्-

**ऋत उत् ६ । १ । १११**

**ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात् । रपरत्वम् ।**

ऋकारात्, लृकारात् च ङसि-प्रत्ययस्य, ङस्-प्रत्ययस्य च अकारे परे सति पूर्वपरयोः स्थाने उकार एकादेशो भवति । 'उरण् रपरः' इत्यनेन रपरत्वेन ऋकार-अकारयोः स्थाने 'उर्' इति, लृकार-अकारयोः स्थाने च 'उल्' इत्येतौ आदिश्येते ।

संयोगान्तलोपनियामकं सूत्रम्-

**रात्सस्य ८ । २ । २४**

**रेफात्संयोगान्तस्य सस्यैव लोपः, नान्यस्य । इतिरेफस्य विसर्गः । क्रोष्टुः । आमि परत्वात्तृज्वद्भावे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' क्रोष्टूनाम् इति रूपम् । क्रोष्टरि । क्रोष्ट्रोः । पक्षे हलादौ च शम्भुवत् । इत्युदन्ताः ॥**

पदान्ते विद्यमानस्य संयोगस्य प्रथमवर्णः (उपान्त्यवर्णः) यदि रेफः अस्ति चेत् तस्मात् परस्य केवलं सकारस्य एव लोपो भवति, सकारभिन्नवर्णानां तु लोपो न भवति । पदान्तस्य संयोगान्तस्य वर्णस्य "संयोगान्तस्य लोपः" इत्यनेनैव लोपे सिद्धेऽस्य सूत्रस्य पाठो नियमार्थो विद्यते इति "सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति" इति परिभाषया अवगम्यते ।

क्रोष्टु ङसि/ङस् - क्रोष्टु अस् - क्रोष्टृ अस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् उर् स् (ऋत उत्) - क्रोष्टुर् (रात्सस्य) - क्रोष्टुः । पक्षे- क्रोष्टोः । क्रोष्टु ओस् - क्रोष्टृ ओस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ओस् (इको यणचि) - क्रोष्ट्रोस् - क्रोष्ट्रोर् - क्रोष्ट्रोः । पक्षे- क्रोष्ट्वोः । क्रोष्टु आम्, इत्यवस्थायाम्, नुडागमस्य अपेक्षया परत्वाद् अनेन सूत्रेण विकल्पेन तृज्वद्भावे प्राप्ते, "नुमचिरतृज्वभावेभ्यो नुट् पूर्वविप्रतिषेधेन" इति वार्तिकेन पूर्वं नुडागमे 'क्रोष्टु नाम्' इत्यवस्थायां "नमि" इति दीर्घे 'क्रोष्टूनाम्' इति एकमेव रूपं सिद्ध्यति । ङिविभक्तौ तु- क्रोष्टु ङि - क्रोष्टु इ - क्रोष्टृ इ (विभाषा तृतीयादिष्वचि) - क्रोष्टर् इ (ऋतो ङिसर्वनामस्थानयोः) - क्रोष्टरि । पक्षे- क्रोटौ । उकारान्तपुंलिङ्गशब्दसिद्धिप्रक्रिया समाप्ताः ।

अथ ऊकारान्तपुंलिङ्गशब्दाः ।

**हूहूः, हूह्वौ, हूह्वः । हूहूम्, हूह्वौ, हूहून् इत्यादि ।**

हूहू-शब्दो गन्धर्वविशेषवाचकः, ऊकारान्तः, पुंलिङ्गश्च । अस्य रूपाण्यजादौ सामान्येन यणि कृते अमि शसि च यणं प्रबाध्य क्रमेण पूर्वरूपे पूर्वसवर्णदीर्घे च कृते सम्पद्यन्ते ।

हूहू सु - हूहू स् - हूहूस् - हूहूर् - हूहूः । हूहू औ - हूहू औ - हूहू् व् औ - हूहृवौ । ('दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधः) । अन्यत्रापि विशेषकार्यं नास्ति ।

**अतिचमूशब्दे तु नदीकार्यं विशेषः, हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचम्वाः । अतिचमूनाम् । अतिचम्वाम् । खलपूः ।**

अतिचमू-शब्दस्य तु चमू-शब्दान्तत्वात् तस्य च नित्यं स्त्रीलिङ्गे वर्तमानत्वात् नदीसंज्ञा भवति । तेन नदीसंज्ञाप्रयुक्तकार्याणि तस्य सिद्धिप्रक्रियायां जायन्ते इति बोध्यम् । अन्यत्र तु हूहूवदेव । अतिचमू ङे - अतिचमू ए - अतिचमू आट् (आ) ए (आण्नद्याः) - अतिचमू ऐ (आटश्च) - अतिचम् व् ऐ - अतिचम्वै ।

खलपू-प्रातिपदिकात् सुप्रत्यये- खलपूः । औ-प्रत्यये पूर्वसवर्णदीर्घस्य निषेधानन्तरं यणं बाधित्वा ऊकारस्य उवङादेशे प्राप्ते-

यणादेशविधायकं विधिसूत्रम्-

**ओः सुपि ६ । ४ । ८३**

**धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि ।**

**"गतिकारकेतरपूर्वपदस्य यण् नेष्यते (वा) खलप्वौ, खलप्व इत्यादि । एवं सुल्वादयः ।**

**अनेकाचः किम् ? लूः, लुवौ, लुवः । धात्ववयव इति किम् ? उल्लूः, लल्वौ, उल्वः । असंयोगपूर्वस्य किम् ? कटप्रूः, कटप्रुवौ, कटप्रुवः । गति इत्यादि किम् ? परमलुवौ । सुपि किम् ? लुलुवतुः । स्वभूः । न भूसुधियोः । स्वभुवौ, स्वभुवः । एवं स्वयम्भूः ।**

"एरनेकाचः-" इति सूत्रम् एरितिवर्जमनुवर्तते । "अचि श्नुधातु-" इत्यतोऽचीत्यनुवृत्तम् । तेन सुपीति विशेष्यते । तदादिविधिः । "इणो यण्" इत्यतो यणित्यनुवर्तते । यदि अङ्गमनेकाज् वर्तते, तस्याङ्गस्यान्ते धातुरस्ति, तस्य च धातोरन्ते धातोरवयव उवर्णो विद्यते, तस्य चोवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्याङ्गस्यान्त्यवर्णस्य स्थाने यणादेशो भवति, अजादि-प्रत्यये परे सतीत्यर्थः ।

अनेन उवङादेशं बाधित्वा ऊकारस्य यणि- खलप् व् औ, खलप्वौ । एवमेव अन्यासु अजादिषु विभक्तिष्वपि बोध्यम् ।

एवमेव सुष्ठु लूनातीत्यर्थे सुलूशब्दस्यापि खलपूवद् रूपाणि जायन्ते । केवलस्य लूशब्दस्य तु अङ्गस्यानेकाचोऽभावात्- लूः, लुवौ, लुवः इत्युवङ्विशिष्टानि रूपाणि । धात्ववयवसंयोगपूर्वस्य यण् न भवति, तेन उपसर्गेण संयोगे तु भवत्येव । उल्लूः । उल्ल्वौ । उल्ल्वः । असंयोगपूर्वस्य इति वचनात् कटप्रूशब्दस्य यण् न । कटप्रूः । कटप्रुवौ । कटप्रुवः । गतिकारकपूर्वस्यैव यण् इति वचनात् परमलूशब्दस्य यण् न, अत्र परमशब्दस्य गतिकारकव्यतिरिक्तत्वात् ।

स्वभू-शब्दस्य त्वनेन सूत्रेण यणि प्राप्ते 'न भूसुधियोः' इत्यनेन निषेधाद् बाधकाभावे ऊकारस्य स्थाने ऊवङादेशो विधीयते, तेन अजादौ विभक्तौ स्वभुवौ, स्वभुवः इत्यादीनि रूपाणि निष्पद्यन्ते । एवमेव स्वयंभू शब्दस्यापि । वर्षाभूशब्दस्य सौ रुत्वे विसर्गे वर्षाभूः ।

यणादेशविधायकं विधिसूत्रम्-

**वर्षाभ्वश्च ६ । ४ । ८४**

**अस्योवर्णस्य यण् स्यादचि सुपि ।**

"न भूसुधियोः" इति निषेधस्य प्रतिषेधार्थमिदम् । अजादिसुप्प्रत्यये परे सति 'वर्षाभू' इति शब्दस्यान्त्यवर्णस्य स्थाने यणादेशो भवति । मण्डुकपर्यायाद् वर्षाभू-प्रातिपदिकाद् औप्रत्यये, उवङादेशं बाधित्वा अनेन यणि- वर्षाभ्वौ । एवमन्यत्रापि अजादौ विभक्तौ ।

**दृभतीति दृन्भूः । "अन्दूदृम्भूजबमुकफेलूककर्कन्धूदिदिधिषूः" इत्युणादिसूत्रेण निपातितः । दृन्भ्वौ । दृन्भ्वः । दृन्भूम् । दृन्भ्वौ । दृन्भून् । शेषं हूहूवत् । "दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः" (वा) । दृन्भ्वम् । दृन्भ्व इत्यादि । खलपूवत् । करभूः । करभ्वम् । करभ्वः । दीर्घपाठे तु करः एव कारः । स्वार्थिकः प्रज्ञाद्यण् । कारभ्वम् । कारभ्वः । पुनर्भूर्यौगिकः पुंसि । पुनर्भ्वौ इत्यादि । दृग्भू-काराभूशब्दौ स्वयम्भूवत् । इत्यूदन्ताः ॥**

दृम्भू-करभू-पुनर्भू-शब्दानामजादि-सुप्-प्रत्यये परेऽन्त्यवर्णस्य यणादेशो भवतीति वार्तिकार्थः । औ-प्रत्ययादिषु अनेन उवङादेशं बाधित्वा यणि कृते- दृम्भ्वौ, करभ्वौ, पुनर्भ्वौ इत्यादि रूपाणि जायन्ते । ऊकारान्तपुंलिङ्गशब्दसिद्धिप्रक्रिया समाप्ताः ।

| **शम्भुशब्दस्य रूपावली** | | |
|---|---|---|
| शम्भुः | शम्भू | शम्भवः |
| शम्भुम् | शम्भू | शम्भून् |
| शम्भुना | शम्भुभ्याम् | शम्भुभिः |
| शम्भवे | शम्भुभ्याम् | शम्भुभ्यः |
| शम्भोः | शम्भुभ्याम् | शम्भुभ्यः |
| शम्भोः | शम्भ्वोः | शम्भूनाम् |
| शम्भौ | शम्भ्वोः | शम्भुषु |
| हे शम्भो / | हे शम्भू / | हे शम्भवः / |

| क्रोष्टुशब्दस्य रूपावली | | |
|---|---|---|
| क्रोष्टा | क्रोष्टारौ | क्रोष्टारः |
| क्रोष्टारम् | क्रोष्टारौ | क्रोष्टून् |
| क्रोष्ट्रा<br>क्रोष्टुना | क्रोष्टुभ्याम् | क्रोष्टुभिः |
| क्रोष्ट्रे<br>क्रोष्टवे | क्रोष्टुभ्याम् | क्रोष्टुभ्यः |
| क्रोष्टुः<br>क्रोष्ट्रोः | क्रोष्टुभ्याम् | क्रोष्टुभ्यः |
| क्रोष्टुः<br>क्रोष्ट्रोः | क्रोष्ट्रोः<br>क्रोष्ट्वोः | क्रोष्टूनाम् |
| क्रोष्टरि<br>क्रोष्टौ | क्रोष्ट्रोः<br>क्रोष्ट्वोः | क्रोष्टुषु |
| हे क्रोष्टो / | हे क्रोष्टारौ / | हे क्रोष्टारः/ |

| स्वयम्भूशब्दस्य रूपावली | | |
|---|---|---|
| स्वयम्भूः | स्वयम्भुवौ | स्वयम्भुवः |
| स्वयम्भुवम् | स्वयम्भुवौ | स्वयम्भुवः |
| स्वयम्भुवा | स्वयम्भूभ्याम् | स्वयम्भूभिः |
| स्वयम्भुवे | स्वयम्भूभ्याम् | स्वयम्भूभ्यः |
| स्वयम्भुवः | स्वयम्भूभ्याम् | स्वयम्भूभ्यः |
| स्वयम्भुवः | स्वयम्भुवोः | स्वयम्भुवाम् |
| स्वयम्भुवि | स्वयम्भुवोः | स्वयम्भूषु |
| हे स्वयम्भूः / | हे स्वयम्भुवौ / | हे स्वयम्भुवः / |

# प्रयोगसिद्धिप्रकारः

### शम्भुना

शम्भुशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया एकवचने टाविभक्तौ टकारस्य 'चुटू' इत्यनेनेत्संज्ञायां "तस्य लोपः" इति लोपे "शेषो घ्यसखि" इति सूत्रेण घिसंज्ञायां शम्भु + आ इत्यत्र "आङो नाऽस्त्रियाम्" इति सूत्रेण आकारस्य नादेशे शम्भुना इति रूपं सिद्धम् ।

### क्रोष्टा

क्रोष्टुशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ उकारस्येत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे क्रोष्टु + स् इति जाते "तृज्वत्क्रोष्टुः" इति सूत्रेण तृज्वद्भावे क्रोष्टृ + स् इति जाते "ऋतो ङिसर्वनामस्थानयोः" इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य "ऋदुशनस्पुरुदंसोऽनेहसां च" इति सूत्रेण अनङादेशेऽनुबन्धलोपे क्रोष्टन् + स् इति जाते "अप्तृन्तृच्-" इति सूत्रेणोपधाया दीर्घे क्रोष्टान् + स् इति जाते "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सूत्रेण सकारस्य लोपे "नलोपः प्रातिपदिकान्तस्य" इत्यनेन नकारलोपे क्रोष्टा इति रूपं सिद्धम् ।

### क्रोष्टुः/क्रोष्टोः

क्रोष्टुशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण पञ्चम्या एकवचने ङसिविभक्तौ अनुबन्धलोपे "विभाषा तृतीयादिष्वचि" इति सूत्रेण विकल्पेन तृज्वद्भावे क्रोष्टृ + अस् इति जाते "ऋत उत्" इति सूत्रेण ऋकाराकारयोः स्थाने उदेकादेशे रपरे च कृते क्रोष्टुर् स् इति जाते "रात्सस्य" इति सहयोगेन "संयोगान्तस्य लोपः" इत्यनेन सकारस्य लोपे रेफस्य "खरवसानयोर्विसर्जनीयः" इत्यनेन विसर्गे क्रोष्टुः इति रूपम्, तृज्वद्भावाभावपक्षे क्रोष्टु + अस् इत्यत्र "शेषो घ्यसखि" इत्यनेन घिसंज्ञायां " घेर्ङिति" इत्यनेन गुणे "ङसिङसोश्च" इत्यनेन पूर्वरूपैकादेशे सकारस्य रुत्वे विसर्गे क्रोष्टोः रूपद्वयं सिद्धम् ।

# अभ्यासः

१. **निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) घिसंज्ञानिमित्तानि कार्याणि कस्यां कस्यां विभक्तौ भवन्ति सोदाहरणं लिखत ।

(ख) पुँल्लिङ्गे प्रयुक्तस्य अतिचमूशब्दस्य नदीसंज्ञा भवति न वा तत्र कारणञ्च निर्दिशत ।

(ग) ऊकारान्तशब्देषु अजादौ सुपि परे यणो विधायकं सामान्यं सूत्रं लिखत ।

(घ) 'ओं सुपि' इत्यनेनैव ऊकारान्तेषु यण्विधानाद् "वर्षाभ्वश्च" इति सूत्रं किमर्थम् ?

(ङ) सिद्धिप्रक्रियामनुसृत्य उकारान्तपुँल्लिङ्गशब्दानां कियान् विभागः कर्तुं शक्यते ?

२. **परस्परं मेलयत**

| S | V | U |
|---|---|---|
| शम्भवे | आडागमः | घेर्ङिति |
| क्रोष्टारौ | यण् | ऋतो ङिसर्वनामस्थानयोः |
| अतिचम्वै | गुणः | आण्नद्याः |
| खलप्वम् | गुणः | ओःसुपि |
| हे शम्भू | पूर्वसवर्णदीर्घः | प्रथमयोः पूर्वसवर्णः |

३. **अधोलिखितानां ससूत्रं रूपसिद्धिप्रकारो दर्शनीयः**

शम्भूनाम्, क्रोष्ट्रे, क्रोष्टरि, स्वयम्भूवाम्

४. **शम्भुस्वयम्भूशब्दयोः रूपाणि कण्ठतः श्रावयत ।**

# ऋकारान्तादिशब्दानां रूपसिद्धिप्रक्रिया

अथ ऋकारान्त-पुंलिङ्गशब्दानां रूपाणि निष्पाद्यन्ते। अस्मिन् क्रमे कृततृज्वद्भावस्य क्रोष्टृ-शब्दस्य रूपसिद्धिप्रक्रियायां प्रयुक्तानि सूत्राणि उपयुज्यन्ते।

**धाता। हे धातः! धातारौ। धातारः।**

'दधाति' इत्यर्थे तृच्-प्रत्ययेन निष्पन्नो धातृ-शब्दो ब्रह्मवाची वर्तते। तस्मात् सु-प्रत्यये-

धातृ सु - धातृ स् - धातन् स् (गुणं बाधित्वा अनङ्) - धातान् स् - (अप्तृन्......) - धातान् (हल्ङ्यादिलोपः) - धाता (न लोपः प्रातिपदिकान्तस्य)।

धातृ औ - धातर् औ (ऋतो ङिसर्वनामस्थानयोः) - धातार् औ (अप्तृन्.......) - धातारौ। एवं धातारः, धातारम्, धातारौ। सम्बुद्धौ तु 'ऋदुशनस्...' इति अनङादेशस्य अप्राप्तौ, 'अप्तृन्...' इति उपधादीर्घस्य च अप्रसङ्गात्-

धातृ सु - धातृ स् - धातर् स् (ऋतो ङिसर्वनामस्थानयोः) - धातर् (रात्सस्य) - धातः। अन्यासु आम्भिन्नेषु अजादिप्रत्ययेषु क्रोष्टृशब्दवत् प्रक्रिया अवलम्बनीया।

आम्-प्रत्यये- धातृ आम्, धातृ नाम् (ह्रस्वनद्यापो नुट्), धातॄ नाम् (नामि), इत्यवस्थायाम्-

**ऋवर्णान्नस्य णत्वं वाच्यम् (वा.) धातॄणामित्यादि। एवं नप्त्रादयः। उद्गातारौ। पिता। व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः। पितरौ, पितरः। पितरम्, पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हे नः।**

समानपदे ऋवर्णात् परस्य नकारस्य णत्वं भवति, अव्यवधाने सति, सह्यव्यवधाने सत्यपीति वार्तिकार्थः।

अनेन वार्तिकेन नकारस्य णत्वे- धातॄणाम्। हलादौ विभक्तौ तु विभक्तियोजनादिकमेव कार्यम्- धातृभ्याम्, धातृभिः, धातृभ्यः, धातृषु। एवमेव नप्तृ-नेष्टृ-त्वष्टृ-क्षत्र-होतृ-पोतृ-प्रशास्तृशब्दानाम्। तृच्प्रत्ययान्तानां कर्तृ-गन्तृ-भोक्तृ-द्रष्टृ-रक्षितृ-पक्तृ-श्रोतृ-वक्त्रादीनामपि रूपाणि जायन्ते। उद्गातृशब्दस्यापि भाष्यप्रामाण्यात् तृजन्तं मत्वा उद्गाता, उद्गातारौ, उद्गातारः, इति दीर्घत्वयुतानि रूपाणि जायन्ते।

पितृ-शब्दस्य तु औणादिकतृन्प्रत्ययत्वाद् "अप्तृन्-" इत्यनेन उपधादीर्घो न भवति, तेन औ, जस्, अम्, औट् इत्येतेषु प्रत्ययेषु पितरौ, पितरः, पितरम्, पितरौ इति धातृशब्दाद् भिन्नप्रक्रियया रूपणि जायन्ते। यथा-

पितृ औ - पितर् औ (गुणः) - पितरौ। इत्यादि। शेषविभक्तिषु धातृवत्। जामातृ-भ्रातृ-शब्दौ अपि पितृवत् सिद्ध्यन्ति।

मनुष्यवाचकस्य नृ-शब्दस्य आम्-प्रत्ययं विहाय सर्वत्रैव पितृवद् रूपाणि निष्पद्यन्ते । यथा- ना, नरौ, नरः, हे नः, नरम्, नरौ नृन्, न्रा इत्यादि । आमि तु-

विभाषया दीर्घादेशविधायकं विधिसूत्रम्-

**नृ च ६ । ४ । ६**

**'नृ' इत्येतस्य नामि वा दीर्घः स्यात् । नृणाम्, नृणाम् ।**

षष्ठीबहुवचने नाम्-प्रत्यये परे सति नृ-शब्दस्याङ्गस्यान्त्यवर्णस्य दीर्घो भवति । नाम् = नुडागमसहित आम् । 'नामि' इत्यनेन प्राप्तं नित्यं दीर्घं बाधित्वाऽनेन विकल्पेन दीर्घः । "सकृद्गतौ विप्रतिषेधेन यद् बाधितं तद् बाधितमेव" इति परिभाषया "नामि" इत्यस्य पुनःप्रवृत्तिर्न ।

नृ आम् - नृ नाम् (ह्रस्वनद्यापो नुट्) - नृ नाम् (नृ च) - नॄनाम् - नॄणाम् (ऋवर्णान्नस्य णत्वं वाच्यम्) । पक्षे- नृणाम् । ऋकारान्तपुंलिङ्गशब्दसिद्धिप्रक्रिया समाप्ताः ।

अथ ॠकारान्तपुंलिङ्गशब्दाः ।

**कॄ तॄ अनयोरनुकरणे प्रकृतिवदनुकरणम्** (प.) **इति वैकल्पिकातिदेशादित्त्वे रपरत्वे । कीः । किरौ । किरः । तीः । तिरौ । तिरः । इत्यादि गीर्वत् । इत्त्वाऽभावपक्षे तु ऋदुशनस् इति ऋतो ङीति च तपरकरणादनङ्गुणौ न । कॄः । क्रौ । क्रः । कॄम् । क्रौ । कॄन् । क्रा । क्रे इत्यादि । इत्यृदन्ताः ।**

**गम्लृ शक्लृ अनयोरनुकरणेऽनङ् । गमा । शका । गुणविषये तु लपरत्वम् । गमलौ । गमलः । गमलम् ।**

**गमलौ । गमॄन् । गम्ला । गम्ले । ङसिङसोस्तु ऋत उदित्युत्त्वे लपरत्वे संयोगान्तस्य लोपः । गमुल् ।**

**शकुलित्यादि । इति लृदन्ताः ।**

**इना सह वर्तते इति सेः । सयौ । सयः । स्मृतेः । स्मृतयौ । स्मृतयः । इत्येदन्ताः ।**

"ऋतो ङिसर्वनामस्थानयोः" "ऋदुशनस्पुरुदंसोऽनेहसां च" इत्यनयोः सूत्रयोः ऋकारस्य तपरकरणाद् ॠकारान्ते तयोरप्रवृत्तौ कॄः । क्रौ । क्रः । कॄम् । क्रौ । कॄन् । क्रा । कॄभ्याम् । कॄभिः । इत्यादि । "प्रकृतिवदनुकरणं भवति" इति परिभाषया "कॄ" "तॄ" इत्येतयोर्धात्वोरनुकरणे "ॠत इद्धातोः" इत्यनेन इत्वे रपरे कीः । किरौ । किरः । तीः । तिरौ । तिरः । इत्यादि गीर्वत् । ॠकारान्तपुंलिङ्गाः समाप्ताः ।

अथ लृकारान्तपुंलिङ्गशब्दाः ।

'गृम्लृ शक्लृ' अनयोरनुकरणे अनङ् । गमा । शका । गुणविषये तु लपरत्वम् । गमलौ । गमलः । गमलम् । गमलौ । गमॄन्, अत्र पूर्वसवर्णदीर्घे ॠकारैकादेशः । गम्ला । गम्ले । ङसिङसोस्तु "ऋत उत्" इत्युत्वे लपरत्वे "संयोगान्तस्य लोपः' गमुल् । शकुल् । इत्यादि । लृकारान्तपुंलिङ्गाः समाप्ताः ।

अथ एकारान्तपुंलिङ्गशब्दाः ।

सेः । सयौ । सयः । स्मृतेः । स्मृतयौ । स्मृतयः । स्मृतयम् । स्मृतयौ । स्मृतयः । स्मृतया । स्मृतेभ्याम् । स्मृतेभिः । एकारान्तपुंलिङ्गशब्दाः समाप्ताः ।

अथ ओकारान्तपुंलिङ्गशब्दाः ।

णिद्वद्भावविधायकमतिदेशसूत्रम्-

**गोतो णित् ७ । १ । ९०**

**गोशब्दात्परं सर्वनामस्थानं णिद्वत् स्यात् । गौः । गावौ । गावः ।**

गो-शब्दस्य ओकाराद् विहितस्य सर्वनामस्थान-प्रत्ययस्य णिद्वद्भावो भवति । "अचो ञ्णिति" इत्यनेन वृद्धिविधानार्थोऽयं णिद्वद्भावः ।

गो सु - गो स् - अनेन णित्वे- गौ स् (अचो ञ्णिति) - गौस् - गौर् - गौः । गो औ - अनेन णित्वे- गौ औ (अचो ञ्णिति) - ग् आव् औ - गावौ । गो जस् - गो अस् - अनेन णित्वे- गौ अस् (अचो ञ्णिति) - ग् आव् अस् - गावस्- गावर् - गावः ।

आकारैकादेशविधायकं विधिसूत्रम्-

**औतोऽम्शसोः ६ । १ । ९३**

**आ ओत इति छेदः । ओकारादम्शसोरचि परे, आकार एकादेशः स्यात् । शसा साहचर्यात् सुबेवाम् गृह्यते, तेन नेह– अचिनवम् । असुनवम् । गाम्, गावौ, गाः । गवा । गवे । गोः इत्यादि । ओतो णिदिति वाच्यम्, विहितविशेषणं च । तेन सुद्यौः, सुद्यावौ, सुद्यावः । सुद्यामित्यादि । ओकारान्ताद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह– हे भानो ! हे भानवः ! उः शम्भुः स्मृतो येन सः स्मृतौः, स्मृतावौ, स्मृतावः । स्मृताम्, स्मृतावौ, स्मृताः इत्यादि । इत्योदन्ताः ।**

ओकारान्त-शब्दात् परस्य द्वितीयाविभक्तेः अम्-प्रत्ययस्य, शस्-प्रत्ययस्य च अच्-वर्णे परे पूर्वपरयोः स्थाने आकार एकादेशो भवति । गो-शब्दाद् आम्-प्रत्यये णित्वात् प्राप्तां वृद्धिं बाधित्वा अनेन आकार एकादेशो विधीयते । यथा-

गो अम् - ग् आ म् (औतोऽम्शसोः) - गाम् । गो शस् - गो अस् - ग् आ स् (औतोऽम्शसोः) - गास् - गार् - गाः । गो टा - गो आ - ग् अव् आ (एचोऽयवायावः) - गवा । गो ङे - गो ए- ग् अव् ए (एचोऽयवायावः) - गवे । गो ङसि/ङस् - गो अस - गोस् (ङसिङसोश्च) - गोर् - गोः, अवादेशं बाधित्वा पूर्वरूपम् । शेषेषु अजादिषु प्रत्ययेषु अवादेशेन गवोः, गवाम्, गवि इति सिद्ध्यन्ति । हलादिषु तु विभक्तियोजनेन गोभ्याम्, गोभिः, गोभ्यः, गोषु इति ।

"ओतो णिदिति वाच्यम्" (वा.) ओकारान्ताद्विहितं सर्वनामस्थानं णिद्वत्स्यादित्यर्थः । तेन हि-

सु = शोभना द्यौर्यस्येति बहुव्रीहौ सुद्योशब्दः पुँलिङ्गः । सुद्यौः । सुद्यावौ । सुद्यावः । ओकारान्तपुंलिङ्गशब्दाः समाप्ताः ।

अथ ऐकारान्तपुंलिङ्गो धनवाचको रै-शब्दः ।

आकारान्तादेशविधायकं विधिसूत्रम्-

**रायो हलि ७ । २ । ८५**

**रैशब्दस्याकारोऽन्तादेशः स्याद्धलि विभक्तौ । अचि आयादेशः । राः । रायौ । रायः । रायम् । रायौ । रायः । राया । राभ्यामित्यादि । इत्यैदन्ताः ।**

हलादिविभक्तिषु परेषु रै-शब्दस्य अन्त्यवर्णस्य (ऐकारस्य) स्थाने आकार आदेशो भवति । अजादौ विभक्तौ आयादेशेन रायौ, रायः, रायम् इत्यादीनि रूपाणि निष्पद्यन्ते । हलादौ त्वनेन आकारान्तादेशे कृते रै-शब्दो रा-शब्दे परिवर्तते । यथा-

रै सु - रै स् - रा स् (रायो हलि) - रास् - रार् - राः । एवं हे राः, राभ्याम्, राभिः, राभ्यः, रासु । ओकारान्तपुंलिङ्गशब्दसिद्धिप्रक्रिया समाप्ता ।

अथ औकारान्तपुंलिङ्गश्चन्द्रवाचको ग्लौ-शब्दः ।

**ग्लौः । ग्लावौ । ग्लावः । ग्लावम् । ग्लावौ । ग्लावः । इत्यादि ।**

ग्लौ-शब्दे विशेषकार्याभावाद् विभक्तियोजनानन्तरं सन्धिकार्यम्, रुत्वसत्वादिकार्यमेव विधातव्यम् । यथा-

ग्लौ सु - ग्लौ स् - ग्लौस् - ग्लौर् - ग्लौः । एवं हे ग्लौः, ग्लौभ्याम्, ग्लौभिः, ग्लौभ्यः, ग्लौषु । ग्लौ औ - ग्ल् आव् औ - ग्लावौ । एवं ग्लावः, ग्लावम्, ग्लावौ, ग्लावः, ग्लावा इत्यादि ।

**औतोऽम्शसोरितीह न प्रवर्तते । ऐऔजिति सूत्रेण ओदौतोः सावर्ण्याऽभावज्ञापनात् । इत्यौदन्ताः ।**

औकारान्तपुंलिङ्गशब्दसिद्धिप्रक्रिया समाप्ता ।

॥ इत्यजन्तपुंलिङ्गाः ॥

| धातृशब्दस्य रूपावलिः | | | पितृशब्दस्य रूपावलिः | | |
|---|---|---|---|---|---|
| धाता | धातारौ | धातारः | पिता | पितरौ | पितरः |
| धातारम् | धातारौ | धातॄन् | पितरम् | पितरौ | पितॄन् |
| धात्रा | धातृभ्याम् | धातृभिः | पित्रा | पितृभ्याम् | पितृभिः |
| धात्रे | धातृभ्याम् | धातृभ्यः | पित्रे | पितृभ्याम् | पितृभ्यः |
| धातुः | धातृभ्याम् | धातृभ्यः | पितुः | पितृभ्याम् | पितृभ्यः |
| धातुः | धात्रोः | धातॄणाम् | पितुः | पित्रोः | पितॄणाम् |
| धातरि | धात्रोः | धातृषु | पितरि | पित्रोः | पितृषु |
| हे धातः | हे धातारौ | हे धातारः | हे पितः | हे पितरौ | हे पितरः |

| गोशब्दस्य रूपावलिः | | |
|---|---|---|
| गौः | गावौ | गावः |
| गाम् | गावौ | गाः |
| गवा | गोभ्याम् | गोभिः |
| गवे | गोभ्याम् | गोभ्यः |
| गोः | गोभ्याम् | गोभ्यः |
| गोः | गवोः | गवाम् |
| गवि | गवोः | गोषु |
| हे गौः | हे गावौ | हे गावः |

## प्रयोगसिद्धिप्रकारः

### नृणाम्/नॄणाम्

नृशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ 'नृ + आम्' इत्यत्र "ह्रस्वनद्यापो नुट्" इति सूत्रेण नुडागमेऽनुबन्धलोपे 'नृ + नाम्' इति स्थिते "नामि" इत्यनेन नित्यं दीर्घे प्राप्ते तं प्रबाध्य "नृ च" इत्यनेन विकल्पेन दीर्घे "ऋवर्णान्नस्य णत्वं वाच्यम्" इति वार्तिकेन णत्वे 'नॄणाम्' इति रूपम्, दीर्घाभावपक्षे 'नृणाम्' इति रूपद्वयं सिद्धम् ।

### धातारः

धातृशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तौ जकारस्य "चुटू" इत्यनेनेत्संज्ञायां "तस्य लोपः" इत्यनेन लोपे 'धातृ + अस्' इत्यवस्थायां "ऋतो ङिसर्वनामस्थानयोः" इति सूत्रेण गुणे रपरत्वे 'धातर् + अस्' इति जाते "अप्तृन्तृच्-" इति सूत्रेणोपधाया दीर्घे 'धातारस्' इति जाते सकारस्य रुत्वे विसर्गे 'धातारः' इति रूपं सिद्धम् ।

### गाः

गोशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन प्रातिपदिकसंज्ञायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण शस्विभक्तौ शकारस्य "लशक्वतद्धिते" इत्यनेनेत्संज्ञायां "तस्य लोपः" इति सूत्रेण लोपे 'गो + अस्' इति जाते "औतोऽम्शसोः" इति सूत्रेण पूर्वपरयोराकारैकादेशे 'गास्' इति जाते सकारस्य रुत्वे विसर्गे 'गाः' इति रूपं सिद्धम् ।

## अभ्यासः

### १. निम्नाङ्कितसूत्राणां सरलार्थं लिखत

(क) नृ च

(ख) गोतो णित्

(ग) औतोऽम्शसोः

(घ) रायो हलि

(ङ) सर्वनामस्थाने चासंबुद्धौ

### २. अधो लिखितप्रश्नानामुत्तराणि दत्त

(क) धातृपितृशब्दयो रूपसिद्धिप्रक्रियायां कुत्र कुत्र पार्थक्यम् ?

(ख) "गोतो णित्" इत्यनेन कासां विभक्तीनां णिद्वद्भावो भवति ?

(ग) 'धातृणाम्' इत्यत्र केन णत्वं भवति ?

(घ) ओकारान्तशब्दात् सर्वनामस्थानविभक्तीनां णिद्वद्भावो भवतीत्यत्र कारणं लिखत ।

(ङ) एकारान्तशब्दानामजादौ विभक्तौ सर्वत्र को विधिर्भवति ?

## ३. परस्परं मेलयत

| | |
|---|---|
| पिता | प्रथमयोः पूर्वसवर्णः |
| धातॄन् | एचोऽयवायावः |
| गौः | रायो हलि |
| राभ्याम् | अचो ञ्णिति |
| ग्लावाम् | न लोपः प्रातिपदिकान्तस्य |

## ४. रिक्तस्थानं पूरयत

| | | |
|---|---|---|
| वक्ता | ... | वक्तारः |
| ... | ... | वक्तॄन् |
| वक्त्रा | वक्तृभ्याम् | वक्तृभिः |
| ... | वक्तृभ्याम् | ... |
| ... | वक्तृभ्याम् | वक्तृभ्यः |
| वक्तुः | वक्त्रोः | ... |
| ... | वक्त्रोः | वक्तृषु |
| हे वक्तः | हे वक्तारौ | ... |

## ५. निम्नाङ्कितानां ससूत्रं रूपसाधनप्रकारं लिखत

ना, राभिः, गाम्, ग्लावः, हे धातः, पिता ।

## ६. भ्रातृशब्दस्य रूपावलिं लिखत ।

## अथाजन्तस्त्रीलिङ्गप्रकरणम्

# आबन्तशब्दस्य रूपसिद्धिप्रक्रिया- १

रमते इति विग्रहे 'रमु क्रीडायाम्' इत्यस्मादच्प्रत्यये स्त्रीत्वविवक्षायाम् "अजाद्यतष्टाप्" इत्यनेन टापि कृते निष्पन्नस्य रमाशब्दस्य कृत्तद्धितभिन्नप्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि "ङ्याप्प्रातिपदिकात्" इति ङ्यापो पृथग्ग्रहणात्, "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" वा स्वादयो जायन्ते । रमाशब्दात्सौ तस्यानुबन्धलोपे आबन्ततया "हल्ङ्याब्भ्यः-" इत्यनेन सलोपे 'रमा' इति सिद्ध्यति ।

रमाशब्दाद् औविभक्तौ 'रमा + औ' इति जाते प्रकृतेरङ्गसंज्ञायाम्-

शी इत्यादेशविधायकं विधिसूत्रम्-

**औङ आपः ७ । १ । १८**

**आबन्तादङ्गात्परस्यौङः शी स्यात् । औङ् इत्यौकारविभक्तेः संज्ञा । रमे । रमाः ।**

आप्-प्रत्ययान्ताद् अङ्गात् परयोः औ-औट्प्रत्यययोः स्थाने सर्वादेशरूपेण 'शी' आदेशो भवति । शकारस्य "लशक्वतद्धिते" इत्यनेन इत्संज्ञायां लोपे 'ई' इत्येव अवशिष्यते ।

रमा औ - रमा शी - रमा ई - रमे । जस्-प्रत्यये तु सवर्णदीर्घं बाधित्वा प्राप्तस्य पूर्वसवर्णदीर्घस्य "दीर्घाज्जसि च" इत्यनेन निषेधे पुनः सवर्णदीर्घो विधीयते । रमा जस् - रमा अस् - रमास् (अकः सवर्णे दीर्घः) - रमार् - रमाः । सम्बोधने सुविभक्तावनुबन्धलोपे, संबुद्धिसंज्ञायाम्-

एत्वादेशविधायकं विधिसूत्रम्-

**सम्बुद्धौ च ७ । ३ । १०६**

**आप एकारः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः । हे रमे ! हे रमे ! हे रमाः । रमाम् । रमे । रमाः । स्त्रीत्वान्नत्वाभावः ।**

सम्बोधनस्यैकवचनप्रत्यये परे आबन्तस्याङ्गस्यान्त्यवर्णस्य स्थाने एकारादेशो भवति । अनेन एत्वे कृते "एङ्ह्रस्वात् सम्बुद्धेः" इत्यनेन सम्बुद्धिसंज्ञकस्य हल्वर्णस्य लोपो विधीयते ।

रमा सु - रमा स् - रमे स् - रमे । द्विवचन-बहुवचनयोस्तु प्रथमावद् बोध्यम् । रमा अम् - रमाम् (अमि पूर्वः) । शस्-प्रत्यये पूर्वसवर्णदीर्घे स्त्रीलिङ्गत्वात् सकारस्य नत्वं न प्रवर्तते । रमा शस् - रमा अस् - रमास् (प्रथमयोः पूर्वसवर्णः) - रमार् - रमाः ।

एत्वादेशविधायकं विधिसूत्रम्-

**आङि चापः ७ । ३ । १०५**

**आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात् ।**

टा-प्रत्यये, ओस्-प्रत्यये च परे सति आबन्तस्याङ्गस्यान्त्यवर्णस्य स्थाने एकार आदिश्यते । अनेन एत्वे कृते "एचोऽयवायावः" इति अयादेशः ।

रमा टा - रमा आ - रमे आ - रम् अय् आ - रमया । रमा ओस् - रमे ओस् - रम् अय् ओस् - रमयोस् - रमयोर् - रमयोः । भ्यामादिहलादिषु विभक्तिषु तु विभक्तियोजनमेव कार्यम् ।

याडागमविधायकं विधिसूत्रम्-

**याडापः ७ । ३ । ११३**

**आपः परस्य ङिद्वचनस्य याडागमः स्यात् । "वृद्धिरेचि" रमायै । सवर्णदीर्घः । रमायाः, रमायाः, रमयोः, रमाणाम् । रमायाम्, रमयोः, रमासु । एवं दुर्गादयः ।**

आबन्तादङ्गादुत्तरस्य सुप्सम्बन्धिनो ङित्-प्रत्ययस्य 'याट्' इति आगमो भवति । टकारस्य इत्संज्ञायां लोपे 'या' इत्येवावशिष्यते, टित्वात् प्रत्ययस्याद्यवयवश्च भवति ।

रमा + ङे - रमा ए - रमा याट् (या) ए - रमा या ए - रमा यै (वृद्धिरेचि) - रमायै । रमा + ङसि/ङस् - रमा अस् - रमा याट् (या) अस् - रमा या अस् - रमा यास् (अकः सवर्णे दीर्घः) - रमायास् - रमायार् - रमायाः । रमा आम् - रमा नाम् (ह्रस्वनद्यापो नुट्) - रमाणाम् - रमाणाम् (अट्कुप्वाङ्नुम्व्यवायेऽपि) । रमा ङि - रमा इ - रमा आम् (ङेराम्नद्याम्नीभ्यः) - रमा याट् (या) आम् (याडापः) - रमा या आम् - रमा याम् - रमायाम् । एवमेव दुर्गा, अम्बिका इत्यादीनामपि आबन्तप्रातिपदिकानां सिद्धिप्रक्रिया ज्ञेया ।

अथ सर्वनामशब्दाः । सर्वशब्दाट्टापि सर्वाशब्दः सोऽपि प्रायेण रमावत् । ङिद्विभक्तिषु 'याडापः' इति याडागमे प्राप्ते तदपवादं सूत्रमाह-

स्याडागमस्य ह्रस्वादेशस्य च विधायकं विधिसूत्रम्-

**सर्वनाम्नः स्याड्ढ्रस्वश्च ७ । ३ । ११४**

**आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः । याटोऽपवादः । सर्वस्यै । सर्वस्याः । सर्वस्याः । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् "आमि सर्वनाम्नः-" इति सुट्- सर्वासाम् । सर्वस्याम् । सर्वयोः । सर्वासु । एवं विश्वादयोऽप्यादन्ताः ।**

सर्वनामसंज्ञकादाबन्तादङ्गात् परस्य ङित्-सुप्प्रत्ययस्य 'स्याट्' इति आगमो भवति, तथा चाङ्गस्यान्त्यवर्णस्य ह्रस्वोऽपि भवति । टकारस्यानुबन्धलोपे 'स्या' इत्येवावशिष्यते, स च टित्वात् प्रत्ययस्याद्यवयवत्वेन तिष्ठति । "याडापः" इत्यनेन याडागमे प्राप्ते सर्वनामशब्दानां विषयेऽनेन स्याडागमः, ह्रस्वश्च विधीयेते ।

सर्व-शब्दस्य स्त्रीलिङ्गे प्रयोगे टाप्-प्रत्ययेन 'सर्वा' इति आबन्तशब्दो निष्पद्यते, तस्य च लिङ्गविशिष्टपरिभाषया प्रातिपदिकसंज्ञायाम् आम्-ङिद्भिन्नविभक्तिषु रमावद् एव प्रक्रियया रूपाणि निष्पद्यन्ते । यथा- सर्वा, सर्वे, सर्वाः इत्यादि । ङिद्विभक्तिषु तु-

सर्वा ङे - सर्वा ए - सर्व स्या ए (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यै (वृद्धिरेचि) - सर्वस्यै । सर्वा ङसि/ङस् - सर्वा अस् - सर्व स्या अस् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यास् (अकः सवर्णे दीर्घः) - सर्वस्यार् - सर्वस्याः । आम्-प्रत्यये सर्वनामसंज्ञायाम्, नुडागमं बाधित्वा "आमि सर्वनाम्नः सुट्" इति सुडागमो भवति । यथा- सर्वा आम् - सर्वा साम् (नुटं बाधित्वा सुट्) - सर्वासाम् । आबन्तस्य सर्वाशब्दस्य सर्वादिगणे पाठाभावात् कथं सर्वनामत्वमिति जिज्ञासायामाह- वकारादकारस्य आपश्च योऽयमेकादेशः सवर्णदीर्घस्तस्यान्तादिवच्चेति पूर्वान्तत्वेन ग्रहणात् सर्वनामत्वमित्यर्थः । एवं तर्हि एकादेशनिष्पन्नस्य आकारस्य पूर्वान्तत्वे आप्त्वव्याघातादाबन्तत्वं न स्यात्, न च परादित्वेन आबन्तत्वमपीति वाच्यम्- "उभयत आश्रयणे नान्तादिवत्" इति निषेधादिति चेत् सत्यम्- लिङ्गविशिष्टपरिभाषया आबन्तस्य सर्वनामत्वम् । आबन्तत्वं तु परादिवद्भावेनेति विवेक्तव्यम् ।

सर्वा ङि - सर्वा इ - सर्वा आम् (ङेराम्नद्याम्नीभ्यः) - सर्व स्या आम् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्याम् (अकः सवर्णे दीर्घः) - सर्वस्याम् । एवं प्रकारेण विश्वादीनां सर्वनामशब्दानामपि स्त्रीलिङ्गे टापि कृते 'विश्वा' इत्यादिप्रातिपदिकानां रूपाणि सर्वावत् प्रक्रियया एव साधनीयानि । यथा- विश्वा, विश्वस्यै, विश्वस्याः, विश्वासाम्, विश्वस्याम् इत्यादि ।

विभाषया सर्वनामसंज्ञाविधायकं सूत्रम्-

**विभाषा दिक्समासे बहुव्रीहौ १ । १ । २८**

**अत्र सर्वनामता वा स्यात् । उत्तरपूर्वस्यै, उत्तरपूर्वायै । दिङ्नामान्यन्तराले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह- योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै । बहुव्रीहिग्रहणं स्पष्टार्थम् । अन्तरस्यै शालायै, बाह्यायै इत्यर्थः । अपुरि इत्युक्तेर्नेह- अन्तरायै नगर्यै ।**

दिक्शब्दमुच्चार्य विधीयमानस्य बहुव्रीहिसमासस्य सर्वनामसंज्ञा विकल्पेन भवति । उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालम् उत्तरपूर्वा । "दिङ्नामान्यन्तराले" इति बहुव्रीहिविशेषोऽयम् । 'उत्तरस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दिक्' इति विग्रहे वहुव्रीहिसमासेन निष्पन्नस्य उत्तरपूर्वशब्दस्य स्त्रीत्वे टापि उत्तरपूर्वा-प्रातिपदिकस्य "सर्वादीनि सर्वनामानि" इत्यनेन नित्यं सर्वनामसंज्ञायां प्राप्तायां तां बाधित्वा अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते । तेन ङिद्विभक्तिषु, आम्विभक्तौ चास्य शब्दस्य सर्वनामसंज्ञापक्षे सर्वावत्, तदभावे रमावत् रूपाणि जायन्ते । यथा- उत्तरपूर्वस्यै, उत्तरपूर्वायै इत्यादि ।

"दिङ्नामान्यन्तराले" इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह- योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै । प्रतिपदोक्तत्वेन "दिङ्नामानि-" इति बहुव्रीहेरेव ग्रहणसिद्धे बहुव्रीहिग्रहणं स्पष्टार्थम् । बहिर्योगेऽन्तराशब्दस्य सर्वनामत्वात्, अन्तरस्यै शालायै, बाह्यायै इत्यर्थः । "अन्तरं बहिर्योगेतिगणसूत्रेऽपुरीति वक्तव्यम्" इत्युक्तेर्नेह- अन्तरायै नगर्यै ।

स्याडागमविधायकं ह्रस्वादेशविधायकञ्च सूत्रम्-

**विभाषा द्वितीयातृतीयाभ्याम् ७ । ३ । ११५**

**आभ्यां ङितः स्याट् स्यादापश्च ह्रस्वः । इदं सूत्रं त्यक्तुं शक्यम् । तीयस्य ङित्सूपसंख्यानात् । द्वितीयस्यै, द्वितीयायै । द्वितीयस्याः, द्वितीयायाः । द्वितीयस्याः, द्वितीयायाः । द्वितीयस्याम्, द्वितीयायाम् । शेषं रमावत् ।**

**एवं तृतीया । "अम्बार्थनद्योर्ह्रस्वः" हे अम्ब ! हे अक्क ! हे अल्ल !**

**असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न (वा.) हे अम्बाडे ! हे अम्बाले ! हे अम्बिके !**

द्वितीया-तृतीया-प्रातिपदिकयोः "तीयस्य ङित्सु वा" इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायाम् उत्तरपूर्वावत् तयोरपि रूपाणि जायन्ते ।

मातृवाचकस्य अम्बा-शब्दस्य रूपाणि सम्बुद्धौ एव रमाशब्दाद् भिन्नप्रक्रियया निष्पद्यते, कारणं च अत्र "अम्बार्थनद्योर्ह्रस्वः" इत्यनेन ह्रस्वविधानम् । यथा- अम्बा सु (सम्बोधनैकवचनम्) - अम्बा स् - अम्ब स् (अम्बार्थनद्योर्ह्रस्वः) - अम्ब (एङ्ह्रस्वात् सम्बुद्धेः) - हे अम्ब । एवमेव, मातृवाचकयोः अक्का-अल्लाशब्दयोश्च हे अक्क, हे अल्ल इत्येते रूपे ज्ञेये । शेषविभक्तिषु एतेषां रूपाणि रमावत् ।

मातृवाचकत्वेऽपि अम्बाडा, अम्बाला, अम्बिका इति शब्दानान्तु "असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न" इति वार्तिकेन ह्रस्वनिषेधाद् सम्बुद्धौ रमावत् 'हे अम्बाडे, हे अम्बाले, हे अम्बिके' इति रूपाणि ।

| **रमाशब्दस्य रूपावलिः** | | | **सर्वाशब्दस्य रूपावलिः** | | |
|---|---|---|---|---|---|
| रमा | रमे | रमाः | सर्वा | सर्वे | सर्वाः |
| रमाम् | रमे | रमाः | सर्वाम् | सर्वे | सर्वाः |
| रमया | रमाभ्याम् | रमाभिः | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| रमायै | रमाभ्याम् | रामाभ्यः | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| रमायाः | रमाभ्याम् | रमाभ्यः | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| रमायाः | रमयोः | रमाणाम् | सर्वस्याः | सर्वयोः | सर्वासाम् |
| रमायाम् | रमयोः | रमासु | सर्वस्याम् | सर्वयोः | सर्वासु |
| हे रमे | हे रमे | हे रमाः | हे सर्वे | हे सर्वे | हे सर्वाः |

## प्रयोगसिद्धिप्रकारः

### रमायै

रमाशब्दस्य "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकत्वाद् एकत्वविवक्षायां "स्वौजसमौट्-" इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तावनुबन्धलोपे 'रमा + ए' इत्यवस्थायां "याडापः" इति सूत्रेण याडागमेऽनुबन्धलोपे 'रमा + या ए' इत्यवस्थायां "वृद्धिरेचि" इत्यनेन वृद्धौ 'रमायै' इति रूपं सिद्धम् ।

### रमयोः

रमाशब्दस्य "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकत्वाद् द्वित्वविवक्षायां "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या द्विवचने ओस्विभक्तौ 'रमा + ओस्' इति जाते "आङि चापः" इत्यनेन आकारस्य एत्वे 'रमे + ओस्' इति स्थिते "एचोऽयवायावः" इत्यनेन अयादेशे सकारस्य रुत्वे विसर्गे 'रमयोः' इति रूपं सिद्धम् ।

### सर्वस्याः

सर्वाशब्दस्य "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकत्वे सर्वनामत्वे च एकत्वविवक्षायां "स्वौजसमौट्-" इति सूत्रेण पञ्चम्या एकवचने ङसिविभक्तावनुबन्धलोपे 'सर्वा + अस्' इति जाते "याडापः" इत्यने याडागमे प्राप्ते तं प्रबाध्य "सर्वनाम्नः स्याड्ढ्रस्वश्च" इत्यनेन ङिद्विभक्तेः स्याडागमेऽनुबन्धलोपे प्रकृतेर्ह्रस्वे च कृते 'सर्व + स्या अस्' इति जाते "अकः सवर्णे दीर्घः" इत्यनेन दीर्घे 'सर्वस्यास्' इत्यवस्थायां सकारस्य रुत्वे विसर्गे 'सर्वस्याः' इति रूपं सिद्धम् ।

## अभ्यासः

१. **अधोऽङ्कितानां सूत्राणामर्थं लिखत**

(क) औङ आपः

(ख) आङि चापः

(ग) याडापः

(घ) सर्वनाम्नः स्याड्ढ्रस्वश्च

(ङ) विभाषा द्वितीयातृतीयाभ्याम्

२. **निम्नप्रश्नानामुत्तराणि लिखत**

(क) रमाशब्दस्य प्रातिपदिकत्वं केनोपायेन लभ्यते ।

(ख) ङिद्विभक्तयः काः ? तासामनुबन्धविनिर्मुक्तस्वरूपाणि च प्रदर्शयत ।

(ग) शस्विभक्तौ 'रमाः' इत्यत्र दीर्घः केन सूत्रेण भवति ?

(घ) 'सर्वस्यै' इत्यत्र सर्वाशब्दस्य आकारः कुत्र गतः ? स्पष्टं कुरुत ।

(ङ) "विभाषा द्वितीयातृतीयाभ्याम्" इदं सूत्रं केन हेतुना त्यक्तुं शक्यम् ?

## ३. परस्परं मेलयत

| | |
|---|---|
| रमे | सवर्णदीर्घः |
| रमया | सम्बुद्धिलोपः |
| रमायाः | आमादेशः |
| हे रमे | शीभावः |
| सर्वस्याम् | एत्वम् |

## ४. दुर्गाम्बिकाशब्दयो रूपाणि श्रावयत ।

## ५. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत

(क) आबन्तसर्वनामशब्दाद् ङिद्विभक्तेः ..................... विधीयते । (याडागमः, स्याडागमः)

(ख) 'औङ आपः' इति सूत्रं ..................... करोति । (एत्वम्, श्यादेशम्)

(ग) 'रमायाः' इत्यत्र ..................... भवति । (दीर्घः, वृद्धिः)

(घ) 'आङ्' इत्यनेन ..................... बोधो भवति । (टा-विभक्तेः, औट्-विभक्तेः)

(ङ) अल्ला-शब्दः ..................... वर्तते । (नदीसंज्ञकः, अम्बार्थकः)

(च) अदन्तप्रातिपदिकात् स्त्रीलिङ्गे ..................... भवति । (टाप्, ङीप्)

(छ) 'सम्बुद्धौ च' इति सूत्रम् ..................... करोति । (ह्रस्वम्, एत्वम्)

## ६. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत

लतया, कवितयोः, गीते, कथायाम्, उमायाः, उभयस्यै, कतमासाम्, परस्याम्, शिक्षिकाभिः ।

## ७. निम्नाङ्कितानां ससूत्रं रूपसाधनप्रकारं दर्शयत

रमा + टा - रमा + आ - रमे + आ - रमय् + आ - रमया ।

सर्वा + ङि - सर्वा + इ - सर्वा + आम्

सर्व + स्या + आम् - सर्वस्याम् ।

अम्बा + सु - अम्बा + स् - अम्ब + स् - हे अम्ब

त्रिंशः पाठः

# आबन्तशब्दस्य रूपसिद्धिप्रक्रिया- २

**जरा । जरसौ । शीभावात्परत्वाज्जरस् । आमि नुटः परत्वाज्जरस् । जरसामित्यादि । पक्षे हलादौ च रमावत् । इह पूर्वविप्रतिषेधेन शीभावं कृत्वा संनिपातपरिभाषाया अनित्यतां चाश्रित्य जरसी इति केचिदाहुस्तन्निर्मूलम् । यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्तततामाश्रित्य औङ् आपः । आङि चापः । याडापः । ह्रस्वनद्यापः- । ङेराम्- । इति पञ्चापि विधयः प्राप्ताः । एवं नस्निशपृत्सु । तथाप्यनल्विधावित्युक्तेर्न भवन्ति । आ आबिति प्रश्लिष्य आकाररुपस्यैवाऽऽपः सर्वत्र ग्रहणात् । एवं हल्ङ्यादिसूत्रेऽपि आ आप् ङी ई इति प्रश्लेषादतिखट्वो निष्कौशाम्बिरित्यादिसिद्धेर्दीर्घग्रहणं प्रत्याख्येयम् । नचैवमप्यतिखट्वायेत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम् । आबन्तं यदङ्गं ततः परस्य याड्विधानात् । उपसर्जनस्त्रीप्रत्यये तदादिनियमात् । पदन्न इति नासिकया नस् । नसः । नसा । नोभ्यामित्यादि । पक्षे सुटि च रमावत् । निशाया निश् । निशः । निशा ।**

"जृष् वयोहानौ" इत्यस्माद्धातोः "षिदि्भदादिभ्यः-" इत्यङि "ऋदृशोऽङि गुणः" इति गुणे रपरत्वे, अदन्तत्वात् टाप्, लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वे सुस्तस्य हल्ङ्यादिना लोपे 'जरा' इति रूपम् । जरसौ, शीभावात्परत्वाज्जरस् । आमि नुटः परत्वाज्जरस्, जरसामित्यादि । पक्षे हलादौ च रमावत् । इह पूर्वविप्रतिषेधेन शीभावं कृत्वा सन्निपातपरिभाषाया अनित्यतां चाश्रित्य "जरसी" इति केचिदाहुः तन्निर्मूलम् । यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्तततामाश्रित्य "औङ आपः" "आङि चापः" "याडापः" "ह्रस्वनद्यापः-" 'ङेराम्-" इति च पञ्चापि विधयः प्राप्ताः, एवं नस्निश्पृत्सु, तथाप्यनल्विधावित्युक्तेर्न भवन्ति । 'आ आप्' इति प्रश्लिष्याकाररूपस्यैवापः सर्वत्र ग्रहणात् ।

"विप्रतिषेधे परम्-" इत्यत्र परशब्दस्य इष्टवाचितामाश्रित्य क्वचित् (क्रोष्टूनाम्, इत्यादौ) पूर्वस्य प्रवृत्याश्रयणेऽपि अत्र पूर्वविप्रतिषेधेन शीभावो न भवति, पूर्वविप्रतिषेधाश्रयणेन जायमानानां विधीनां परिगणनयैवोक्तत्वात्, न च तत्र शीभावस्यान्तर्भावः । एवमेव सन्निपातपरिभाषायाः सर्वत्रानित्यत्वाश्रयणे प्रमाणाभावेन तस्य पक्षस्य निर्मूलत्वमुक्तम् । तथैव "आङि चापः" इत्यादिषु "आ आप्" इति सवर्णदीर्घेण आप् इति प्रश्लिष्य आकाररूपाबन्ताश्रयणेन एत्वादयो विधीयन्ते । ततश्च ते आकाररूपेणैव आपमाश्रयन्तीति तेषामल्विधित्वात् तेषु कर्तव्येषु जरसादेशस्य स्थानिवत्त्वादाबन्तत्वं न संभवति । ततश्च एत्वादिविधयोऽत्र न भवन्तीत्यर्थः ।

एवं 'हल्ङ्याप्-" इति सूत्रेऽपि "आ आप्" "ङी ई" इति प्रश्लेषाद् 'अतिखट्वः' 'निष्कौशाम्बिः' इत्यादिसिद्धेर्दीर्घग्रहणं प्रत्याख्येयम् । न चैवमपि 'अतिखट्वाय' इत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम्, आबन्तं यदङ्गं ततः परस्य याड्विधानात्, उपसर्जनस्त्रीप्रत्यये तदादिनियमात् ।

"याडापः" इत्यत्र हि आब्ग्रहणेन प्रत्ययग्रहणपरिभाषया आबन्तं गृह्यते, अङ्गस्येति तद्विशेषणं भवति, ततश्चाबन्तादङ्गात् परस्य ङितो याड् विधीयते । प्रकृते चातिखट्वायेत्यत्र खट्वशब्याददन्तात् टाब्विधानात्

खट्वा इत्येव टाबन्तम्, तत्तु ङितं विभक्तिं प्रति नाङ्गम्, अतिखट्वशब्दादेव ङिद्विभक्तेर्विधानात्। यत्त्वङ्गमतिखट्वेति न तट्टाबन्तम्। अतः स्थानिवत्त्वेन आप्त्वे सत्यपि न याडिति भावः।

नासिकाशब्दस्य सुटि, नासिका। नासिके। नासिकाः। नासिकाम्। नासिके। नासिका + शस् नासिका + अस् इत्यत्र "पद्दन्नो-" इति नासिकाया विकल्पे नसादेशः। नसः। नसा। नोभ्यामित्यादि। पक्षे रमावत्।

नासिका + शस् - नासिका अस् - नस् + अस् - नसस् - नसर् - नसः। नासिका + शस् - नासिका + अस् - नासिकास् - नासिकार् - नासिकाः। नासिका + टा - नासिका + आ - नस् + आ - नसा। नासिका + टा - नासिका + आ - नासिके + आ - नासिकय् + आ - नासिकया।

नासिका + भ्याम् - नस् + भ्याम् - नर् + भ्याम् - न उ + भ्याम् - नो + भ्याम् - नोभ्याम्। नासिका + भ्याम् - नासिकाभ्याम्। एवमन्यासु विभक्तिषु ज्ञेयम्।

निशा। निशे। निशाः। निशाम्। निशे। शसादौ निशाया निशादेशः। निशः। निशा।

षकारादेशविधायकं विधिसूत्रम्-

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८। २। ३६**

**व्रश्चादीनां सप्तानां छशान्तयोश्च षकारान्तादेशः स्याज्झलि पदान्ते च। षस्य जश्त्वेन डकारः। निड्भ्याम्। निड्भिः। सुपि "डः सि धुट्" इति पक्षे धुट्, चर्त्वम्, तस्यासिद्धत्वात् "चयो द्वितीयाः-" इति टतयोष्ठथौ न। "न पदान्ताट्टोरनाम्" इति ष्टुत्वं न। निट्त्सु, निट्सु।**

'निशा + भ्याम्' इत्यत्र "पद्दन्नो-" इति निशादेशे स्वादिष्विति पदसंज्ञायामनेन जश्त्वम्। निशा + भ्याम् - निश् + भ्याम् - निष् + भ्याम् - निड्भ्याम्। निशा + भ्याम् - निशाभ्याम्। निशा + भिस् - निश् + भिस् - निष् + भिस् - निड् + भिस् - निड्भिर् - निड्भिः। निशा + भिस् - निशाभिर् - निशाभिः। इत्यादि।

सुपि "ङः सि धुट्" इति पक्षे धुट्, चर्त्वम्, तस्यासिद्धत्वात् "चयो द्वितीयाः शरिः (वा.) इति टतयोष्ठथौ न। "न पदान्ताट्टोः-" इति ष्टुत्वं न। निशा + सुप् - निशा + सु - निश् + सु - निष् + सु - निड् + सु - निड् + ध् सु - निट् + ध् सु - निट्त्सु। निशा + सुप् - निशा + सु - निश् + सु - निष् + सु - निड् + सु - निट्सु। निशा + सुप् - निशा + सु - निशासु।

ककारादेशविधायकं विधिसूत्रम्-

**षढोः कः सि ८। २। ४१**

**षस्य ढस्य च कः स्यात्सकारे परे। इति तु न भवति, जश्त्वं प्रत्यसिद्धत्वात्।**

"झलां जशोऽन्ते" इत्यपेक्षया "षढोः कः सि" इत्यस्य परत्रैपादिकत्वादिति भावः।

**केचिन्तु व्रश्चादिसूत्रे "दादेर्धातोः-" इति सूत्राद् 'धातोः' इत्यनुवर्तयन्ति, तन्मते जश्त्वेन जकारे निज्भ्याम्, निज्भिः। "चोःकुः" इति कुत्वं तु न भवति। जश्त्वस्यासिद्धत्वात्। जश्त्वम्, श्चुत्वम्, चर्त्वम्- निच्छु, निच्शु।**

**"मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा"** (वा.) **पृतः । पृता । पृद्भ्याम् । पक्षे सुटि च रमावत् । गोपा विश्वपावत् ।**

'गाः पाति' इत्यर्थे स्त्रीलिङ्गे निष्पन्नस्य गोपा-शब्दस्य आबन्तत्वाभावात्, आकारान्तधातुरूपप्रातिपदिकत्वात् च विश्वपा-शब्दवत् प्रक्रियया सिद्धिर्भवति । यथा- गोपाः, गोपौ, गोपाः, हे गोपाः, गोपाम्, गोपौ, गोपः इत्यादि ।

॥ इत्यादन्ताः ॥

| **जराशब्दस्य रूपावलिः** | | | **नासिकाशब्दस्य रूपावलिः** | | |
|---|---|---|---|---|---|
| जरा | जरसौ<br>जरे | जरसः<br>जराः | नासिका | नासिके | नासिकाः |
| जरसम्<br>जराम् | जरसौ<br>जरे | जरसः<br>जराः | नासिकाम् | नासिके | नसः<br>नासिकाः |
| जरसा<br>जरया | जराभ्याम् | जराभिः | नसा<br>नासिकया | नोभ्याम्<br>नासिकाभ्याम् | नोभिः<br>नासिकाभिः |
| जरसे<br>जरायै | जराभ्याम् | जराभ्यः | नसे<br>नासिकायै | नोभ्याम्<br>नासिकाभ्याम् | नोभ्यः<br>नासिकाभ्यः |
| जरसः<br>जरायाः | जराभ्याम् | जराभ्यः | नसः<br>नासिकायाः | नोभ्याम्<br>नासिकाभ्याम् | नोभ्यः<br>नासिकाभ्यः |
| जरसः<br>जरायाः | जरसोः<br>जरयोः | जरसाम्<br>जराणाम् | नसः<br>नासिकायाः | नसोः<br>नासिकयोः | नसाम्<br>नासिकानाम् |
| जरसि<br>जरायाम् | जरसोः<br>जरयोः | जरासु | नसि<br>नासिकायाम् | नसोः<br>नासिकयोः | नःसु/नस्सु<br>नासिकासु |
| हे जरे | हे जरसौ<br>हे जरे | हे जरसः<br>हे जराः | हे नासिके | हे नासिके | हे नासिकाः |

## प्रयोगसिद्धिप्रकारः

### जरसे/जरायै

जराशब्दस्य लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वाद् एकत्वविवक्षायां "स्वौजसमौट्-" इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तावनुबन्धलोपे "याडापः" इति याडागमं बाधित्वा परत्वाद् "जराया जरसन्यतरस्याम्" इत्यनेन विकल्पेन जरसादेशे वर्णयोगे 'जरसे' इति रूपम्, जरसोऽभावपक्षे 'जरा + ए' इत्यवस्थायां "याडापः" इत्यनेन याडागमेऽनुबन्धलोपे 'जरा + या ए' इति स्थितौ "वृद्धिरेचि" इत्यनेन वृद्धौ 'जरायै' इति रूपद्वयं सिद्धम् ।

### नःसु/नस्सु/नासिकासु

नासिकाशब्दस्य लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वाद् बहुत्वविवक्षायां "स्वौजसमौट्-" इति सूत्रेण सप्तम्या बहुवचने सुप्विभक्तावनुबन्धलोपे 'नासिका + सु' इति जाते "पद्दनोमास्-" इति सूत्रेण नासिकाया नसादेशे 'नस् + सु' इति जाते "स्वादिष्वसर्वनामस्थाने" इति सूत्रेण पदसंज्ञायां "ससजुषो रुः' इत्यनेन रुत्वेऽनुबन्धलोपे रेफस्य "खरवसानयोर्विसर्जनीयः" इति सूत्रेण विसर्गे 'नःसु' इति जाते "विसर्जनीयस्य सः" इति सत्वे प्राप्ते "वा शरि" इति सूत्रेण विकल्पेन विसर्गस्य विसर्ग एवादेशे 'नःसु' इति रूपम्, पक्षे "विसर्जनीयस्य सः" इत्यनेन सत्वे 'नस्सु' इति रूपम्, नसादेशाभावपक्षे 'नासिकासु' इति रूपत्रयं सिद्धम् ।

## अभ्यासः

### १. निम्नाङ्कितप्रश्नानामुत्तराणि लिखत

(क) जराशब्दस्य निष्पत्तिप्रकारं निर्दिशत ।

(ख) अजादिहलादिविभक्तीः पृथक्कृत्य सारिण्यां निर्दिशत ।

(ग) "जराया जरसन्यतरस्याम्" इत्यनेन कुत्र जरसादेशो भवति ?

(घ) 'पूर्वविप्रतिषेधः' इत्यस्य किं तात्पर्यम् ? कुत्र च स प्रवर्तते ?

(ङ) सन्निपातपरिभाषायाः कोऽर्थः ?

### २. परस्परं मेलयत

| | |
|---|---|
| पाद | नस् |
| दन्त | हृद् |
| नासिका | मास् |
| हृदय | पद् |
| मास | दत् |

### ३. "व्रश्चभ्रस्ज-" इति सूत्रं पूर्णं विलिख्य सरलार्थञ्च लिखत ।

### ४. गोपाशब्दस्य रूपावलिं विलिख्य जराशब्दस्य रूपावलिं कण्ठतः श्रावयत ।

### ५. निम्नलिखितानां ससूत्रं रूपसिद्धिं कुरुत

जरसाम्/जराणाम् । नोभ्याम्/नासिकाभ्याम् । गापोः । हे गोपाः ।

## एकत्रिंशः पाठः

# इकारान्तशब्दस्य रूपसिद्धिप्रक्रिया

**मतिशब्दः प्रायेण हरिवत् । स्त्रीत्वान्नत्वाभावः, मतीः । नात्वं न, मत्या ।**

मति-शब्दः क्तिन्-प्रत्ययान्ततया स्त्रीलिङ्गे प्रयुज्यते । तस्य च प्रयेण रूपाणि हरिशब्दवद् भवन्ति । स्त्रीलिङ्गे निषिद्धकार्ययोः कारणात्, विकल्पेन नदीसंज्ञायाः कारणात् च मति-शब्दस्य कतिपयरूपाणि हरिशब्दाद् भिन्नानि भवन्ति । सु-औ-जस्-अम्-औट्-प्रत्ययेषु, सम्बुद्धौ च हरिशब्दवदेव प्रक्रियया मतिः, मती, मतयः, मतिम्, मती, हे मते इति रूपाणि मतिशब्दस्य भवन्ति । शस्-प्रत्यये तु पूर्वसवर्णदीर्घानन्तरं सकारस्य नत्वं स्त्रीलिङ्गे न भवति, "तस्माच्छसो नः पुंसि" इत्यनेन 'पुंसि' इति निर्देशेन पुंलिङ्गशब्दानां कृते एव नत्वस्य प्रसक्तिर्विहितत्वात् । अतः सकारस्य रुत्वविसर्गे 'मतीः' इति रूपं जायते । मति शस् - मति अस् - मतीस् - मतीर् - मतीः । टा-प्रत्ययेऽपि सत्यामपि घिसंज्ञाम् 'टा' इत्यस्य नाभावो न, "आङो नाऽस्त्रियाम्" इत्यनेन 'अस्त्रियाम्' इति निर्देशेन स्त्रीलिङ्गे नाभावस्य निषेधात् । अतो यणादेशे कृते 'मत्या' इत्येवं रूपं भवति । मति टा - मति आ - मत् य् आ - मत्या ।

ङिद्विभक्तिषु तु मतिशब्दो विकल्पेन नदीसंज्ञां लभते-

विभाषया नदीसंज्ञाविधायकं सूत्रम्-

**ङिति ह्रस्वश्च १ । ४ । ६**

**इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे ।**

**"आण्नद्याः" । मत्यै, मतये । मत्याः, मतेः । नदीत्वपक्षे "औत्" इति ङेरौत्त्वे प्राप्ते–**

अत्र चकाराद्वाक्यद्वयं, तथा हि यूस्त्र्याख्यौ नदीत्यनुवर्तते । ईश्च ऊश्च यू । दीर्घाज्जसि चेति पूर्वसवर्णदीर्घनिषेधाऽभावश्छान्दसः । स्त्रियमेवाचक्षाते स्त्र्याख्यौ, नित्यस्त्रीलिङ्गाविति यावत् । नेयङुवङ्स्थानावस्त्रीति सूत्रं नञ्वर्जमनुवर्तते । इयङुवङोः स्थानं स्थितिर्ययोस्ताविति विग्रहः । इयङुवङ्प्राप्तियोग्यावित्यर्थः । वामीत्यतोवेत्यनुवर्तते । ततश्चइयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तो ङिति परे इति वाक्यमेकं संपद्यते । पुनरपि यू इत्यनुवर्तते । इश्च उश्च यू । ह्रस्व इति तत्र प्रत्येकमन्वेति । स्त्र्याख्याविति चानुवर्तते । तस्य च स्त्रीलिङ्गावित्येतावदेव विवक्षितं, न तु नित्यस्त्रीलिङ्गाविति, व्याख्यानात् । वामीत्यतो वेति चानुवर्तते । ततश्चस्त्रीलिङ्गौ ह्रस्वौ चेवर्णोवर्णौ नदीसंज्ञौ वा स्तो ङिति परे इति वाक्यमपरं संपद्यते । तथा च सूत्रार्थः-

स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण विद्यमाना ईकारान्ताः, ऊकारान्ताश्च नित्यस्त्रीलिङ्गशब्दाः, तथा नित्यं स्त्रीलिङ्गे प्रयुज्यमाना इकारान्ताः, उकारान्ताश्च शब्दा अपि ङिद्विभक्तिषु परासु विकल्पेन नदीसंज्ञका

भवन्ति । अनेन सूत्रेण नदीसंज्ञापक्षे आडागमादि-नदीसंज्ञाप्रयुक्तकार्याणि जायन्ते । नदीसंज्ञाभावे च घिसंज्ञायां गुणादि-घिप्रयुक्तकार्याणि जायन्ते । यथा-

नदीसंज्ञापक्षे- मति ङे - मति ए - मति आट् ए (आण्नद्याः) - मति आ ए - मति ऐ (आटश्च) - मत् य् ऐ (इको यणचि) - मत्यै । घिसंज्ञापक्षे हरिवत्- मति ङे - मति ए - मते ए - मत् अय् ए - मतये । मति ङसि/ङस् - मति अस् - मति आ अस् (आण्नद्याः) - मति आस् (आटश्च) - मत् य् आस् (इको यणचि) - मत्यास् - मत्यार् - मत्याः । पक्षे- मतेः ।

'मति + ङि' इत्यत्र नदीत्वपक्षे "ङेराम्-" इति प्राप्तं बाधित्वा परत्वाद् "औत्" इति केवलमौत्वे प्राप्ते तमपि प्रबाध्य-

आमादेशविधायकं विधिसूत्रम्-

**इदुद्भ्याम् ७ । ३ । ११७**

**नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् । पक्षे "अच्च घेः" मत्याम्, मतौ । एवं श्रुत्यादयः ।**

इकारान्तात्, उकारान्तात् च नदीसंज्ञकात् शब्दात् परस्य सप्तम्यैकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' आदेशो भवति ।

मति ङि - मति इ - मति आम् (इदुद्भ्याम्) - मति आ आम् (आण्नद्याः) - मति आम् (आटश्च) - मत् य् आम् (इको यणचि) - मत्याम् । पक्षे- मतौ । शेषविभक्तिषु हरिवदेव मतिशब्दस्यापि रूपाणि जायन्ते । एवं प्रकारेण बुद्धि, स्तुति, श्रुति, कृति, गति, वृद्धि, विभक्ति इत्यादीनां इकारान्त-स्त्रीलिङ्गप्रातिपदिकानामपि रूपाणि मतिवत् प्रक्रियया निष्पद्यन्ते ।

तिसृ, चतसृ, इत्यादेशयोर्विधायकं विधिसूत्रम्-

**त्रिचतुरोः स्त्रियां तिसृचतसृ ७ । २ । ९९**

**स्त्रीलिङ्गयोरेतावादेशौ स्तो विभक्तौ परतः ।**

विभक्तौ परस्यां सत्याम्, स्त्रीत्वविवक्षायां सङ्ख्यावाचिनोः त्रि-चतुर्-शब्दयोः स्थाने क्रमेण 'तिसृ', 'चतसृ' इत्येतौ आदेशौ भवतः । स्त्रीलिङ्गे रूपसाधनक्रमे त्रि-शब्दस्य 'तिसृ', चतुर्-शब्दस्य च 'चतसृ' इत्येतौ आदिश्येते इत्यर्थः । अनेन ऋदन्तशब्दविधानानन्तरम् "ऋन्नेभ्यो ङीप्" इति स्त्रीप्रत्ययविधायकसूत्रेण ङीपि प्राप्ते "न षट्स्वस्रादिभ्यः" इत्यनेन निषिध्यते ।

त्रिशब्दाज्जसि अनेन 'तिसृ' इत्यादेशे 'तिसृ + अस्' इत्यवस्थायां पूर्वसवर्णदीर्घे प्राप्ते, "जसि च" इति गुणे च प्राप्ते तौ प्रबाध्य "ऋतो ङि-" इति गुणे प्राप्ते तमपि प्रबाध्य-

रेफादेशविधायकं विधिसूत्रम्-

**अचि र ऋतः ७ । २ । १००**

**तिसृ चतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि । गुणदीर्घोत्त्वानामपवादः । तिस्रः । तिस्रः । तिसृभिः।**
**तिसृभ्यः । तिसृभ्यः । आमि नुमचिर...वा. इति नुट् ।**

"ऋतो ङि-" इति गुणस्य, "प्रथमयोः-" इति पूर्वसवर्णदीर्घस्य, "ऋत उत्" इत्युत्वस्य च रत्वमपवाद इत्यर्थः ।

अजादि-विभक्तिषु परासु ऋकारान्तयोः तिसृ-चतसृशब्दयोरन्त्यस्य ऋकारस्य स्थाने रेफादेशो भवति । विधिरयम् (रेफादेशः) गुणस्य, दीर्घस्य, उत्वस्य चापवादो वर्तते ।

त्रि जस्/शस् (नित्यं बहुवचनान्तः) - त्रि अस् - तिसृ अस् (त्रिचतुरोः स्त्रियां तिसृचतसृ) - तिस् र् अस् - तिस्रस् - तिस्रर् - तिस्रः । भिसादौ तु 'तिसृ' इत्यादेशे, हलादित्वाद् अनेन रेफादेशस्य अप्राप्तौ- तिसृभिः । आमि तिसृविधानानन्तरं 'तिसृ आम्' इत्यत्र "अचि र ऋतः" इत्यनेन रेफादेशे प्राप्ते "ह्रस्वनद्यापो नुट्" इत्यनेन नुडागमे च प्राप्ते "विप्रतिषेधे-" इत्यनेन परत्वाद् रेफादेशे प्राप्तेऽपि "नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन" इति वार्तिकबलेन पूर्वं नुडागमे 'तिसृ नाम्' इत्यवस्थायां "नामि" इति दीर्घे प्राप्ते-

दीर्घनिषेधविधायकं सूत्रम्-

**न तिसृचतसृ ६ । ४ । ४**

**तिसृ चतसृ एतयोर्नामि दीर्घो न स्यात् । इति तन्निषेधे, तिसृणाम् । तिसृषु ।**

नाम्-प्रत्यये परे तिसृशब्दस्य, चतसृ-शब्दस्य च दीर्घो न भवति । अनेन दीर्घनिषेधे 'तिसृनाम्' इत्यवस्थायाम्, नकारस्य णत्वे- तिसृणाम् । सुप्-प्रत्यये- तिसृषु ।

**"स्त्रियाम्" इति त्रिचतुरोर्विशेषणान्नेह- प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः, मतिशब्दवत् । आमि तु 'प्रियत्रयाणाम्' इति विशेषः । 'प्रियास्तिस्रो यस्यः सः' इति विग्रहे तु, प्रियतिसा । प्रियतिस्रौ । प्रियतिस्रः । प्रियतिस्रमित्यादि । प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि । स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणभावान्न तिस्रादेशः । "न लुमताङ्गस्य" इति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ । रादेशात्पूर्वविप्रतिषेधेन नुम्, प्रियतिसृणी । प्रियतिसृणि । तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्पर्यायेण नुम्रभावौ, प्रियतिसृणा, प्रियतिस्रा । इत्यादि । द्वेरत्वे सत्याप् ।**

**द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः । इति इदन्ताः ।**

द्विशब्दाद्विभक्तौ सत्यां त्यदाद्यत्वे "अजाद्यतष्टाप्" इति टाबित्यर्थः । टापि सति द्वाशब्दस्य रमावद्रूपाणीति भावः ।

| मति-शब्दस्य रूपावलिः | | | त्रिशब्दस्य रूपावलिः | द्विशब्दस्य रूपावलिः |
|---|---|---|---|---|
| मतिः<br>मतिम्<br>मत्या | मती<br>मती<br>मतिभ्याम् | मतयः<br>मतीः<br>मतिभिः | तिस्रः<br>तिस्रः<br>तिसृभिः | द्वे<br>द्वे<br>द्वाभ्याम् |
| मत्यै<br>मतये | मतिभ्याम् | मतिभ्यः | तिसृभ्यः | द्वाभ्याम् |
| मत्याः<br>मतेः | मतिभ्याम् | मतिभ्यः | तिसृभ्यः | द्वाभ्याम् |
| मत्याः<br>मतेः | मत्योः | मतीनाम् | तिसृणाम् | द्वयोः |
| मत्याम्<br>मतौ | मत्योः | मतिषु | तिसृषु | द्वयोः |
| हे मते | हे मती | हे मतयः | हे तिस्रः | |

## प्रयोगसिद्धिप्रकारः

### मत्याम्/मतौ

मतिशब्दस्य “कृत्तद्धितसमासाश्च” इत्यनेन प्रातिपदिकसंज्ञायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण एकत्वविवक्षायां “स्वौजसमौट्-” इति सूत्रेण सप्तम्या एकवचने ङिविभक्तावनुबन्धलोपे घिसंज्ञां प्रबाध्य “ङिति ह्रस्वश्च” इति सूत्रेण विकल्पेन नदीसंज्ञायां “ङेराम्नद्याम्नीभ्यः” इत्यनेन आमादेशे प्राप्ते तं प्रबाध्य “औत्” इत्यनेन औदादेशे प्राप्ते तमपि प्रबाध्य “इदुद्भ्याम्” इति सूत्रेण आमादेशे ‘मति + आम्’ इत्यवस्थायाम् “आनद्याः” इत्यनेन आडागमेऽनुबन्धलोपे “आटश्च” इत्यने वृद्धौ ‘मति + आम्’ इति जाते “इको यणचि” इत्यनेन यणि ‘मत्याम्’ इति रूपम्, नदीसंज्ञाया अभावपक्षे “शेषो घ्यसखि” इत्यनेन घिसंज्ञायां ‘मति + इ’ इत्यत्र “अच्च घेः” इति सूत्रेण प्रातिपदिकस्य अकारान्तादेशे इकारस्य औत्वे च कृते ‘मत + औ’ इत्यत्र “वृद्धिरेचि” इत्यनेन वृद्धौ ‘मतौ’ इति रूपद्वयं सिद्धम् ।

### तिस्रः

त्रिशब्दस्य “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इति सूत्रेण प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण द्वितीयाया बहुवचने शस्विभक्तावनुबन्धलोपे ‘त्रि + अस्’ इत्यवस्थायां “त्रिचतुरोः स्त्रियां तिसृचतसृ” इत्यनेन तिसृ इत्यादेशे ‘तिसृ + अस्’ इति जाते “ऋन्नेभ्यो ङीप्” इति प्राप्तस्य ङीपो “न षट्स्वस्रादिभ्यः” इति निषेधेः “प्रथमयोः पूर्वसवर्णः” इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य “अचि र ऋतः” इति सूत्रेण ऋकारस्थाने रेफादेशे वर्णयोगे ‘तिस्रस्’ इति जाते सकारस्य रुत्वे विसर्गे ‘तिस्रः’ इति रूपं सिद्धम् ।

### द्वे

द्विशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन प्रातिपदिकसंज्ञायां स्वतो द्वित्वस्य वाचकत्वेन "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया द्विवचने औविभक्तौ 'द्वि + औ' इति जाते "द्विपर्यन्तनामेवेष्टिः" इति वार्तिकसहकारेण "त्यदादीनामः" इति सूत्रेण इकारस्य अकारादेशे 'द्व + औ' इत्यत्र स्त्रीत्वविवक्षायाम् "अजाद्यतष्टाप्" इति सूत्रेण टाप्यनुबन्धलोपे सवर्णदीर्घे 'द्वा + औ' इति जाते "औङ आपः" इति सूत्रेण 'शी' इत्यादेशेऽनुबन्धलोपे 'द्वा + ई' इत्यत्र "आद् गुणः" इति सूत्रेण गुणे 'द्वे' इति रूपं सिद्धम् ।

## अभ्यासः

### १. निम्नप्रश्नानामुत्तराणि दत्त

(क) मतिशब्दस्य घिसंज्ञायामपि तृतीयाया एकवचने "आङो नाऽस्त्रियाम्" इत्यनेन नादेशो भवति न वा ? कारणञ्च किम् ?

(ख) मतिशब्दस्य कासु विभक्तिषु विकल्पेन नदीसंज्ञा भवति ?

(ग) 'मत्याम्' इत्यत्र ङेरामादेशः केन सूत्रेण भवति ?

(घ) "अचि र ऋतः" इत्यनेन गुणदीर्घोत्वानां विधायकानि कानि सूत्राणि बाध्यन्ते ?

(ङ) द्विशब्दस्य स्त्रियां रमावद्रूपाणि भवन्तीत्यत्र कारणं स्पष्टं कुरुत ।

### २. उपयुक्तेषु ✓ इति चिह्नमनुपयुक्तेषु च ✗ इति चिह्नं दत्त

(क) 'मती' इत्यत्र "प्रथमयोः पूर्वसवर्णः" इत्यनेन दीर्घो भवति ।

(ख) 'मत्या' इत्यत्र घिसंज्ञां न प्राप्नोति ।

(ग) 'मतीनाम्' इत्यत्र "नामि" इत्यनेन दीर्घो भवति ।

(घ) त्रिशब्दात् सुविभक्तिरायाति ।

(ङ) द्विशब्दाद् एकवचनबहुवचने न भवतः ।

### ३. श्रुतिशब्दस्य रूपावलिं लिखत ।

४. मतीः, मत्याः/मतेः, द्वयोः, तिसृणाम्, एतेषां ससूत्रं सिद्धिप्रकारं दर्शयत ।

५. रिक्तस्थानं पूरयत

| | | |
|---|---|---|
| गतिः | गती | ..... |
| .......... | गती | गतीः |
| .......... | गतिभ्याम् | गतिभिः |
| .......... | गतिभ्याम् | गतिभ्यः |
| गत्याः/गतेः | गतिभ्याम् | गतिभ्यः |
| गत्याः/गतेः | गतिभ्याम् | गतिभ्यः |
| ..... | गत्योः | गतीनाम् |
| गत्याम्/गतौ | गत्योः | गतिषु |
| हे गते | हे गती | हे गतयः |

# ईकारान्तशब्दस्य रूपसिद्धिप्रक्रिया

**गौरी । गौर्यौ । गौर्यः । नदीकार्यम्, हे गौरि ! गौर्यै इत्यादि । एवं वाणीनद्यादयः ।**

गौरीशब्दस्य नदीसंज्ञा भवति । नदीसंज्ञकस्य बहुश्रेयसीशब्दस्य रूपसिद्धिप्रक्रिया पुँल्लिङ्गे प्रदर्शितमेव । शस्विभक्तिं विहाय सर्वत्र गौरीशब्दस्यापि रूपाणि बहुश्रेयसीवदेव निष्पद्यन्ते । शसि तु, गौरीः ।

गौरी + सु गौरी स् गौरी । 'हल्ङ्याब्भ्य इति सलोपः ।

गौरी + औ गौर्यौ । पूर्वसवर्णदीर्घं निषिध्य "इको यणचि" इति यण् । गौरी + जस् गौरी + अस् गौर्यस् गौर्यर् गौर्यः । सम्बोधने - गौरी + सु गौरी + स् गौरि + स् (अम्बार्थनद्योरिति ह्रस्वः) हे गौरि ! । हे गौर्यौ ! । हे गौर्यः । गौरी + अम् गौरीम् । 'अमि पूर्वः' इति पूर्वरूपम् । गौर्यौ ।

गौरी + शस् गौरी + अस् गौरीस् (पूर्वसवर्णदीर्घः) गौरीर् गौरीः । गौर्या । गौरीभ्याम् । गौरीभिः । गौर्यै । गौरीभ्याम् । गौरीभ्यः । गौर्याः । गौरीभ्याम् । गौरीभ्यः । गौर्याः । गौर्योः । गौरी + आम् गौरी + नाम् गौरीणाम् । गौरी + ङि गौरी + इ गौरी + आम् (ङेराम् - इत्याम्) गौरी + आ आम् गौरी + आम् गौर्याम् । गौर्योः । गौरीषु । एवं वाणीनद्यादिदीर्घेकारान्तस्त्रीलिङ्गशब्दानां रूपाणि बोध्यानि ।

**प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादनङि णिद्वद्भावे च प्राप्ते । विभक्तौ लिङ्गविशिष्टाग्रहणम्** (प.) **सखी । सख्यौ । सख्यः इत्यादि गौरीवत् । अङ्यन्तत्वान्न सुलोपः, लक्ष्मीः । शेषं गौरीवत् । एवं तरीतन्त्र्यादयः । स्त्री । हे स्त्रि !**

सखिशब्दस्य स्त्रीत्वविवक्षायां "सख्यशिश्वीति भाषायाम्" इत्यनेन ङीषि कृते निष्पन्नः सखीशब्दः । तस्मात् सुविभक्तौ - प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादनङि णिद्वद्भावे च प्राप्ते "विभक्तौ लिङ्गविशिष्टाग्रहणम्' (प.) विभक्तिनिमित्तके कार्ये कर्तव्ये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्य ग्रहणं नास्तीत्यर्थः । तथा च अनङ् णिद्वत्त्वं च न भवतीति भावः । सखी । सख्यौ । सख्यः । इत्यादि गौरीवत् ।

"लक्षेर्मुट् च" इति लक्ष्धातोरीप्रत्यये मुडागमे लक्ष्मीशब्दो निष्पद्यते । अङ्यन्तत्वान्न सुलोपः, लक्ष्मीः । शेषं गौरीवत् । एवं लक्ष्मीवदेव तरीतन्त्र्यादयः । स्त्यै शब्दसंघातयोः, इत्यस्माद्धातोः स्त्यायतः - संगते भवतः अस्यां शुक्रशोणिते इत्यर्थे स्त्यायतेः ड्रट्, डटावितौ, डित्त्वसामर्थ्यादभस्यापि टेर्लोपः, 'लोपो व्योः-' इति यलोपः टित्त्वाद् ङीपि च कृते निष्पन्नो ङ्यन्तः स्त्रीशब्दः । स्त्री । हे स्त्रि !

स्त्रीशब्दाद् औविभक्तौ प्राप्तं पूर्वसवर्णदीर्घं 'दीर्घाज्जसि च' इत्यनेन निषेधानन्तरं यणि प्राप्ते-

इयङादेशविधायकं विधिसूत्रम्-

**स्त्रियाः ६ । ४ । ७९**

**स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे । स्त्रियौ । स्त्रियः ।**

इत्यनेनेकारस्य इयङादेशः ।

स्त्री + औ स्त्रिय् + औ स्त्रियौ । 'इयङ्' इत्यस्य 'इय्' इति शेषः । स्त्री + जस् स्त्री + अस् स्त्रिय् + अस् स्त्रियस् स्त्रियर् स्त्रियः ।

विभाषया इयङादेशविधायकं विधिसूत्रम्-

**वाऽम्शसोः ६ । ४ । ८०**

**अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियौ । स्त्रियः, स्त्रीः, स्त्रिया । स्त्रियै । स्त्रियाः । स्त्रियाः । स्त्रियोः । परत्वान्नुट्, स्त्रीणाम् । स्त्रियाम् । स्त्रियोः । स्त्रीषु ।**

स्त्री + अम् स्त्रिय् + अम् स्त्रियम् । इयङभावे

स्त्री + अम् स्त्रीम् (पूर्वरूपम्) । स्त्रियौ ।

स्त्री + शस् स्त्री + अस् स्त्रिय् + अस् स्त्रियर् स्त्रियः । पक्षे - स्त्री + शस् स्त्री + अस् स्त्रीस् स्त्रीर् स्त्रीः ।

स्त्रिया । स्त्रीभ्याम् । स्त्रीभिः । स्त्रियै । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्रियाः । स्त्रियोः ।

आमि 'स्त्रियाः' इति प्राप्तम् इयङं बाधित्वा परत्वान्नुट् । स्त्रीणाम् । स्त्रियाम् । स्त्रियोः । स्त्रीषु ।

**स्त्रियमतिक्रान्तोऽतिस्त्रिः । अतिस्त्रियौ ।**

अथ प्रसंगात् पुंसि प्रयुक्तस्य अतिस्त्रिशब्दस्य विशेषं दर्शयति -

स्त्रियमतिक्रान्त इत्यर्थे "अत्यादयः क्रान्ताद्यर्थे" इति समासः । "गोस्त्रियोरुपसर्जनस्य" इति ह्रस्वे, अतिस्त्रिशब्दो निष्पद्यते । अत्र दीर्घङ्यन्तत्वाभावाद् ईकाररूपङ्यन्तत्वाभावाद्वा हल्ङ्यादिलोपो न भवति । नदीत्वमपि न ह्रस्वत्वाद् घिसंज्ञा तु भवत्येव । अतिस्त्रि + सु अतिस्त्रि + स् अतिस्त्रि + र् अतिस्त्रिः । अतिस्त्रि + औ अतिस्त्रिय् + औ अतिस्त्रियौ । जस्यनुबन्धलोपे 'अतिस्त्रि + अस्' इत्यत्र इयङादेशे प्राप्ते -

**गुणनाभावौत्वनुड्भिः परत्वात्पुंसि बाध्यते ।**

**क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम् ।**

पुंसि गुणनाभावौत्वनुड्भिः, क्लीबे नुमा च परत्वात् स्त्रीशब्दस्य इयङ् बाध्यते । 'जसि च' 'घेर्ङिति' इति च गुणः, "आङो नाऽस्त्रियाम्" इति नात्वम्, "अच्च घेः" इत्यौत्वम्, "ह्रस्वनद्यापः-" इति नुट्, "इकोऽचि विभक्तौ" इति नुम्, एतेषामियङपेक्षया परत्वादित्यर्थः ।

**'जसि च' अतिस्त्रयः / हे अतिस्त्रे । हे अतिस्त्रियौ / हे अतिस्त्रयः / "वाम्शसोः" इति वेयङ्, अतिस्त्रियम्/अतिस्त्रिम् । अतिस्त्रियौ । अतिस्त्रियः– अतिस्त्रीन् ।**

अतिस्त्रि + शस् अतिस्त्रि + अस् अतिस्त्रिय् + अस् अतिस्त्रियस् अतिस्त्रियर् अतिस्त्रियः । पक्षे -

अतिस्त्रि + शस् अतिस्त्रि + अस् अतिस्त्रीस् (पूर्वसवर्णदीर्घः) अतिस्त्रीन् । पुंवाचकतया 'तस्माच्छसो नः पुंसि' इति नत्वम् ।

अतिस्त्रिणा । 'घेर्ङिति' इति गुणः, अतिस्त्रये । अतिस्त्रेः । अतिस्त्रियोः । अतिस्त्रीणाम् । 'अच्च घेः, अतिस्त्रौ । अतिस्त्रियोः । अतिस्त्रिषु ।

**ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया ।**
**इयङादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने ॥**

उपसर्जनत्वदशायां पुंसि विद्यमानस्य स्त्रीशब्दस्य अचि य इयङादेशः 'स्त्रियाः' इति सूत्रविहितः, स ओसि षष्ठीसप्तमीद्विवचने, औकारे च = प्रथमाद्वितीयाद्विवचने च नित्यं भवति । अम्शसोस्तु विभाषया = विकल्पने (वाऽम्शसोः इत्यनेन) । उक्तेभ्यश्चतुर्भ्योऽन्यत्र तु अचि इयङादेशो न भवतीत्यर्थः ।

**क्लीबे तु नुम् । अतिस्त्रि । अतिस्त्रिणी । अतिस्त्रीणि । अतिस्त्रिणा । अतिस्त्रिणे । ङेप्रभृतावजादौ वक्ष्यमाणपुंवद्भावात्पक्षे प्रागवरूपम् । अतिस्त्रये । अतिस्त्रिणः । अतिस्त्रिणः । अतिस्त्रेः । अतिस्त्रेः । अतिस्त्रिणोः । अतिस्त्रिणोः । अतिस्त्रियोरित्यादि । स्त्रियां तु प्रायेण पुंवत् । शसि अतिस्त्रीः । अतिस्त्रिया । ङिति ह्रस्वश्चेति ह्रस्वान्तत्वप्रयुक्तो विकल्पः । अस्त्रीति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासः । तत्संबद्धस्यैवानुवृत्तेर्दीर्घस्यायं निषेधो नतु ह्रस्वस्य । अतिस्त्रियै । अतिस्त्रये । अतिस्त्रियाः । अतिस्त्रियाः । अतिस्त्रेः । अतिस्त्रेः । अतिस्त्रीणाम् । अतिस्त्रियाम् । अतिस्त्रौ ॥**

'स्त्रियमतिक्रान्तम् (कुलम्)' इति विग्रहेण निष्पन्नस्य अतिस्त्रिशब्दस्य क्लीबे जायमानत्वेन तत्र अचि विभक्तौ नुमा इयङ् बाध्यते । अतिस्त्रि । अतिस्त्रिणी । अतिस्त्रीणि ।

अतिस्त्रि + टा अतिस्त्रि + आ अतिस्त्रि + ना अतिस्त्रिणा । अत्र इयङं नुमं च बाधित्वा नादेशः, इति बोध्यम् ।

ङेप्रभृतावजादौ वक्ष्यमाणपुंवद्भावात्पक्षे पुंवद्रूपम् । अतिस्त्रये, अतिस्त्रिणे । अतिस्त्रेः, अतिस्त्रिणः । अतिस्त्रेः, अतिस्त्रिणः । अतिस्त्रियोः, अतिस्त्रिणोः । इत्यादि ।

'स्त्रियमतिक्रान्ता' इति विग्रहेण निष्पन्नस्य अतिस्त्रिशब्दस्य स्त्रियां जायमानत्वेऽपि ह्रस्वान्ततया प्रायेण पुंसि प्रयुक्तस्य अतिस्त्रिशब्दस्येव रूपाणि जायन्ते । तथा चोक्तम् -

स्त्रियां तु प्रायेण पुंवत् । शसि, अतिस्त्रियः, अतिस्त्रीः । टाविभक्तौ अतिस्त्रिया । ङिद्विभक्तौ 'ङिति ह्रस्वश्च" इति ह्रस्वान्तत्वप्रयुक्तो विकल्पः । 'नेयङुवङ्स्थानावस्त्री' इत्यत्र "अस्त्री" इति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासः, तत्सम्बद्धस्यैवानुवृत्तेः । दीर्घस्यायं निषेधः, न तु ह्रस्वस्य ।

'ङति ह्रस्वश्च' इत्यत्र इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तः, इति प्रथमं वाक्यम् । ह्रस्वाविवर्णोवर्णौ स्त्रियां नदीसंज्ञौ वा स्तः, इति द्वितीयं वाक्यम् । अत्र द्वितीयवाक्याद् ङित्सु नदीत्वविकल्पः इत्यर्थः ।

**अतिस्त्रियै, अतिस्त्रये । अतिस्त्रियाः, अतिस्त्रेः ।**

**अतिस्त्रियाः, अतिस्त्रेः । अतिस्त्रीणाम् । अतिस्त्रियाम्, अतिस्त्रौ ।**

श्रयन्त्येतामिति श्रीः, उणादिनिष्पन्नः श्रीशब्दोऽङ्यन्तः तेन सकारस्य लोपो न भवति । अजादौ विभक्तौ 'अचिश्नु-" इति इयङ् ।

श्रीः । श्रियौ । श्रियः ।

नदीसंज्ञानिषेधविधायकं विधिसूत्रम्-

**नेयङुवङ्स्थानावस्त्री १ । ४ । ४**

**इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री ।**

इत्यनेन श्रीशब्दस्य नदीसंज्ञानिषेधे, सम्बोधने "अम्बार्थनद्योः-" इति ह्रस्वाभावः ।

**हे श्रीः / श्रियम् / श्रियौ / श्रियः**

ङिद्विभक्तौ "ङिति ह्रस्वश्च" इत्यनेन विकल्पेन नदीसंज्ञा ।

**श्रियै, श्रिये । श्रियाः, श्रियः ।**

विभाषया नदीसंज्ञाविधायकं सूत्रम्-

**वाऽऽमि १ । ४ । ५**

**इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः, न तु स्त्री । श्रीणाम्, श्रियाम् । श्रियाम्- श्रियि ।**

श्री + आम् श्री + (नदीत्वपक्षे नुट्) नाम् श्रीणाम् ।

श्री + आम् श्रिय् + (नदीत्वाभावे इयङ्) आम् श्रियाम् ।

श्री + ङि श्री + इ श्री + आम् श्रिय् + आम् श्रियाम् ।

श्री + ङि श्री + इ श्रिय् + इ श्रियि ।

**प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्, "पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम्" इति स्वीकारात् । "लिङ्गान्तरानभिधायकत्वं तत्" इति कैयटमते तु पुंवद्रूपम् । "प्रकृष्टा धीः" इति विग्रहे तु लक्ष्मीवत् । अमि शसि च, प्रध्यम्, प्रध्यः, इति विशेषः ।**

**सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति वेति विग्रहे वृत्तिकारमते सुधीः श्रीवत् । मतान्तरे तु पुंवत् । सुष्ठु धीः इति विग्रहे तु श्रीवदेव । ग्रामणीः पुंवत् । ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विनापि स्त्रियामप्रवृत्तेः । एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम् ।**

| **स्त्रीशब्दस्य रूपावली** | | | **श्रीशब्दस्य रूपावली** | | |
|---|---|---|---|---|---|
| स्त्री | स्त्रियौ | स्त्रियः | श्रीः | श्रियौ | श्रियः |
| स्त्रियम्<br>स्त्रीम् | स्त्रियौ | स्त्रियः<br>स्त्रीः | श्रियम् | श्रियौ | श्रियः |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः | श्रिया | श्रीभ्याम् | श्रीभिः |
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः | श्रियै/श्रिये | श्रीभ्याम् | श्रीभ्यः |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः | श्रियाः/श्रियः | श्रीभ्याम् | श्रीभ्यः |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् | श्रियाः/श्रियः | श्रियोः | श्रीणाम्/श्रियाम् |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु | श्रियाम्/श्रियि | श्रियोः | श्रीषु |
| हे स्त्रि / | हे स्त्रियौ / | हे स्त्रियः / | हे श्रीः / | हे श्रियौ / | हे श्रियः / |

| **अतिस्त्रिशब्दस्य (स्त्रियाम्) रूपावली** | | |
|---|---|---|
| अतिस्त्रिः | अतिस्त्रियौ | अतिस्त्रयः |
| अतिस्त्रियम्<br>अतिस्त्रीम् | अतिस्त्रियौ | अतिस्त्रियः<br>अतिस्त्रीः |
| अतिस्त्रिया | अतिस्त्रिभ्याम् | अतिस्त्रिभिः |
| अतिस्त्रियै<br>अतिस्त्रये | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः |
| अतिस्त्रियाः<br>अतिस्त्रेः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः |
| अतिस्त्रियाः<br>अतिस्त्रेः | अतिस्त्रियोः | अतिस्त्रीणाम् |
| अतिस्त्रियाम्<br>अतिस्त्रौ | अतिस्त्रियोः | अतिस्त्रिषु |
| हे अतिस्त्रे | हे अतिस्त्रियौ | हे अतिस्त्रयः |

## प्रयोगसिद्धिप्रकारः

### हे गौरि ∕

गौरीशब्दस्य "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषया प्रातिपदिकत्वात् सम्बोधने एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तावनुबन्धलोपे गौरी + स् इत्यवस्थायां "एकवचनं सम्बुद्धिः" इत्यनेन सम्बुद्धिसंज्ञायां" यू स्त्र्याख्यौ नदी" इति सूत्रेण नदीसंज्ञायां "अम्बार्थनद्योर्ह्रस्वः" इत्यनेन ह्रस्वे गौरि + स् इति जाते "एङ्ह्रस्वात्सम्बुद्धेः" इति सूत्रेण सकारस्य लोपे सम्बोधने हेशब्दस्य पूर्वप्रयोगे हे गौरि ∕ इति रूपं सिद्धम् ।

### स्त्रियम्∕स्त्रीम्

स्त्रीशब्दस्य "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इत्यनया प्रातिपदिकत्वाद् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण द्वितीयाया एकवचने अम्विभक्तौ "अमि पूर्वः" इत्यनेन प्राप्तं पूर्वरूपं बाधित्वा "स्त्रियाः" इत्यनेन इयङादेशे प्राप्ते तमपि प्रबाध्य "वाऽम्शसोः" इति सूत्रेण विकल्पेन इयङादेशेऽनुबन्धलोपे वर्णयोगे स्त्रियम् इति रूपम्, इयङभावपक्षे "अमि पूर्वः" इत्यनेन पूर्वरूपे स्त्रीम् इति रूपद्वयं सिद्धम् ।

### श्रीः

श्रीशब्दस्य व्युत्पन्नपक्षे "कृत्तद्धितसमासाश्च" इत्यनेन प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया एकवचने सुविभक्तावनुबन्धलोपे ङ्यन्तत्वाभावाद् "हल्ङ्याब्भ्य-" इति सलोपाभावे सकारस्य रुत्वे विसर्गे श्रीः इति रूपं सिद्धम् ।

# अभ्यासः

**१. अधोऽङ्कितसूत्राणामर्थं लिखत**

(क) स्त्रियाः

(ख) वाऽम्शसोः

(ग) नेयङुवङ्स्थानावस्त्री

(घ) वाऽऽमि ।

**२. निम्नलिखितप्रश्नानामुत्तराणि दत्त**

(क) गौरीशब्दस्य द्वितीयायां कानि रूपाणि भवन्ति ?

(ख) गौरीशब्दस्य केन हेतुना नदीसंज्ञा भवति ?

(ग) सखीशब्दस्य अनङादेशो भवति न वा ?

(घ) विभक्तिनिमित्ते कार्ये लिङ्गविशिष्टपरिभाषा कथं निषिध्यते ?

(ङ) लक्ष्मीगौरीशब्दयोः कस्यां विभक्तौ भिन्नप्रक्रियया रूपं निष्पद्यते ?

(च) 'स्त्रिया' इत्यत्र इयङादेशः केन सूत्रेण भवति ?

(छ) स्त्रीशब्दस्य नदीसंज्ञा केन सूत्रेण भवति ?

**३. परस्परं मेलयत**

| | | |
|---|---|---|
| सखी | श्रियै | सु (सम्बोधने) |
| गौर्यः | सख्याम् | सु |
| लक्ष्म्यै | हे लक्ष्मि / | जस् |
| श्रियि | लक्ष्मीः | ङे |
| हे श्रीः | स्त्रियः | ङि |

**४. सखीशब्दस्य रूपाणि कण्ठतः श्रावयत ।**

**५. श्रियै/श्रिये, स्त्रीणाम्, गौरीः, लक्ष्म्याः, एतेषां ससूत्रं रूपसिद्धिप्रक्रियां लिखत ।**

त्रयस्त्रिंशः पाठः

# उवर्णान्तादि–औवर्णान्तशब्दनां रूपसिद्धिप्रक्रिया

## धेनुर्मतिवत्

धेनुशब्दस्य रूपाणि मतिशब्दस्येव जायन्ते । उकारस्य ओकारो गुणः, अवादेशः - इत्यादिविशेषस्तु सुगम एवेति भावः ।

धेनु + सु धेनु + स् धेनु + र् धेनुः । धेनु औ धेनू (पूर्वसवर्णदीर्घः) । धेनु + जस् धेनु + अस् धेनो + अस् (जसि चेति गुणः) धेनव् + अस् धेनवर् धेनवः । धेनुम् । धेनू । धेनूः । शसि स्त्रीत्वान्नत्वाभावः । धेनु + टा धेनु + आ धेन्वा (स्त्रीत्वान्नादेशो न) । धेनुभ्याम् । धेनुभिः । ङिद्विभक्तौ 'ङिति ह्रस्वश्च' इति विकल्पेन नदीसंज्ञा । अभावपक्षे घिसंज्ञा । धेन्वै, धेनवे । धेन्वाः, धेनोः । इत्यादि ।

तृज्वद्भावविधायकमतिदेशसूत्रम्-

**स्त्रियां च ७ । १ । ९६**

**स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते ।**

रूपातिदेशोऽयं तेन क्रोष्टुशब्दस्य स्थाने स्त्रियां क्रोष्टृशब्द एव प्रयुज्यत इत्यर्थः ।

ङीप्प्रत्ययविधायकं विधिसूत्रम्-

**ऋन्नेभ्यो ङीप् ४ । १ । ५**

**ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् । क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्र्यः । वधूर्गौरीवत् । भ्रूः श्रीवत् । हे सुभ्रूः । कथं तर्हि " हा पितः क्वासि हे सुभ्रु" इति भट्टिः । प्रमाद एवायमिति बहवः । खलपूः पुंवत् ।**

**पुनर्भूः । दृन्कर-(वा.) इति यणा उवङो बाधनात् "नेयङुवङ..." इति सूत्रेण निषेधो न, हे पुनर्भू ! पुनर्भ्वम् । पुनर्भ्वौ ।**

स्त्रियां क्रोष्टुशब्दस्य स्थाने क्रोष्टृरूपादेशेऽनेन सूत्रेण ङीपि 'क्रोष्टृ ई' इत्यत्र "इको यणचि" इति यणि **क्रोष्ट्री** इति, अस्य रूपाणि गौरीवद् भवन्ति । **क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्र्यः ।** इत्यादि । वधूशब्दात् सौ तस्य रुत्वविसर्गौ वधूः । शेषं गौरीवत् । भ्रूः श्रीवत् । 'भ्रमेश्च डूः" इति डूप्रत्ययान्तोऽयम् । सु शोभना भ्रूर्यस्याः सा सुभ्रूः ।

अस्त्रीप्रत्ययान्तत्वात् "गोस्त्रियोः-" इति ह्रस्वो न भवति। "नेयङुवङ्स्थानावस्त्री" इति भ्रूशब्दस्य तदन्तस्य च निषेधात् नदीत्वं न। ततश्च 'अम्बार्थ-' इत्यादि नदीकार्यं नेत्यभिप्रेत्याह- हे सुभ्रूः /। कथं तर्हि ' हा पितः क्वासि हे सुभ्रु /' इति भट्टिः, प्रमाद एवायमिति बहवः। खलपूः पुंवत्। पुनर्भूः। 'दृन्करपुनः पूर्वस्य भुवो यण्वक्तव्यः" (वा ४११८) इति यणा उवङो बाधनात् 'नेयङुवङ्-' इति नदीसंज्ञा निषेधो न, हे पुनर्भु /पुनर्भ्वम्। पुनर्भ्वौ।

णत्वादेशविधायकं विधिसूत्रम्-

**एकाजुत्तरपदे णः ८।४।१२**

**एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थम्। यणं बाधित्वा परत्वान्नुट्, पुनर्भूणाम्। वर्षाभूः। भेकजातौ नित्यस्त्रीत्वाभावाद्** हे **वर्षाभूः कैयटमते। मतान्तरे तु** हे **वर्षाभु** ! **"भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दूरे पुमान्" इति यादवः। 'वर्षाभ्वश्च', वर्षाभ्वौ। वर्षाभ्वः। स्वयंभूः पुंवत्।**

एकोऽच्यस्मिन्तत् एकाच्, तदुत्तरपदं यस्य स एकाजुत्तरपदः। समासस्य चरमावयवे रूढेन उत्तरपदशब्देन समास इति लभ्यते। तस्मिन्समासे, रषाभ्यां नो णः इत्यनुवर्तते। पूर्वपदात्संज्ञायामित्यतः पूर्वपदादित्यनुवर्तते। पूर्वं पदं यस्य तत्पूर्वपदम्। एकत्वमविवक्षितम्। पूर्वपदस्थाभ्यामिति लभ्यते। प्रातिपदिकान्तनुम्विभक्तिषु चेत्यनुवर्तते। विद्यमानस्येति शेषः। तथा च सूत्रार्थः - एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। अनेन णत्वे पुनर्भूणाम्।

'सावसेर्ऋन्' इत्यनेन सौ उपपदे अस्धातोः ऋन्प्रत्यये निष्पन्नः स्वसृशब्दो भगिनीवाची। ऋदन्तत्वाद् 'ऋन्नेभ्यो ङीप्" इति ङीपि प्राप्ते -

ङीप्टाप्प्रत्ययनिषेधविधायकं विधिसूत्रम्-

**न षट्स्वस्रादिभ्यः ४।१।१०**

**षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः।**

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।**

**याता मातेति सप्तैते स्वस्रादय उदाहृताः। अप्तृन्... इति सूत्रेण दीर्घः- स्वसा, स्वसारौ, स्वसारः।**

**माता पितृवत्। शसि मातॄः। इत्यृदन्ताः॥ द्यौर्गोवत्। इत्योदन्ताः। राः पुंवत्। इत्यैदन्ताः। नौग्लौवत्। इत्यौदन्ताः।**

स्वसृ- तिसृ - चतसृ - ननान्दृ - दुहितृ - यातृ - मातृशब्दाः स्वस्रादिगणपठिताशब्दाः एतेभ्य ऋदन्तप्रयुक्तो ङीप्प्रत्ययो न भवतीति भावः। इति ङीपो निषेधः। स्वसृशब्दात् सु, 'ऋदुशनस्-' इत्यनङ्, तृच्प्रत्ययान्तत्वाभावेऽपि "अप्तृन्तृच्-' इति सूत्रे स्वसृग्रहणाद् दीर्घः इति विशेषः।

स्वसृ + सु स्वसृ + स् स्वसन् + स् स्वसान् + स् स्वसान् स्वसा। 'हल्ङ्याब्भ्यो-' इति सलोपे 'नलोप-' इति नलोपः। स्वसृ + औ स्वसर् + औ स्वसार् + औ स्वसारौ। स्वसृ + जस् स्वसृ + अस् स्वसर् + अस् स्वसार् + अस् स्वसारस् स्वसारर् स्वसारः।

स्वसारम् । स्वसारौ । स्वसृ :। स्वस्रा । स्वसृभ्याम् । स्वसृभिः । स्वस्रे । स्वसृभ्याम् । स्वसृभ्यः । स्वसुः । स्वसृभ्याम् । स्वसृभ्यः । स्वसुः । स्वस्रोः । स्वसृणाम् । स्वसरि । स्वस्रोः । स्वसृषु । हे स्वसः / हे स्वसारौ / हे स्वसारः / माता पितृवत् । शसि-मातॄः ।

द्योशब्दो गोवत्, 'गोतो णित्' इत्यस्य 'ओतो णित्' इत्यनेन व्याख्यानाद् णिद्वत्त्वातिदेशाद् "अचो ञ्णिति" इति वृद्धिरिति भावः । द्यौः । द्यावौ । द्यावः इत्यादि ।

'राः स्त्रीत्येके' इति क्षीरस्वाम्युक्तेः स्त्रीलिङ्गोऽप्ययं रैशब्दः । राः । रायौ । रायः । पुंवत् ।नौः । नावौ। नावः । ग्लौवत् ।

इति अजन्तस्त्रीलिङ्गप्रकरणम् ।

| **धेनुशब्दस्य रूपावली** | | | **वधूशब्दस्य रूपावली** | | |
|---|---|---|---|---|---|
| धेनुः<br>धेनुम्<br>धेन्वा | धेनू<br>धेनू<br>धेनुभ्याम् | धेनवः<br>धेनूः<br>धेनुभिः | वधूः<br>वधूम्<br>वध्वा | वध्वौ<br>वध्वौ<br>वधूभ्याम् | वध्वः<br>वधूः<br>वधूभिः |
| धेन्वै<br>धेनवे | धेनुभ्याम् | धेनुभ्यः | वध्वै | वधूभ्याम् | वधूभ्यः |
| धेन्वाः<br>धेनोः | धेनुभ्याम् | धेनुभ्यः | वध्वाः | वधूभ्याम् | वधूभ्यः |
| धेन्वाः<br>धेनोः | धेन्वोः | धेनूनाम् | वध्वाः | वध्वोः | वधूनाम् |
| धेन्वाम्<br>धेनौ | धेन्वोः | धेनुषु | वध्वाम् | वध्वोः | वधूषु |
| हे धेनो / | हे धेनू / | हे धेनवः / | हे वधु / | हे वध्वौ / | हे वध्वः / |

# प्रयोगसिद्धिप्रकारः

### धेनवः

धेनुशब्दस्य “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण प्रथमाया बहुवचने जस्‌विभक्तावनुबन्धलोपे धेनु + अस् इत्यत्र “प्रथमयोः पूर्वसवर्णः” इत्यनेन प्राप्तं पूर्वसवर्णदीर्घं बाधित्वा “जसि च” इत्यनेन गुणे धेनो + अस् इति जाते “एचोऽयवायावः” इति सूत्रेण अवादेशे वर्णयोगे धेनवस् इति जाते “सुप्तिङन्तं पदम् इत्यनेन पदत्वात् “ससजुषो रुः” इत्यनेन रुत्वे “खरवसानयोर्विसर्जनीयः” इत्यनेन विसर्गे धेनवः इति रूपं सिद्धम् ।

### धेन्वोः

धेनुशब्दस्य “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन प्रातिपदिकसंज्ञायां द्वित्वविवक्षायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण सप्तम्या द्विवचने ओस्‌विभक्तौ धेनु + ओस् इत्यत्र “इको यणचि” इत्यनेन यणि धेन्वोस् इति जाते सकारस्य रुत्वे विसर्गे धेन्वोः इति रूपं सिद्धम् ।

### क्रोष्ट्री

क्रोष्टुशब्दस्य स्त्रीत्वविवक्षायां “स्त्रियां च” इतिसूत्रेण तृज्वद्भावे क्रोष्टृ इति जाते “ऋन्नेभ्यो ङीप्” इति सूत्रेण ङीपि अनुबन्धलोपे क्रोष्टृ + ई इत्यत्र यणि क्रोष्ट्रीशब्दस्य कृदन्तत्वनिमित्तकत्वेन प्रातिपदिकत्वाद् लिङ्गविशिष्टपरिभाषया “स्वौजसमौट्-” इति सूत्रेण प्रथमाया एकवचने सुविभक्तौ उकारस्येत्सज्ञायां ‘तस्य लोपः’ इत्यनेन लोपे क्रोष्ट्री + स् इत्यवस्थायां “हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्” इत्यनेन सकारस्य लोपे क्रोष्ट्री इति रूपं सिद्धम् ।

### वधूनाम्

वधूशब्दस्य “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां “ङ्याप्प्रातिपदिकात्” इति सूत्रसहकारेण “स्वौजसमौट्-” इति सूत्रेण षष्ठ्या बहुवचने आम्‌विभक्तौ वधू + आम् इति जाते “यू स्त्र्याख्यौ नदी” इति सूत्रेण वधूशब्दस्य नदीसंज्ञायां “ह्रस्वनद्यापो नुट्” इति सूत्रेण नुडागमेऽनुबन्धलोपे “पर्जन्यवल्लक्षणप्रवृत्तिः” इति न्यायेन “नामि” इत्यनेन दीर्घे वधूनाम् इति रूपं सिद्धम् ।

# अभ्यासः

१. **निम्नाङ्कितसूत्राणां सरलर्थं लिखत**

(क) स्त्रियां च (ख) ऋन्नेभ्यो ङीप्

(ग) न षट्स्वस्रादिभ्यः (घ) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

(ङ) वाऽऽमि ।

२. **अधोलिखितानां प्रश्नानामुत्तराणि दत्त**

(क) "प्रथमयोः पूर्वसवर्णः, जसि च इत्यनयोरेकत्र प्राप्तौ कं सूत्रं प्रवर्तते ?

(ख) 'अमि पूर्वः, अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' अनयोर्बाधकं सूत्रं किम् ?

(ग) "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इत्यस्यार्थं विलिख्य वधूशब्दस्य प्रथमाया एकवचने सकारस्य लोपो भवति न वा ?

(घ) स्वस्रादिशब्दाः कति सन्ति ? के च ते ?

(ङ) द्योशब्दात् परस्थितानां सर्वनामस्थानविभक्तीनां णिद्वद्भावः केन सूत्रेण भवति ?

३. **नौशब्दभातृशब्दयो रूपावलीं लिखत ।**

४. **क्रोष्ट्रयः, धेन्वाः/धेनोः, मातृः, नावौ, एतेषां रूपसिद्धिप्रकारं ससूत्रं लिखत ।**

५. **परस्परं मेलयत**

| | |
|---|---|
| नदीसंज्ञा | विभक्तिश्च |
| घिसंज्ञा | अलोऽन्त्यात्पूर्व उपधा |
| विभक्तिसंज्ञा | अपृक्त एकाल्प्रत्ययः |
| उपधासंज्ञा | ङिति ह्रस्वश्च |
| अपृक्तसंज्ञा | शेषो घ्यसखि |

अथाजन्तनपुंसकलिङ्गप्रकरणम्

## अकारान्तशब्दस्य रूपसिद्धिप्रक्रिया

नपुंसकलिङ्गे ज्ञानशब्दात् सौ, तस्य 'स्वमोर्नपुंसकात्' इत्यनेन लुकि प्राप्ते तदपवादं सूत्रम्-

अमादेशविधायकं विधिसूत्रम्-

**अतोऽम् ७ । १ । २४**
**अतोऽङ्गात्क्लीबात्स्वमोरं स्यात् । "अमि पूर्वः" ज्ञानम् । " एङ्ह्रस्वात्..." इति हल्मात्रलोपः, हे ज्ञान !**

अनेन सकारस्य अमादेशे 'अमि पूर्वः' इति पूर्वरूपम् ।

ज्ञान + सु ज्ञान + स् ज्ञान + अम् ज्ञानम् ।

शी-इत्यादेशविधायकं विधिसूत्रम्-

**नपुंसकाच्च ७ । १ । १९**
**क्लीबात्परस्यौङः शी स्यात् । भसंज्ञायाम् ।**

इवर्णावर्णयोः लोपादेशविधायकं विधिसूत्रम्-

**यस्येति च ६ । ४ १४८**
**भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते । "औङः श्यां प्रतिषेधो वाच्यः"** (वा.) **ज्ञाने ।**

औङः यः शी आदेशः तस्मिन् परतः 'यस्येति च' इति लोपस्य प्रतिषेधो वक्तव्य इत्यर्थः ।

ज्ञान + औ ज्ञान + शी ज्ञान + ई ज्ञाने (गुणः) ।

शि-इत्यादेशविधायकं विधिसूत्रम्-

**जश्शसोः शिः ७ । १ । २०**
**क्लीबादनयोः शिः स्यात् ।**
नपुंसकलिङ्गात् प्रातिपदिकात् परयोः जश्शसोः स्थाने शि इत्ययमादेशः स्यात् ।

सर्वनामस्थानसंज्ञाविधायकं सूत्रम्-

**शि सर्वनामस्थानम्** १। १। ४२

**'शि' इत्येतदुक्तसंज्ञं स्यात् ।**

'शि' इत्यस्य स्थानिवत्त्वेन सुट्त्वेऽपि 'सुडनपुंसकस्य' इत्यत्र नपुंसके निषेधात् तेन सर्वनामस्थानसंज्ञाऽभावेऽनेन सर्वनामस्थानसंज्ञा विधीयते ।

नुमागमविधायकं विधिसूत्रम्-

**नपुंसकस्य झलचः** ७। १। ७२

**झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे । उपधादीर्घः, ज्ञानानि । पुनस्तद्वत् । शेषं रामवत् । एवं धनवनफलादयः ।**

सम्बोधने सौ तस्य अमादेशे पूर्वरूपे च कृते 'एङ्ह्रस्वात्-' इत्यनेन मकारमात्रस्य लोपः ।

ज्ञान + सु ज्ञान + स् ज्ञान + अम् ज्ञानम् हे ज्ञान !

यद्यपि 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यस्य एङन्ताद्ध्रस्वान्ताच्चाङ्गात् परा या सम्बुद्धिः तदवयवस्य हलो लोप इत्यर्थो लभ्यते तथा चात्र पूर्वरूपे कृते 'ज्ञानम्' इत्यत्र पूर्वान्तत्वेन ज्ञानस्याङ्गत्वेऽपि अवशिष्टस्य मकारमात्रस्य सम्बुद्धित्वाभावात् मकारमात्रस्य लोपो न सम्भवति तथापि 'हे ज्ञान' इत्यादिप्रयोगानुरोधाद् 'एङ्ह्रस्वात्-' इत्यस्य एङन्ताद् ह्रस्वान्ताच्चाङ्गात् परो यः सम्बुद्ध्यवयवहल् तस्य लोप इत्यर्थः स्वीक्रियते । प्रकृते च पूर्वरूपे कृतेऽपि ह्रस्वान्ताङ्गात्परत्वं सम्बुद्ध्यवयवस्य हल्येव विद्यमानत्वेन तस्य 'एङ्ह्रस्वात्-' इति लोपो निर्बाधः इति ज्ञेयम् ।

अमि 'स्वमोर्नपुंसकात्' इति लुकि प्राप्ते तन्निवृत्तये 'अतोऽम्' इत्यनेन अमेवादेशः सार्थकोऽस्ति । ननु 'अतः' 'म्' इत्येव सूत्रमस्तु, सोर्मकारादेशे ज्ञानमिति सिद्धेः । अमि च 'आदेः परस्य' इति अकारस्य मकारे अन्त्यस्य मकारस्य संयोगान्तलोपेनैव ज्ञानमिति सिद्धेरिति चेत् - तन्न भवति, एवं सति ज्ञानमित्यत्र "सुपि च" इति दीर्घापत्तेः । न च अदन्तसन्निपातमाश्रित्य प्रवृत्तस्य मादेशस्य तद्विघातकदीर्घनिमित्तत्वं न संभवति, सन्निपातपरिभाषाविरोधादिति वाच्यम्, 'सुपि च' इति दीर्घे कर्तव्ये सन्निपातपरिभाषाया अनित्यत्वेन अप्रवृत्तिः 'रामाय' इत्यादि निरूपणप्रसंगे उक्तमेवास्ति । द्वितीयायामपि - ज्ञानम् । ज्ञाने । ज्ञानानि । शेषं रामवत् ।

एवं धनवनफलादयः ।

अदडादेशविधायकं विधिसूत्रम्-

**अद्ड्डतरादिभ्य पञ्चभ्यः** ७। १। २५

**एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात् ।**

डतर, डतम, अन्य अन्यतर, इतर, इति डतरादयः सर्वादिगणपठिताः । अत्र डतरडतमौ प्रत्ययौ । अतस्तदन्तग्रहणेनात्र प्रत्ययग्रहणपरिभाषया कतरकतमशब्दौ उदाह्रियेते । कतरशब्दात् सौ तस्य अद्डादेशेऽनुबन्धलोपे कतर + अद् इति जाते भसंज्ञायाम्-

टेर्लोपादेशविधायकं विधिसूत्रम्-

**टेः ६ । ४ । १४३**

**डिति परे भस्य टेर्लोपः स्यात् । वाऽवसाने ॥ कतरत् । कतरद् । कतरे । कतराणि । भस्येति किम् । पञ्चमः । टेर्लुप्तत्वात् प्रथमयोः... इति पूर्वसवर्णदीर्घः एङ्ह्रस्वात्... इति संबुद्धिलोपश्च न च भवति । हे कतरत् । पुनस्तद्वत् । शेषं पुंवत् ॥ कतमत् । अन्यत् । अन्यतरत् । इतरत् । अन्यतमशब्दस्य तु अन्यतममित्येव । एकतरात्प्रतिषेधो वक्तव्यः (वा.) ॥ एकतरम् । सोरमादेशे कृते संनिपातपरिभाषया न जरस् । अजरम् । अजरसी । अजरे । परत्वाज्जरसि कृते झलन्तत्वान्नुम् ॥**

'वाऽवसाने' इति विकल्पेन चर्त्वे - कतर + सु कतर + स् कतर + अद्ड् कतर अद् कतर् + अद् कतरद् कतरत्, कतरद् । कतर + औ कतर + शी कतर + ई कतरे । कतर + जस् कतर + अस् कतर + शि कतर + इ कतरन् + इ कतरान् + इ (सर्वनामस्थाने चाऽसम्बुद्धौ' इति उपधादीर्घः) कतराणि ।

सूत्रे अनुवर्तमानस्य भस्य प्रयोजन्तु- पञ्चमः । अत्र पञ्चानां पूरण इत्यर्थे 'तस्य पूरणे डट्' इति डट्प्रत्यये 'नान्तादसंख्यादेर्मट्' इति मडागमे 'पञ्चन् + म' इत्यत्र पदत्वात् 'न लोप-' इति नकारस्य लोपः । अनेन विनापि भसंज्ञां टिलोपे तु 'पूर्वत्रासिद्धम्' इत्यनेन 'नलोपः-' सूत्रस्यासिद्धत्वाद् अत्रापि टिलोप आपद्येत ।

टेर्लुप्तत्वात् "प्रथमयोः" इति पूर्वसवर्णदीर्घः "एङ्ह्रस्वात्-" इति सम्बुद्धिलोपश्च न भवति । हे कतरत् । पुनस्तद्वत् । शेषं पुंवत् । एवमेव- कतमत् । इतरत् । अन्यत् । अन्यतरत् ।

अन्यतमशब्दस्य तु अन्यतममित्येव । तस्याव्युत्पन्नप्रातिपदिकत्वेन डतमप्रत्ययान्तत्वाभावेन तत्राद्डादेशो नेत्यर्थः ।

'एकतरात्प्रतिषेधो वक्तव्यः (वा) एकतरशब्दात्परयोः स्वमोरद्डादेशप्रतिषेधो भवतीत्यर्थः । एकतरम् । इत्यादि ।

अविद्यमाना जरा यस्य कुलस्येति विग्रहे "नञोऽस्त्यर्थानां-" इति बहुव्रीहौ समासे विद्यमानपदस्य लोपे 'गोस्त्रियोः-' इति ह्रस्वत्वे अजरशब्दो जायते ततः- सोरमादेशे कृते संनिपातपरिभाषया न जरस् । अजरम् । अजरसी,अजरे । जसि परत्वाज्जरसि कृते झलन्तत्वान्नुमि-

दीर्घादेशविधायकं विधिसूत्रम्-

**सान्तमहतः संयोगस्य ६ । ४ । १०**

**सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे । अजरांसि,अजराणि । अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस्, ततः सन्निपातपरिभाषया न लुक् - अजरसम्, अजरम् । अजरसी, अजरे / अजरांसि, अजराणि, शेषं पुंवत् । पद्दन्न...इति हृदयोदकास्यानां हृद् उदन् आसन् । हृन्दि । हृदा । हृद्भ्यामित्यादि । उदानि । उद्गा । उदभ्यामित्यादि । आसानि । आस्ना । आसभ्यामित्यादि । मांसि । मांसा । मान्भ्यामित्यादि । वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम् । अत एव भाष्ये मांस्पचन्या उखाया इत्युदाहृतम् । अयस्मयादित्वेन भत्वात्संयोगान्तलोपो न । पद्दन्न..इत्यत्र हि छन्दसीत्यनुवर्तितं वृत्तौ तथापि अपोभि इत्यत्र**

**मासश्छन्दसीति वार्तिके छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम् ॥**

अजर + जस् अजर + अस् अजरस् + अस् अजरस् + शि अजरस् + इ अजरन्स् + इ अजरान्स् + इ अजरांसि । पक्षे अजर + जस् अजर + अस् अजर + शि अजर + इ अजरन् + इ अजरान् + इ अजराणि । "पद्दन्नोमास्-" इति हृदयोदकास्यानां हृद् उदन् आसन् । हृन्दि । हृदा । हृद्भ्यामित्यादि । हृदय + शस् हृदय + अस् हृदय + शि हृदय + इ हृद् + इ हृन्द् + इ हृंद् + इ हृन्द् + इ हृन्दि । नकारस्यानुस्वारपरसवर्णेन पुनर्नकारादेशः । हृदय + शस् हृदय + अस् हृदय + शि हृदय + इ हृदयन् + इ हृदयान् + इ हृदयाणि । उदानि । उद्ना । उदभ्यामित्यदि । उदक + शस् उदक + अस् उदक + शि उदक + इ उदन् + इ उदान् + इ उदानि । उदक + शस् उदक + अस् उदक + शि उदक + इ उदकन् + इ उदकान् + इ उदकानि । उदक + टा उदक + आ उदन् + आ उद्न् + आ (अल्लोपोऽनः' इति लोपः) उद्ना । उदक + टा उदक + आ उदक + इन उदकेन ।

आसानि । आस्ना । आसभ्याम् । इत्यादि ।

मांसि । मांसा । मान्भ्यामित्यादि ।

मास + भ्याम् मांस् + भ्याम् मान्भ्याम् ('संयोगान्तस्य-' इत्यनेन सलोपः सकारस्य निवृत्तौ अनुस्वारस्य स्वतो नकाररूपम्) मास + भ्याम् मासाभ्याम् ।

वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम् । अत एव भाष्ये 'मांस्पचन्या उखायाः' इत्युदाहृतम् । अयस्मयादित्वेन भत्वात् संयोगान्तलोपो न । 'पद्दन्-' इत्यत्र हि 'छन्दसि' इत्यनुवर्तितं वृत्तौ, तथापि 'अपो भि' इत्यत्र 'मासश्छन्दसि (वा.) इति वार्तिके छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचित् - इति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्याः । इति बोध्यम् ।

ह्रस्वादेशविधायकं विधिसूत्रम्-

**ह्रस्वो नपुंसके प्रातिपदिकस्य** १ । २ । ४७

**क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात् । श्रीपं ज्ञानवत् । श्रीपाय । अत्र सन्निपातपरिभाषया "आतो धातोः" इत्याकारलोपो न ।**

तेन नपुंसके आकारान्तशब्दानां रूपाणि अकारान्तज्ञानशब्दस्येव जायन्ते, तथैव ईकारान्तानाम्, ऊकारान्तानाम्, ॠकारान्तादीनामपि विवेक्तव्यम् ।

श्रीपाशब्दस्य श्रीपमित्यादि ज्ञानवत् । श्रीपाय । अत्र 'सुपि च' इति दीर्घानन्तरं संनिपातपरिभाषया 'आतो धातोः' इत्याकारलोपो न ।

श्रीपा श्रीप + सु श्रीप + स् श्रीप + अम् श्रीपम् । श्रीपा श्रीप ङे श्रीप + ए श्रीप + य श्रीपाय ।

ननु उपजीव्यविघातकं प्रति उपजीवकं निमित्तं न भवतीति संनिपातपरिभाषया लभ्यते, प्रकृते च अदन्तमुपजीव्य प्रवृत्तस्य यादेशस्य आल्लोपं प्रति कथं न निमित्तत्त्वम् । यादेशस्य आकारमुपजीव्य प्रवृत्तत्वाभावेन आकारलोपं प्रति निमित्तत्वे बाधकाभावादिति चेन्मैवम् - यादेशस्तावद् ह्रस्वमवर्णमुपजीव्य प्रवर्तते । ततश्च ह्रस्वत्वमर्वणत्वं च समुदितं यादेशस्य उपजीव्यम् । तत्र 'कष्टाय' इति निर्देशात् संनिपातपरिभाषां बाधित्वा कृतेऽपि दीर्घे ह्रस्वत्वांश एव निवृत्तः, अवर्णांशस्त्वनिवृत्त एव । आकारस्यापि निवृत्तौ तु उपजीव्यविघातः स्यादेवेति भवेदेव सन्निपातपरिभाषाविरोधः । अस्मिन् प्रसंगे "आतो धातोः" इत्यत्र लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्त (साक्षादुच्चरितो न तु दीर्घेण विहितः) एवाकारान्तधातुर्गृह्यते । इह तु पाधातोर्ह्रस्वत्वे पुनर्दीर्घे सति अवगम्यमानं पास्वरूपं लाक्षणिकमेवेति न 'आतो धातोः' इत्यस्य प्रवृत्तिरिति मतान्तरम् ।

| ज्ञानशब्दस्य रूपावली | | | आस्यशब्दस्य रूपावली | | |
|---|---|---|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि | आस्यम् | आस्ये | आस्यानि |
| ज्ञानम् | ज्ञाने | ज्ञानानि | आस्यम् | आस्ये | आसानि / आस्यानि |
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः | आस्ना / आस्येन | आसभ्याम् / आस्याभ्याम् | आसभिः / आस्यैः |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः | आस्ने / आस्याय | आसभ्याम् / आस्याभ्याम् | आसभ्यः / आस्येभ्यः |
| ज्ञानात् / द् | ज्ञानाभ्याम् | ज्ञानेभ्यः | आस्नः / आस्यात्-द् | आसभ्याम् / आस्याभ्याम् | आसभ्यः / आस्येभ्यः |
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् | आस्नः / आस्यस्य | आस्नोः / आस्ययोः | आस्नाम् / आस्यानाम् |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु | आस्नि / आसनि / आस्ये | आस्नोः / आस्ययोः | आससु / आस्येषु |
| हे ज्ञान / | हे ज्ञाने / | हे ज्ञानानि | हे आस्य / | हे आस्ये / | हे आस्यानि |

# प्रयोगसिद्धिप्रकारः

## ज्ञानानि

ज्ञानशब्दस्य "कृतद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण प्रथमाया बहुवचने जस्विभक्तावनुबन्धलोपे 'ज्ञान + अस्' इति जाते "जश्शसोः शिः" इति सूत्रेण 'शि' आदेशेऽनुबन्धलोपे "शि सर्वनामस्थानम्" इति सूत्रेण सर्वनामस्थानसंज्ञायाम् "मिदचोऽन्त्यात्परः" इति सूत्रसहकारेण "नपुंसकस्य झलचः" इत्यनेन नुमागमेऽनुबन्धलोपे उपधासंज्ञायां "सर्वनामस्थाने चाऽसंबुद्धौ" इति सूत्रेण उपधादीर्घे वर्णसम्मेलने ज्ञानानि इति रूपं सिद्धम् ।

## कतरत्, कतरद्

कतरशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण सौ तस्यानुबन्धलोपे "अतोऽम्" इत्यनेन प्राप्तम् अमादेशं प्रबाध्य "अद्ड्डतरादिभ्यः पञ्चभ्यः" इत्यनेन अद्डादेशेऽनुबन्धलोपे कतर + अद् इति जाते भसंज्ञायां "टेः" इत्यनेन टिलोपे कतर् + अद् इति जाते वर्णयोगे "वाऽवसाने" इत्यनेन विकल्पेन चर्त्वे कतरत् इति रूपं पक्षे कतरद् इति रूपद्वयं सिद्धम् ।

# अभ्यासः

## १. अधस्तनानां सूत्राणां सरलार्थं लिखत

(क) अतोऽम्
(ख) नपुंसकाच्च
(ग) शि सर्वनामस्थानम्
(घ) अद्ड्डतरादिभ्यः पञ्चभ्यः
(ङ) ह्रस्वो नपुंसके प्रातिपदिकस्य ।

## २. निम्नाङ्कितानां प्रश्नानां समुचितमुत्तरं दत्त

(क) नपुंसकलिङ्गे सुट्विभक्तीनां सर्वनामस्थानसंज्ञा भवति न वा ? कारणसहितं स्पष्टं कुरुत ।

(ख) 'शि' इत्यस्य सर्वनामस्थानसंज्ञायाः प्रयोजनं किमस्ति ?

(ग) 'अतोऽम्' इत्यनेन अमःस्थाने अमादेशविधानं किमर्थम् ?

(घ) डतरादयः पञ्च के के सन्ति ? तेषु कति प्रत्ययाः कति च प्रातिपदिकानि ?

(ङ) नपुंसके दीर्घान्तशब्दा न भवन्ति इत्यभिव्यञ्जकं सूत्रं लिखत ।

## ३. इतर-धन-सर्व-श्रीपा-शब्दानां रूपावलीर्लिखत ।

## ४. अधः प्रदत्तानां ससूत्रं सिद्धिप्रक्रियां लिखत

ज्ञान + सु ज्ञान + स् ज्ञान + अम् ज्ञानम् ज्ञान हे ज्ञान ⁄

कतर + औ कतर + शी कतर + ई कतरे ।

हृदय + शस् हृदय + अस् हृदय + शि हृदय + इ हृद् + इ हृन्द् + इ हृन्दि ।

सर्व + जस् सर्व + अस् सर्व + शि सर्व + इ सर्वन् + इ सर्वान् + इ सर्वाणि ।

## ५. उपयुक्तेषु (✓) इति चिह्नं अनुपयुक्तेषु (✗) इति चिह्नं योजयत

(क) अकारान्तसंज्ञासर्वनामशब्दयो रूपाणि नपुंसकलिङ्गे समानानि भवन्ति ( ... )

(ख) नपुंसके सुटः सर्वनामस्थानसंज्ञा भवति । ( ... )

(ग) 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेन उपधासंज्ञा भवति । ( ... )

पञ्चत्रिंशः पाठः

# इवर्णान्तशब्दस्य रूपसिद्धिप्रक्रिया

स्वमोलुगादेशविधायकं विधिसूत्रम्-

**स्वमोर्नपुंसकात् ७ । १ । २३**

**क्लीबादङ्गात्परयोः स्वमोलुक् स्यात् । वारि ।**

वारिशब्दात् सौ तस्य लुकि- वारि

नुमागमविधायकं विधिसूत्रम्-

**इकोऽचि विभक्तौ ७ । १ । ७३**

**इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ । वारिणी । वारीणि । " न लुमता.." इति निषेधस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः, हे वारे ! हे वारि ! "आङो ना...." इति वारिणा । घेर्ङिति इति गुणे प्राप्ते–**

"वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन (वा.)

**वारिणे । वारिणः । वारिणोः । "नुमचिर..." इति नुट् । "नामि" इति दीर्घः । वारीणाम् । वारीणि । वारिणोः । हलादौ हरिवत् ।**

अजादौ विभक्तौ "नपुंसकस्य झलचः" इति सूत्रमनेन सूत्रेण बाध्यते ।

वारिणी । वारीणि ।

वारि + औ वारि + शी वारि + ई वारिन् + ई वारिणी

वारि + जस् वारि + अस् वारि + शि वारि + इ वारिन् + इ वारीन् + इ (उपधादीर्घः) वारीणि

'न लुमताङ्गस्य' इति निषेधस्यानित्यत्वपक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे / हे वारि /

संबोधने वारिशब्दात् सौ तस्य "स्वमोर्नपुंसकात्" इति लुकि सति "न लुमताङ्गस्य" इत्यस्य अनित्यतया "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यनेन प्रत्ययलक्षणेन प्रत्ययपरत्वमाश्रित्य "ह्रस्वस्य गुणः" इत्यनेन गुणे हे वारे / इति रूपम्, पक्षे "न लुमताङ्गस्य" इत्यनेन प्रत्ययलक्षणस्य निषेधात् गुणाभावे हे वारि / इति रूपद्वयं जायते ।

टाविभक्तौ नुमः परत्वाद् "आङो ना-" इति नादेशः । वारिणा । नुमः परत्वाद् "घेर्ङिति" इति गुणे प्राप्ते -

**"वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन** (वा.४३७३)

वृद्धि-औत्व-तृज्वद्भाव-गुणैः सह नुमः प्राप्तौ सत्यां "विप्रतिषेधे परं कार्यम्" इति सूत्रं प्रबाध्य अनेन वार्तिकेन नुमः प्रवृत्तीत्यर्थः ।

वारिणे । वारिणः । वारिणोः ।'नुमचिर-' इति नुट् । 'नामि' इति दीर्घः । वारीणाम् ।

अत्र नुम्नुटोः को विशेष इति जिज्ञासायाम् - नुमङ्गावयवो भवति, नुट् तु प्रत्ययस्यावयवः । परत्वान्नुमि कृते तु 'नामि' इत्यनेनाङ्गस्य दीर्घो न स्यादिति भावः ।

वारिणि । वारिणोः । हलादौ हरिवत् ।

वारि + टा वारि + आ वारि + ना वारिणा । वारि + ङे वारि + ए वारिन् + ए वारिणे । वारि + आम् वारि + नुट् आम् वारी + नाम् वारीणाम् । वारि + ओस् वारिन् + ओस् वारिणोस् वारिणोर् वारिणोः । वारि + ङि वारि + इ वारिन् + इ वारिणि ।

न विद्यते आदिः = उत्पत्तिः यस्य सः अनादिः = ईश्वरः, अनादिः = अविद्या, अनादि = बह्म । अतस्त्रिलिङ्गोऽयं शब्दो विशेष्यनिघ्नः = विशेष्यलिङ्गानुसारी अस्ति । तस्य नपुंसके प्रथमाद्वितीययोर्वारिवद्रूपाणि जायन्ते । अनादि । अनादिनी । अनादीनि । पुनस्तद्वत् । हे अनादे !, हे अनादि ! हे अनादिनी ! हे अनादीनि !

पुंवद्भावविधायकमतिदेशसूत्रम्-

**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ७ । १ । ७४**

**प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि । अनादये, अनादिने इत्यादि । शेषं वारिवत् । पीलुर्वृक्षः, तत्फलं पीलु, तस्मै पीलुने । अत्र न पुंवत्, प्रवृत्तिनिमित्तभेदात् ।**

घटपटादिशब्दा घटत्वपटत्वादिजातिविशिष्टं तत्तद्व्यक्तिरूपं पदार्थं बोधयन्ति । ततश्च यद्विशेषणं (घटत्वादिकम्) पुरस्कृत्य घटादिशब्दाः तत्तद्व्यक्तिषु प्रयुज्यन्ते, तद्विशेषणं शब्दस्य प्रवृत्तिनिमित्तमित्युच्यते । एवं च नपुंसके प्रयुज्यमाने लिङ्गान्तरे च यस्य एकमेव वाच्यतावच्छेदकम् (प्रवृत्तिनिमित्तम्), तत् शब्दस्वरूपं भाषितपुंस्कशब्देन विवक्षितम् । अनादिशब्दश्च उत्पत्यभावात्मकमनादित्वं पुरस्कृत्य स्त्रीपुंनपुंसकतत्तद्व्यक्तिप्रत्यायकस्तेन तस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कता भवति । अतोऽयमनादिशब्दः क्वचिद् अनादित्वविशिष्टमीश्वरं बोधयति, क्वचिद् अनादित्वविशिष्टामविद्यां बोधयति, क्वचिच्च अनादित्वविशिष्टं ब्रह्म बोधयति । अतो भाषितपुंस्कोऽयं शब्द इति बोध्यम् । अनादिना ।

अत्र विकल्पने पुंवद्भावेऽभावे चैकमेव रूपम्, उभयत्र नादेशः ।

पुंवत्त्वपक्षे हरिवत्, शेषं वारिवत् ।

अनादि + ङे अनादि + ए अनादे + ए (पुंवत्तवे घेर्ङितीति गुणः) अनादय् + ए अनादये ।

अनादि ङे अनादि + ए अनादिन् + ए अनादिने ।

अनादि + ङि अनादि + इ अनादि + औ (पुंवत्त्वे 'अच्च घेः' इति) अनादौ ।

अनादि + ङि अनादि + इ अनादिन् + इ अनादिनि ।

पीलुर्वृक्षः, तत्फलं पीलु, तस्मै पीलुने । अत्र न पुंवत् प्रवृत्तिनिमित्तभेदात् ।

पीलुशब्दो वृक्षविशेषस्य वाचकत्वे पुँल्लिङ्गे वर्तते । तस्मादेव विकारेऽर्थे अण्प्रत्यये 'फले लुक्' इत्यनेन प्रत्ययस्य लुकि सति पीलुशब्द एव फलविशेषस्य वाचकत्वे नपुंसके प्रयुज्यते । अस्य तृतीयादौ पुंवद्भावो न भवति । वृक्षत्वव्याप्यजातिविशेषात्मकं पीलुत्वं वृक्षविशेषे वाच्ये प्रवृत्तिनिमित्तम् । फलविशेषे तु वाच्ये पलत्वव्याप्यजातिविशेषात्मकं पीलुत्वं प्रवृत्तिनिमित्तमिति तयोः प्रवृत्तिनिमित्तभेदात् ।

दधिशब्दस्य प्रथमाद्वितीययोः वारिवद्रूपाणि जायन्ते । दधि । दधिनी । दधीनि । पुनस्तद्वत् ।

अनङादेशविधायकं विधिसूत्रम्-

**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७ । १ । ७५**

**एषामनङ् स्याट्टादावचि स चोदात्तः । दध्ना । दध्ने । दध्नः । दध्न, दध्नोः, दध्नाम् । दध्नि, दधनि । दध्नोः । शेषं वारिवत् । एवमस्थिसक्थ्यक्षीणि । तदन्तस्याप्यनङ् । अतिदध्ना ।**

अस्थि दधि सक्थि अक्षि एतेषां तृतीयादितोऽजादौ विभक्तौ परेऽन्त्यवर्णस्य अनङादेशो भवति, स उदात्तश्च जायते । अनेन अनङादेशे 'अल्लोपोऽनः' इत्यनेन अकारस्य लोपः । दध्ना । दध्ने । दध्नः । दध्नः । दध्नोः । दध्नाम् । 'विभाषा ङिश्योः' इति विकल्पेन अलोपः । दध्नि/दधनि । दध्नोः । शेषं वारिवत् । तदन्तस्याप्यनङ्, अतिदध्ना ।

दधि + टा दधि + आ दधन् + आ दध्न् + आ दध्ना । दधि + ङे दधि + ए दधन् + ए दध्न् + ए दध्ने । दधि + ङसि दधि + अस् दधन् + अस् दध्न् + अस् दध्नस् दध्नर् दध्नः । दधि + आम् दध्न् + आम् दध्नाम् । दधि + ङि दधि + इ दधन् + इ दध्न् + इ दध्नि । दधि + ङि दधि + इ दधन् + इ दधनि ।

सु ध्यायतीति, सुशोभना धीर्यस्येति वा विग्रहे सुधीशब्दस्य "ह्रस्वो नपुंसके-" इति ह्रस्वत्वे कृते वारिवद्रूपाणि जायन्ते । तृतीयादौ पुंवत्त्वविकल्पः ।

सुधि । सुधिनी । सुधीनि । हे सुधे, हे सुधि ! । सुधिया, सुधिना । सुधियाम्, सुधीनाम् । प्रध्या, प्रधिना ।

| वारिशब्दस्य रूपावली | | |
|---|---|---|
| वारि | वारिणी | वारीणि |
| वारि | वारिणी | वरीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |
| हे वारे / <br> हे वारि / | हे वारिणी / | हे वारीणि / |

| अनादिशब्दस्य रूपावली | | |
|---|---|---|
| अनादि | अनादिनी | अनादीनि |
| अनादि | अनादिनी | अनादीनि |
| अनादिना | अनादिभ्याम् | अनादिभिः |
| अनादये / अनादिने | अनादिभ्याम् | अनादिभ्यः |
| अनादेः / अनादिनः | अनादिभ्याम् | अनादिभ्यः |
| अनादेः / अनादिनः | अनाद्योः / अनादिनोः | अनादीनाम् |
| अनादौ / अनादिनि | अनाद्योः / अनादिनोः | अनादिषु |
| हे अनादे / /हे अनादि / | हे अनादिनी / | हे अनादीनि / |

| सुधीशब्दस्य रूपावली | | |
|---|---|---|
| सुधि | सुधिनी | सुधीनि |
| सुधि | सुधिनी | सुधीनि |
| सुधिया/सुधिना | सुधिभ्याम् | सुधिभिः |
| सुधिये/सुधिने | सुधिभ्याम् | सुधिभ्यः |
| सुधियः/सुधिनः | सुधिभ्याम् | सुधिभ्यः |
| सुधियः/सुधिनः | सुधियोः/सुधिनोः | सुधियाम्/सुधीनाम् |
| सुधियि/सुधिनि | सुधियोः/सुधिनोः | सुधिषु |
| हे सुधे //हे सुधि / | हे सुधिनी / | हे सुधीनि / |

| दाधिशब्दस्य रूपावली | | |
|---|---|---|
| दधि | दधिनी | दधीनि |
| दधि | दधिनी | दधीनि |
| दध्ना | दधिभ्याम् | दधिभिः |
| दध्ने | दधिभ्याम् | दधिभ्यः |
| दध्नः | दधिभ्याम् | दधिभ्यः |
| दध्नः | दध्नोः | दध्नाम् |
| दध्नि<br>दधनि | दध्नोः | दधिषु |
| हे दधे /<br>हे दधि / | हे दधिनी / | हे दधीनि / |

## प्रयोगसिद्धिप्रकारः

### वारिणा

वारिशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण तृतीयाया एकवचने टाविभक्तावनुबन्धलोपे वारि + आ इत्यवस्थायां "शेषो घ्यसखि" इत्यनेन घिसंज्ञायां "इकोऽचि विभक्तौ" इत्यनेन नुमि प्राप्ते "आङो नाऽस्त्रियाम्" इति सूत्रेण नादेशे च प्राप्ते "विप्रतिषेधे परं कार्यम्" इति सूत्रसहकारेण परत्वात् नुमं बाधित्वा 'आङो ना-' इत्यनेन नादेशे "अट्कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे वारिणा इति रूपं सिद्धम् ।

### दध्ने

दधिशब्दस्य "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण चतुर्थ्या एकवचने ङेविभक्तावनुबन्धलोपे दधि + ए इत्यवस्थायां "इकोचि विभक्तौ" इत्यनेन प्राप्तं नुमम् अपवादत्वेन बाधित्वा "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इति सूत्रेण इकारस्थाने अनङादेशेऽनुबन्धलोपे दधन् + ए इति जाते "यचि भम्" इत्यनेन भसंज्ञायां "अल्लोपोऽनः" इति सूत्रेण अकारस्य लोपे दध्न् + ए इत्यत्र वर्णसम्मेलने दध्ने इति रूपं सिद्धम् ।

### अनादौ / अनादिनि

अनादिशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां "ङ्याप्प्रातिपदिकात्" इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण सप्तम्या एकवचने ङिविभक्तावनुबन्धलोपे अनादि + इ इत्यवस्थायां "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इति सूत्रेण गालवपक्षे पुंवद्भावे घिसंज्ञायां "अच्च घेः" इति सूत्रेण शब्दस्य अकारान्तादेशे विभक्तेः औतादेशे च जाते अनाद + औ "वृद्धिरेचि" इत्यनेन वृद्धौ अनादौ इति पक्षे पुंवत्त्वाभावाद् "इकोऽचि विभक्तौ" इति सूत्रेण नुमागमेऽनुबन्धलोपे वर्णसम्मेलने अनादिनि इति रूपद्वयं सिद्धम् ।

## अभ्यासः

### १. निम्नसूत्राणां सरलार्थं लिखत

(क) स्वमोर्नपुंसकात्

(ख) इकोऽचि विभक्तौ

(ग) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य

(घ) न भूसुधियोः

(ङ) शेषो घ्यसखि

### २. अधोऽङ्कितानां प्रश्नानामुत्तराणि दत्त

(क) 'स्वमोर्नपुंसकात्' 'अतोऽम्' इत्यनयोः कुत्र किं सूत्रं प्रवर्त्तते ?

(ख) वारीणि इत्यत्र केन सूत्रेण नुमागमः ?

(ग) आमि नुम्नुटोः को विधिर्जायते ? तत्र कारणं किम् ?

(घ) अनादिशब्दस्य सर्वत्र घिसंज्ञायामपि पुंवत्त्वे 'घेर्ङिति' इति गुणो भवति पुंवत्त्वाभावे गुणो न भवतीत्यस्य कारणमन्विष्य लिखत ।

(ङ) क्लीबशब्दस्य कोऽर्थः ?

### ३. परस्परं मेलयत

| | |
|---|---|
| वारीणि | गुणः |
| दधिनी | अलोपः |
| अनादेः | इयङादेशः |
| दध्नाम् | 'शि' आदेशः |
| सुधियि | 'शी' आदेशः |

### ४. वारिदधिशब्दयो रूपावलीं कण्ठतः श्रावयत ।

### ५. वारि, वारिणी, वारिषु, एतेषां सूत्रनिर्देशनपूर्वकं रूपसिद्धिप्रक्रियां लिखत ।

### ६. रिक्तस्थानं पूरयत

(क)

| | | |
|---|---|---|
| अक्षि | ... | अक्षीणि |
| अक्षि | ... | अक्षीणि |
| ... | अक्षिभ्याम् | ... |
| अक्ष्णे | अक्षिभ्याम् | ... |
| ... | अक्षिभ्याम् | अक्षिभ्यः |
| अक्ष्णः | ... | ... |
| अक्ष्णि अक्षणि | ... | अक्षिषु |
| ... | हे अक्षिणी / | हे अक्षीणि / |

# उकारान्तादि-औकारान्तशब्दानां रूपसिद्धिप्रक्रिया

**मधु । मधुनी । मधूनि । हे मधो, हे मधु! । एवमम्ब्वादयः । सानुशब्दस्य स्नुर्वा स्नूनि, सानूनि ।**

'मधु मद्ये पुष्परसे' मधुर्वसन्ते चैत्रे च' इति कोशान्मधुशब्दस्य पुंनपुंसकयोः मद्यत्ववसन्तत्वादिरूप-प्रवृत्तिनिमित्तभेदाद् न पुंवत्त्वविकल्पः ।

सानु । सानुनी । सानूनि । सानु । सानुनी । "मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा" इति वार्तिकेन शसादौ सानुशब्दस्य स्नुर्वा । स्नूनि, सानूनि ।

**प्रियक्रोष्टुः । प्रियक्रोष्टुनी । तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम् । प्रियक्रोष्टूनि । टादौ पुंवत्पक्षे- प्रियक्रोष्ट्रा, प्रियक्रोष्टुना । प्रियक्रोष्ट्रे, प्रियक्रोष्टवे । अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव । प्रियक्रोष्टुना । प्रियक्रोष्टुने । "नुमचिर.." इति नुट् । प्रियक्रोष्टूनाम् । इत्युदन्ताः ।**

प्रियः क्रोष्टा यस्य तदिति विग्रहेण निष्पन्नः प्रियक्रोष्टुशब्दः । नपुंसके सर्वनामस्थानत्वाभावान्न तृज्वत्वम् । प्रियक्रोष्टु । प्रियकोष्टुनी । जश्शसोः शिभावे सति 'शि सर्वनामस्थानम्' इति सर्वनामस्थानत्वाद् नुमं बाधित्वा परत्वात् तृज्वत्त्वे प्राप्ते "वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति नुम् । प्रियक्रोष्टूनि । टादौ पुंवत्पक्षे "विभाषा तृतीयादिष्वचि" इति तृज्वद्भावविकल्पेन - प्रियक्रोष्ट्रा, प्रियक्रोष्टुना । प्रियक्रोष्ट्रे, प्रियक्रोष्टवे । पुंवद्भावस्याभावपक्षे तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमेव । प्रियक्रोष्टुना । प्रियक्रोष्टुने ।

आमि पुंवत्त्वे तृज्वत्वं बाधित्वा नुट् । पुंवत्त्वाभावे तु तृज्वत्वं बाधित्वा नुम्, तदपि बाधित्वा नुडिति भावं बोधयितुमाह -

**नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन इति नुट् । प्रियक्रोष्टूनाम् ।**

सुलु, सुलुनी, सुलूनि । पुनस्तद्वत् । सुल्वा, सुलुना । इत्यूदन्ताः ।

सुलूशब्दस्य 'ह्रस्वो नपुंसके-" इति ह्रस्वे कृते - सुलु । सुलुनी । सुलूनि । पुनस्तद्वत् ।

शोभनलवनकर्तृत्वं प्रवृत्तिनिमित्तमेकमेवेति पुंवत्त्वविकल्पः । पुंवत्त्वे ह्रस्वाभावे घिसंज्ञाभावात् नादेशो न 'ओः सुपि' इति यण् । पुंवत्त्वाभावपक्षे तु यणं बाधित्वा नुम्, सुल्वा / सुलुना । सुल्वे, सुलुने ।

**धातृ । धातृणी । धातॄणि । हे धातः!, हे धातृ ! धात्रा, धातृणा । एवं ज्ञातृकर्त्रादयः । इत्यृदन्ता ॥**

दधाति इति धातृशब्दो धारणकर्तृत्वरूपप्रवृत्तिनिमित्तैक्यात् टादावचि पुंवत्त्वविकल्पः । धातृ । धातृणी । धातॄणि ।

धातृ + जस् धातृ + अस् धातृ + शि धातृ + इ धातृ न् + इ धातृन् + इ धातृन् + इ (उपधादीर्घः) धातॄणि ।

हे धातः, हे धातृ / हे धातृणी / हे धातॄणि / धात्रा, धातृणा । धात्रे, धातृणे । धातुः, धातृणः । धात्रोः । धातृणोः । धातॄणाम् । धातरि, धातृणि । इत्यादि ।

परिभाषासूत्रम्-

**एच इग्घ्रस्वादेशे १ । १ । ४८**

**आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात् । प्रद्यु । प्रद्युनी । प्रद्यूनि । प्रद्युनेत्यादि । इह न पुंवत्, यदिगन्तं प्रद्यु इति, तस्य भाषितपुंस्कत्वाभावात् । एवमग्रेऽपि । इत्योदन्ताः ॥ प्ररि । प्ररिणी । प्ररीणि । प्ररिणा । एकदेशविकृतस्यानन्यत्वात् "रायो हलि" इत्यात्वम् - प्राराभ्याम् । प्राराभिः । "नुमचिर..."इति नुट्यात्वे प्राराणाम् इति माधवः । वस्तुतस्तु सन्निपातपरिभाषया नुट्यात्वं न "नामि" इति दीर्घस्त्वारम्भसामर्थ्यात्सन्निपातपरिभाषां बाधत इत्युक्तम् । प्ररीणाम् । इत्यैदन्ताः ॥**

**सुनु, सुनुनी, सुनूनि । सुनुना, सुनुने इत्यादि । इत्यौदन्ताः ॥**

प्रकृतसूत्रेण 'ह्रस्वो नपुंसके-' इत्यनेन ह्रस्वे विधीयमाने ए, ऐ, इत्यनयोःस्थाने इकारः, ओ औ इत्यनयोः स्थाने उकार आदेशो नियम्यते ।

प्रद्योशब्दस्य ह्रस्वे कृते - प्रद्यु । प्रद्युनी । प्रद्यूनि । हे प्रद्यो, हे प्रद्यु / प्रद्युना । इत्यादि । इह न पुंवत् । यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात् । एवं ह्रस्वादेशेषु सर्वेष्वपि पुंवत्त्वाभावो बोद्धव्यः ।

अत्र पुंनपुंसकयोः प्रकृष्टस्वर्गवत्त्वमेकमेव प्रवृत्तिनिमित्तमिति टादौ पुंवत्त्वविकल्प कुतो नेति जिज्ञासायाम्- प्रद्योशब्द ओदन्तः पुंसि । नपुंसके तु प्रद्युशब्द उदन्तः । तेन पुंसि प्रद्योशब्दस्य भाषितपुंस्कत्वेऽपि नपुंसके प्रद्युशब्दस्य तदपेक्षया भिन्नस्वरूपत्वेन एकशब्दस्यैव भाषितपुंस्कत्वाभावान्न पुंवत्वमित्यर्थः ।

प्रैशब्दस्य ह्रस्वत्वे जाते - प्ररि । प्ररिणी । प्ररीणि । प्ररिणा । एकदेशविकृतस्यानन्यत्वाद् 'रायो हलि' इति आत्वम्, प्राराभ्याम् । प्राराभिः । "नुमचिर-" इति नुट्यात्वे - प्राराणाम्, इति माधवः । वस्तुतस्तु सन्निपातपरिभाषया नुट्यात्वं न । 'नामि' इति दीर्घस्त्वारम्भसामर्थ्यात्संनिपातपरिभाषां बाधते इत्युक्तम् । तेन प्ररीणाम् ।

अत्र 'प्ररि + आम्' इति स्थिते पूर्वविप्रतिषेधेन नुटि कृते ह्रस्वान्तमुपजीव्य प्रवृत्तस्य नुटस्तद्विघातकमात्वं प्रति निमित्तत्वासंभवात् आकारान्तादेशो न भवति । नामीति दीर्घेण ह्रस्वान्तत्वविघातस्तु सूत्रसार्थक्याय स्वीक्रियत एवेति भावः ।

प्रै + प्ररि प्ररि + आम् प्ररि + न् आम् प्ररि + नाम् प्रारा + नाम् प्राराणाम् । पक्षे - प्रै प्ररि प्ररि + आम् प्ररि + न् आम् प्ररि + नाम् प्ररी + नाम् प्ररीणाम् ।

सुनौशब्दस्य ह्रस्वे कृते - सुनु । सुनुनी । सुनूनि । सुनुना । सुनुने । इत्यादि ।

सुनौ सुनु सुनु + सु सुनु । सुनौ सुनु सुनु + औ सुनु + शी सुनु न् + ई सुनु नुम् + ई सुनुन् + ई सुनुनी । सुनौ सुनु सुनु + जस् सुनु + अस् सुनु + शि सुनु + इ सुनु न् + इ सुनुन् + इ सुनूनि । सुनौ सुनु सुनु + टा सुनु + आ सुनुना । सुनौ सुनु सुनु + ङे सुनु + ए सुनु न् + ए सुनुन् + ए सुनुने ।

| मधुशब्दस्य रूपावली | | |
|---|---|---|
| मधु | मधुनी | मधूनि |
| मधु | मधुनी | मधूनि |
| मधुना | मधुभ्याम् | मधुभिः |
| मधुने | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुनोः | मधूनाम् |
| मधुनि | मधुनोः | मधुषु |
| हे मधो / हे मधु / | हे मधुनी / | हे मधूनि / |

| सुलूशब्दस्य रूपावली | | |
|---|---|---|
| सुलु | सुलुनी | सुलूनि |
| सुलु | सुलुनी | सुलूनि |
| सुल्वा / सुलुना | सुलुभ्याम् | सुलुभिः |
| सुल्वे / सुलुने | सुलुभ्याम् | सुलुभ्यः |
| सुल्वः / सुलुनः | सुलुभ्याम् | सुलुभ्यः |
| सुल्वः / सुलुनः | सुल्वोः / सुलुनोः | सुल्वाम् / सुलूनाम् |
| सुल्वि / सुलुनि | सुल्वोः / सुलुनोः | सुलुषु |
| हे सुलो / /हे सुलु / | हे सुलुनी / | हे सुलूनि / |

## प्रयोगसिद्धिप्रकारः

### प्रियक्रोष्टूनाम्

प्रियक्रोष्टुशब्दस्य "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां "ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण "स्वौजसमौट्-" इति सूत्रेण षष्ठ्या बहुवचने आम्विभक्तौ "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इत्यनेन पुंवत्त्वपक्षे "विभाषा तृतीयादिष्वचि" इत्यनेन तृज्वद्भावे प्राप्ते "ह्रस्वनद्यापो नुट्" इत्यनेन नुटि च प्राप्ते "विप्रतिषेधे परं कार्यम्" इत्यनेन परत्वात् तृज्वत्त्वे प्राप्ते "नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन" इति वार्तिकसहयोगेन नुडागमेऽनुबन्धलोपे "नामि" इत्यनेन दीर्घे प्रियक्रोष्टूनाम् इति रूपम्, पुंवत्त्वाभावपक्षेऽपि तृज्वत्त्वं परत्वाद् बाधित्वा नुम् तमपि "नुमचिर-" इति पूर्वविप्रतिषेधेन बाधित्वा "ह्रस्वनद्यापो नुट्" इत्यनेन नुटि कृते पूर्ववदेव प्रियक्रोष्टूनाम् इति रूपं च सिद्धयति ।

## अभ्यासः

१. **निम्नप्रश्नानामुत्तराणि दत्त**

(क) "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इत्यनेन कीदृशस्य शब्दस्य पुंवत्त्वं भवति ?

(ख) सुलूशब्दस्य पुंवत्त्वपक्षे घिसंज्ञा भवति न वा, कारणञ्च किम् ?

(ग) मधुशब्दस्येव अम्बुशब्दस्य षष्ठीविभक्तौ कानि रूपाणि जायन्ते ?

(घ) 'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन" इत्यत्र "पूर्वविप्रतिषेधः इत्यस्य कोऽर्थः ?

(ङ) प्रद्यो, प्ररै, सुनौ, एतेषां ह्रस्वे कृते कीदृशानि रूपाणि भवन्ति ?

(च) सुनौशब्दस्य तृतीयादिषु पुंवद्भावो भवति न वा ?

२. **"एच इग्घ्रस्वादेशे" इत्यनेन सूत्रेण किं नियम्यते ?**

३. **उपयुक्तेषु (✓) इति चिह्नं, अनुपयुक्तेषु (✗) इति चिह्नं योजयत**

(क) 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वविहितानां शब्दानां पुंवद्भावो न भवति । ( ... )

(ख) सुल्वा इत्यत्र 'ओःसुपि' इत्यनेन यण् भवति । (...)

(ग) ह्रस्वविधौ ऐकारस्य एकार औकारस्य ओकारो भवति (...)

(घ) प्ररैशब्दस्य आमि एकमेव रूपं सर्वसम्मतमस्ति (...)

(ङ) सुनुना इत्यत्र नुमागमो भवति । (...)